Arya Samaj Foundation Chennai

GURUKUL PATRIKA JAN-SEP 1974 G.K.U.

Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल-पत्रिका
पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय, हरिद्वार
वर्ग संख्या............ आगत संख्या...10519...........

पुस्तक – वितरण की तिथि नीचे अंकित है । इस तिथि सहित ३०वें दिन तक यह पुस्तक पुस्तकालय में वापिस आ जानी चाहिए । अन्यथा १० पैसे के हिसाब से विलम्ब-दण्ड लगेगा ।

11 SEP 1984
G/197/408

DIGITIZED C-DAC
2005-2006

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल-पत्रिका

पुस्तकालय गुरुकुल काँगड़ी विश्वविद्यालय
गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार
DIGITIZED C-DAC 2005-2006
30 AUG 2005

सितम्बर १९७४, भाद्रपद २०३१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषय-सूची

सं०	विषया:	लेखका:	पृष्ठांका:
१	श्रुति-सुधा		१
२	विद्याभेदा:	श्री आचार्य जयदत्त शास्त्री	२
३	संस्कृतवाङ्मये मानमानम्	श्री गायत्रीप्रसादपाण्डेय: एम.ए., आचार्य:	४
४	अथ प्रकाशाभ्युदयो नाम	श्री डा० मंगलदेव शास्त्री	८
५	अग्निमन्त्रमाला	श्री अरविन्द:, अनु० श्री जगन्नाथो वेदालंकार:	११
६	स्वराज्यं सुराज्यं भवेत् सर्वदा न:	श्री पं० धर्मदेवो विद्यामार्तण्ड:	१५
७	वैदिक-साहित्य-सौदामिनी	श्री वागीश्वरो विद्यालंकार:, साहित्याचार्य:	१६
८	भारते भीषणभ्रष्टाचारस्य भैरवीचक्रम्	विद्याभूषण: श्री गणेशराम शर्मा	१९
९	सम्पादकीय टिप्पण्य:	श्री पं० भगवद्दत्तो वेदालंकार:	२३
१०	साहित्य-समीक्षा	,, ,, ,,	२४
११	शिवरात्री का सन्देश	श्री योगेन्द्र पुरुषार्थी	२५
१२	वैदिक देवताओं का दार्शनिक स्वरूप	श्री रामदास निराकारी एम.ए., पीएच.डी.	२६
१३	कब होंगे ?	श्री महावीर 'नीर' विद्यालंकार	२९
१४	वैदिक तरंग	डा० इन्द्रसेन जेतली	३०
१५	वेदों का विषयानुगामी भाष्य	आचार्य पं० रघुनाथ विनायक धुलेकर	३६
१६	गुरुकुल-समाचार	श्री महावीर 'नीर' विद्यालंकार, एम०ए०	३९

गुरुकुल-पत्रिका का वार्षिक मूल्य —

देश में ४ रुपये. विदेश में ७ रुपये, एक प्रति ४० पैसे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओ३म्

गुरुकुल-पत्रिका

[गुरुकुलकांगड़ीविश्वविद्यालयस्य मासिक पत्रिका]

भाद्रपदः २०३१, सितम्बरः १९७४, वर्षम्-२७, अङ्कः १, पूर्णाङ्कः ३०९

श्रुति सुधा

ओ३म् एवा महस्तुविजातस्तुविष्मान् बृहस्पतिर्वृषभो धायि देवः ।
स नः स्तुतो वीरवद्धातु गोमद् विद्यामेषं वृजनं जीरदानुम् ॥७॥

(एवा) इस प्रकार स्तुभ नामक स्तुति से वह (महः) महान् (तुविजातः) बहुत रूप में उत्पन्न तथा (तुविष्मान्) बलवान् (वृषभः) ज्ञान रस की वर्षा करने वाला वह बृहस्पति (देवः) दिव्यगुणयुक्त बृहस्पति (धायि) धारण किया जाता है (स स्तुतः) वह स्तुति किया गया बृहस्पति (नः) हमें (जीरदानुं) जीवनदाता या क्षिप्रदाता (वीरवत्) वीर पुत्रों वाले तथा (गोमत्) गौ आदि पशुओं वाले ऐश्वर्य को (धातु) धारण करावे ।

तुविजातः–बहुजातः । नि. १२।३६, बहुषु प्रसिद्धः । तुविरिति बहुनाम । निघ. ३।१

जीरदानुम्–जीराः क्षिप्रनाम निघ. २।१५
यो जीवनं ददाति तं—

जो व्यक्ति भगवान् के बार्हस्पत्य रूप की आराधना करता है अथवा बृहस्पतितत्त्व को अपने में उद्बुद्ध करता है उसे गौ आदि पशु, वीर पुत्र, नानाविध ऐश्वर्य प्राप्त होता है और वह बृहस्पति के समान ज्ञानी बनता है । एवं राष्ट्र में बृहस्पति आचार्य की मानप्रतिष्ठा हो तो वह राष्ट्र सर्वगुणसम्पन्न होता है, उस देश के छात्र अनुशासित रहते हैं ।

— —

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्याभेदाः

लेखकः– श्री आचार्य जयदत्त शास्त्री,

'विद्या' शब्दोऽयं 'विद्ज्ञाने' इत्यस्माद्धातोः संज्ञायां विषये 'क्यप्' प्रत्यये कृते निष्पन्नो भवति (द्रष्टव्या-अष्टाध्यायी ३।३।९९)। एतस्य शब्दस्य प्राचीनतमः प्रयोगो यजुर्वेदे समुपलभ्यते––

'विद्यां चाविद्यां च यस्तद् वेदोभयं सह।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते।। (यजु० ४०।१४) इति। अत्रेदं जिज्ञासितव्यं विद्या नामेयं किं स्वरूपा, किं मूला किं प्रकारा चेति। तत्रादौ स्वरूपं चिन्त्यते। विदन्ति जानन्ति यथावत् पदार्थ-स्वरूपं यया सा विद्या। सैषा आत्माधिष्ठाना बुद्धिग्राह्याऽस्मदादीनां बोधनिमित्ता सत्यपि ज्ञेयत्वेन शास्त्रेषूपदिश्यते। वस्तुतो यद्विषयगतं यज्ज्ञानं तज्ज्ञानमेव तद्विषयिकी विद्या। अतो विद्या विज्ञानमिति नार्थान्तरम्। अथ किं मूलेति, उच्यते, यथा सर्वशब्दानामादिमूलमोंकारस्तद्वदत्रापि समस्तविद्यानामादिमूलं प्रणवो विज्ञेयः। उक्तं च-भर्तृहरिणा––

सत्या विशुद्धिस्तत्रोक्ता विद्यैवैकपदागमा।
युक्ता प्रणवरूपेण सर्ववादाविरोधिनी।।
विधातुस्तस्य लोकानामङ्गोपाङ्गनिबन्धना।
विद्याभेदाः प्रतायन्ते ज्ञानसंस्कारहेतवः।।
(वाक्यपदीयं, ब्र० का० ९-१०)

अस्यायमर्थः एकपदरूपा श्रुतिः 'ओ३म्' इति वाक्, विद्या सत्या सद्रूपा सर्वार्थप्रकाशिनी सर्व-वादेषु अविरोधिनी च वर्तते, कस्मिन्नपि सिद्धान्ते अस्या विरोधो नास्तीति। सर्वलोकानां सर्वजगतां विधातुः सृष्टुरीश्वराद् ओंपदवाच्याद् ब्रह्मण एव सर्वे विद्याभेदाः प्रतायन्ते प्रकटीभवन्ति। एवमत्र सर्वासां विद्यानां सर्वेषां ज्ञानसंस्कारकारणानां च प्रणवप्रभवत्वमुक्तम्। शास्त्रान्तरे खल्वपि,

"एवं वाऽरेऽस्य महतो भूतस्य निःश्वसितमेत-द्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्या-ख्यानानि व्याख्यानान्यस्यैवैतानि सर्वाणि निःश्व-सितानि।" (श० ब्रा० १४।५।४।१०) इत्यादिना अङ्गोपाङ्गनिबन्धनो यो वेदराशिः सोऽपि तत एवेश्वरादादिसर्गे प्रकटयाम्बभूवेति स्फुटमुक्तम्।

अथ किं प्रकारेयं विद्येत्यत्र विषये नानावादाः भवन्ति। विद्यायाः द्वैविध्यम्–एवं खलु श्रूयते "द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति परा चैवापरा च।। तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षाकल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यते।।" (मुण्डकोपनिषत् १।४-५) इति। अत्र यया विद्यया ब्रह्मज्ञानं भवति मोक्षाधि-गमश्च सा परानाम्नी विद्या सर्वासु विद्यासू-त्कृष्टतमा निगदिता। तदितरा अन्या विद्या 'अपरा' नाम्ना परामृश्यन्ते। तासु चार्ग्वेदाद् ज्योतिः-शास्त्रपर्यन्तं वेदाङ्गादिशास्त्रजातं संगृहीतं भवति। छान्दोग्योपनिषदि ऋग्वेदप्रभृतीनां सप्तदशविद्या-ग्रन्थानामध्ययनस्योल्लेखो दृश्यते "स होवाचर्ग्वेदं भगवोऽध्येमि यजुर्वेदँ सामवेदमाथर्वणं चतुर्थमिति-हासपुराणं पञ्चमं वेदानां वेदं पित्र्यँ राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां नक्षत्रविद्यां सर्वदेवजनविद्यामेतद् भगवोऽध्येमि"।। (छा० उ० ७।१।२) इति। एवं ग्रन्थान्तरेष्वपि विद्याभेदाः वर्णिताः सन्ति, तद्यथा––

विद्यायाश्चातुर्विध्यम्––

आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती।
विद्याश्चतस्र एवैता योगक्षेमाय देहिनाम्।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आन्वीक्षिक्यात्मविज्ञानं धर्माधर्मौ त्रयीस्थितौ ।
अर्थानर्थौ तु वार्तायां दण्डनीतौ नयानयौ ।।
(कामन्दकीयनीतिसारः २।२,७)

"आन्वीक्षिकी त्रयी विद्या दण्डनीतिश्चेति विद्याः । . . . चतस्र एव विद्या इति कौटिल्यः । ताभिर्धर्मार्थौ यद् विद्यात्, तद्विद्यानां विद्यात्वम् । सांख्यं योगो लोकायतं चेत्यान्वीक्षिकी । धर्माधर्मौ त्रय्याम् । अर्थानर्थौ वार्त्तायाम् । नयापनयौ दण्डनीत्याम् । बलाबले चैतासां हेतुभिरन्वीक्षमाणाऽऽन्वीक्षिकी लोकस्योपकरोति, व्यसनेऽभ्युदये च बुद्धिमवस्थापयति । प्रज्ञावाक्यक्रियावैशारद्यं च करोति । प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् । आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता ।।" (कौटिलीयार्थशास्त्रम्-विद्यासमुद्देशः) ।

आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिश्च शाश्वती ।
विद्याश्चतस्र एवैता अभ्यसेन्नृपतिः सदा ।।
आन्वीक्षिक्यां तर्कशास्त्रं वेदान्ताद्यं प्रतिष्ठितम् ।
त्रय्यां धर्मोऽधर्मश्च कामोऽकामः प्रतिष्ठितः ।।
अर्थानर्थौ तु वार्त्तायां दण्डनीत्यां नयानयौ ।
वर्णाः सर्वाश्रमाश्चैव विद्यास्वासु प्रतिष्ठिताः ।।
अंगानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
धर्मशास्त्रपुराणानि त्रयीदं सर्वमुच्यते ।।
(शुक्रनीतिः १।५१-५४)

"इमास्तु चतस्रो विद्याः पृथक्प्रस्थानाः प्राणभृतामनुग्रहायोपदिश्यन्ते यासां चतुर्थीयमान्वीक्षिकी न्यायविद्या ।" (न्यायदर्शने वात्स्यायनभाष्यम् १।१।१) । 'पौरुषेयं तु पुराणमान्वीक्षिकी मीमांसा स्मृतितंत्रमिति चत्वारि शास्त्राणि ।' (काव्यमीमांसा-तृतीयोऽध्यायः) मनावपि—

'त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिं च शाश्वतीम्।
आन्वीक्षिकीं चात्मविद्यां वार्तारम्भांश्च लोकतः ।।'
(मनुस्मृतिः ७।४३) । एतेषु वाक्येषु सर्वविद्यानाम् त्रयी वार्त्ता दण्डनीतिरान्वीक्षिकीति चतसृषु मुख्यविद्यास्वन्तर्भावो वर्णितः ।

विद्यायाश्चतुर्दशभेदाः—

अंगानि वेदाश्चत्वारो मीमांसान्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ।।
(रघुवंशः ५।२१ मल्लिनाथकृतटीका)
पुराणन्यायमीमांसा धर्मशास्त्रांगमिश्रिता ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ।।
(याज्ञवल्क्यस्मृतिः)

अत्र ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेद इति चत्वारो वेदाः, शिक्षा, कल्पो, व्याकरणं छन्दो ज्योतिषं निरुक्तमिति षड् वेदाङ्गानि, मीमांसा, न्यायशास्त्रं, पुराणं, धर्मशास्त्रं चेति चत्वारि शास्त्राणि मिलित्वा चतुर्दशविद्याः परिगणिताः सन्ति । महर्षिणा दयानन्देन तु चतुर्दशविद्यानां भिन्नक्रमः प्रदर्शितः । स चैषः—

'एवं चत्वारो वेदाः सशाखाः व्याख्यानसहिताश्चत्वारउपवेदाः, षड् वेदाङ्गानि षट् च वेदोपाङ्गानि मिलित्वा षड् । एतैरेव चतुर्दश विद्या मनुष्यैर्ग्राह्याः भवन्तीति वेद्यम् ।" (ऋग्वेदादिभाष्यभूमिकाग्रन्थप्रामाण्याप्रामाण्यविषयः) ।

अस्मिन् क्रमे शाखासहिता ऋगाद्याश्चत्वारो वेदाः, अर्थवेदधनुर्वेदायुर्वेदगान्धर्ववेदाख्याश्चत्वार उपवेदाः, शिक्षादीनि षड् वेदाङ्गानि, न्यायवैशेषिकसाङ्ख्ययोगपूर्वमीमांसोत्तरमीमांसाऽऽख्यानि षट् शास्त्राणि (वेदोपाङ्गानि) च चतुर्दशविद्यासु परिगणिताः । अहो ! कियती खलु सूक्ष्मेक्षिका तस्य मुनेर्यदशेषेण सर्वविद्यानामत्र वाक्य समुल्लेखः कृतः ।

अद्यत्वे एकैकस्या अपि विद्याया बहवो भेदाः सन्ति । तद्यथा एकस्यैव ज्योतिः शास्त्रस्यांतर्भूतं गणितशास्त्रमपि बीजाङ्करेखाऽऽदिनानाभेदप्रभेदयुक्तमस्ति । एवं विद्यान्तरेष्वपि बोध्यम् । परमेतावता नैवं मन्तव्यं यत् प्राक्तनैराचार्यैर्विद्याया भेदा उक्तास्ते अपूर्णाः सन्ति। तेषां संक्षेपेण,प्राधान्येन सूत्ररूपेण च सर्वविद्यानां समुल्लेखस्य कृतत्वात् । प्रायेण संक्षेपरुचयो हि मुनयो बभूवुः । अतस्तत्र सर्वप्रकारेण पूर्णतैवास्ति न काचिदपि न्यूनतेति दिक् इति ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"संस्कृतवाङ्मये मानमानम्"

श्री गायत्री प्रसाद पाण्डेयः, एम०ए० आचार्यः, प्रवक्ता वाराणसेय संस्कृत विश्वविद्यालये

अहो वाचामगोचरो महिमा संस्कृतवाङ्मयोद्यानस्य यत्रानेकविधमानिनीमानवर्णनानैपुणी सुमनसो मधुरमधुरापरम्परैव सुमनसौ मनांसि बलादिचिकीर्षति । यत्र च रुचिररुचिरा षड्पदालीव निर्भरमकरन्दपिपासवो रसिकाः कामं श्रद्दधते । भूयांसो वश्यवचसो महाकवयो मनसा मानस्य महिमानमाकलयन्तो बहु पर्यरीरचन् मानविषये । अत्र निबद्धयमाने प्रस्तावे मानपदेन मानिनीनां विचित्रः प्रेमाभिनयोऽस्ति प्रतिपिपादयिषितः । स च मानः प्रणयेर्ष्यादिसहकारिसमुत्त्थौ द्विविध इति पुरोविमर्क्ष्यते, अत्रादौ इदमत्र ध्येयं–यदसौ मानः कथमुत्पद्यते कथमाविर्भाव्यते का परम्परा कश्च मानहेतुः का च मानभूरित्येवमादि । मानमस्ति नूनमतिविलक्षणं वस्तु यन्न सीमाङ्कितुमियत्तया परिच्छेत्तुञ्च शक्यते केनापि । असौ हि नानाविधासु परिस्थितिषु मानिनीनां हृदयसरोवरसमुद्भूतो मानपद्मः स्वीयकमनीयामोदप्रसरेण सचेतसां चेतो मिलिन्दममन्दमाह्वयति । मानधारकत्वादेव स्त्रियो मानिनीत्याख्यां बह्वोः अनेहसः समालिलिङ्गुः । परन्तु पुंसां मनसि असौ मानो नोदेतीत्यत्र न मनाक् मे प्रत्ययः । एष हि सार्वजनीनानुमतो विषयः यदिह लोके प्रेमा भवत्येवात्यन्तं विलक्षणो विचक्षणमात्रैकविज्ञेयोऽत्यन्तं वक्रिमः । जीवनं नामातन्दनिष्यन्दिनः प्रेम्णः रसमाधुरीनिचयस्य नवं नवं परिपाकमाकाङ्क्षदपि नैजा निर्वचनीयमहिम्ना एकविध्येऽपि वैविध्यमापादयददः कस्याक्ष्णोः परमस्तीति न कश्चिद्विपश्चिदविपश्चित् सामान्यो वा विप्रतिपद्यते ।

प्रणयिनि सन्निहिते मानमभीषुभिः विधीयमानो मानः प्रेम्णोऽभिनूत्नतामाढौकयितुं प्रयतते । असौ क्रमस्तं चिरसमीहितं प्रेमाणं समेधयितुमेवानुष्ठीयते प्रायोभिः । यच्च प्रणयमान निदर्शने निदर्शयिष्यामः । मानमन्तरा प्रेमपूर्णं परिपोषं नाश्नुते । अतएव प्रियतमसदनोन्मुखी 'सखी' तत्सहचरी काचिद् विहितपतिगृहनिवासा योषा मानं शिक्षते––

"अयि प्रथमतएव पतिपरायणे मुग्धे ! मौग्ध्यं नानुष्ठेयं त्वयकाप्रेम्णोऽतिरमणीये पथि । कदाचिन्मानमवलम्बेथाः, प्रणतिपरेऽपि दयिते धैर्यं धारयेथाः, आर्जवं च वर्जयेः । सखी च यदैवैवमबुबोधविषया व्याजहार्षीत्, तदैव भयावनम्रवदना सा व्याहृतवती–आः शनकैर्ब्रूहि नो चेदन्तःसंस्थितो मे दयिता निशम्यैतत्तवोपदेशं मनसि किमाकलयिष्यति[1] इत्यादि ।

अत्रामरुककविवनिता दयितरि भृशमनुरज्यत इति ध्वनिः । भाषाकविहरिणा विहारिणा अन्ववादि पद्यमदो महाकवेरमरुकस्य––

सखी सिखावतमानविधि सैननिवरजतवाल ।
हरुये कहु मो हियसदा वसत विहारी लाल[2] ॥

निश्चप्रचमेवात्र विहारिणो मानिनी अमरुककविललनामुपालभते यदुरसा क्रियमाणे वाग्-

---

[1] मुग्धे? मुग्धतयैव नेतुमखिलः कालः किमारभ्यते–
मानं धत्स्व धृतिं बधान् ऋजुतां दूरे कुरु प्रेयसि ।
सख्यैवं प्रतिबोधिता प्रतिवचस्तामाह भीतानना
नीचैः शंस हृदिस्थितो हि ननु मे प्राणेश्वरः
श्रोष्यति ॥
(अमरुशतक)

[2] विहारी सतसई–

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यापारे कथं त्वमात्मानं गोपायेः अतश्च सा विदग्धनेत्राभ्यामेवान्तरं भावमाविश्चिकीर्षति । उर्दूभाषाकविना केनचिदसौ मानः "शिकवा" पदेनाभिलप्यमानोऽतिरमणीयं प्रतिपादितः प्रणयपुण्डरीकविकासकत्वेन । सत्यमेवायं मानो विलक्षणोनिकषः यदध्यारूढौ नायिकानायकौ वाढमनुभवतोऽतिकमनीयमानन्दसन्दोहम् ।

ऋतूनां राजनि बसन्ते समुपारूढे प्रतिग्रामं प्रतिस्त्रियम्सबहुमानमासीत् मानचर्चा । यावत्कुलमेव मानं धारयदासीत् परन्तु बसन्तकेसरिणि प्राप्ते पलायितो मानहरिणः कामिनीनाम्--

"पुरिपुरि विनिवृत्ता मानिनीमानचर्चा" अर्थात् ग्राम-ग्रामणीग्रामादपससार मानकृष्णसारो मानभङ्गश्च प्रससार सर्वतः कामिनिकुले । कव च पदं निदध्यादप्यसौ मानः— बासन्तिकरामणीयके परिसरे परितः प्रेमप्रसूनपरिमलामोदपरिपूरिते कामिजनहृदये कुहावकाशो लभताँ मानः । पुष्पधन्वनोऽविरलशरप्रहाराकुलीक्रियमाणे जम्पति हृदये क्षणमपि स्थातुं न शेके मानभाव हरिणशावकः ।

पुष्कलः कश्चिन्नूनमेव प्रणयमानमहिमा यत्र च कादम्बर्येकानेकग्रन्थरत्नप्रणयिनो महाकविबाणभट्टप्रमुखाः शिरो व्यधूनयन् । परिगृहीतमानां बहुशः प्रार्थ्यमानामप्यप्रसीदमानां मानिनीं स्वकीयामपगतमानां विदधातुं बहुशश्राम परञ्चानपगते तदीयेमन्यौ सस्वीयानवद्यसद्योवनद्धपद्येन तन्मानमपनिनीषुः तुष्टाव३ "अयि मानप्रिये ? क्षणदा क्षणं क्षणं क्षीयते, अनन्ताकाशचारि विधु मण्डलमस्ताचलमालम्बते, निद्रापरवश इव दीपो निर्वाणतां जिगमिषति । अर्थात् निशाशशी युगपदेव क्षिणुतः—अचिरादेवाजिगमिषति तिग्मगुः—ऐन्द्र्या मधुना तव चरणनिपतितोऽप्यहं न त्वया मृष्येइत्यादि । अमुष्मिन्नेवावसरे समागतो मयूरभट्टस्तुरीयचरणं निर्ममे, निर्ममम भिशप्तश्च किलाशग्रस्तः 'सूर्यशतकेन' भानुमप्रीणयत् नीरुजत्वञ्च समवाप । यदि नाम सा मानं नाकरिष्यत् नानुनयिष्यत्तां वाणभट्टो न चैव पद्यपूरणेनाभ्यशप्स्यत मयूरभट्टः । अतोऽत्रापि सूर्यशतकाख्यकाव्यप्रणयने परम्परया मानस्य प्रयोजकत्वं को नाम नाङ्गीकर्तुमीष्टे ।

अधुना साहित्यसूरिभिराविर्भावितं मानस्य स्वरूपं निदर्शयितुमुपक्रमे । साहित्यदर्पणकारो विश्वनाथपञ्चाननः मानं पर्यभाषत्— "मानः—कोपः४—"

अर्थात् कोपस्यैवापरं नाम मान इति स च द्वेधा भवति (१) आद्यः प्रणयसमुद्भवो परश्चेर्ष्यासमुत्थः । तत्र प्रणयप्रसूतोऽसौ संप्रयुक्तायां स्थितौ जायते । यदा अकारणमेवोच्छ्वलितानन्दतरङ्गौ जायापती परमानन्दसुधासिन्धावर्तिमानमुन्मिमङ्क्षन्तौ प्रणयाभिनयमनुतिष्ठतः सचाभिनयो मिथ जायमानः प्रणयमानकोटावाटीकते पदम् । अमन्दानन्दोदन्वानुच्छलति उभयोर्मनिसे, बलीयसि परिष्वजाभिलाषे निगूढेऽपि हृदि, कानिचित् क्षणानि यावदेकेतरो मानमाधत्ते अपरश्चानुनिनीषते अन्योन्यम् । यूनोरेकतरे च हावभावादिविलासे प्रका-

---

३ गतप्रायारात्रिः कृशतनुशशी शीर्यत इव,
प्रदीपोऽयं निद्रावशमुपगतो घूर्णित इव ।
प्रणामान्तोमानस्त्यजसि न तथापि क्रुधमहो
कुचप्रत्यासत्या हृदयमपि ते चण्डि कठिनम् ॥

४ मानः कोपः सदुद्वेधाप्रणयेर्ष्यासमुद्भवः ॥
सा० द० तृ० परि० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिते युगपदुभयोर्ध्र्यसेतुः सैकतं पुलिनमिव विनाशाशं पित्सति ! पुनरपि बोभवीति मिथ आसज्जनम् । इत्थञ्च प्रणयमानः कारणान्तरानपेक्षो निक्षपति प्रणयपक्षम् ।

आचार्यो धनञ्जयः५ मानस्वरूपं व्याचष्ट दशरूपके–तदीयं हार्दमेतत् यद् गाढ़ानुरक्तयोः नायिकानायकयोः पृथग् भवनमेव हि विप्रयोगः स च मानप्रवासभेदाभ्यां द्विधा । मानोऽपि प्रणयेर्ष्याभेदेन द्वैविध्यं भजते । असौ प्रणयमानो नायिका नायकोभयनिष्ठो भवति ।

आचार्यो रुद्रटः काव्यालङ्कारे विप्रलम्भशृंगारं चतुर्धा व्यभजत् । (१) अनुराग (२) मान (३) प्रवास (४) करुणभेदात् । असौ नाङ्गी चक्रे प्रणयमानं । केवल६मीर्ष्यासमुत्थमेव मानमूरीचकार । तदीयं विवक्षितमेतत् यत् यदैव नायिका नायकस्येतररमणीप्रसक्तिं विन्दमाना रुषा नायकं विप्रियं व्यवजिहीर्षति, तदाऽस्या व्यवहार एव मानपदव्यपदेश्यो भवति । रुद्रटो मानं मानिनीमात्रनिष्ठमामनुते न च यातुचिन्नायकगतम् । यतो हि परस्त्रीसम्पर्कजन्या ईर्ष्या स्त्रीमात्रवृत्तिः । न च कदाचिदपि परपुरुषसंसक्तां योषां पुरुषईर्ष्यते । किन्तु क्रुधाऽभिभूयते । इदमत्रावश्यमाकूतम्-एतद्धि विवेचनमतीवकुलीनयोर्नायिकनायिकयोरेव सङ्घटते, इतरत्र तु क्षोदक्षमोऽसौ पक्षः । यदा च नायको निष्क्रियो व्यवितत्र्वविरहितः षण्ढो वा भवेत् नायिका च मनोज्ञरूपगर्विता दर्पोद्धता यौवनालिङ्गिता सत्यसतीत्वमनुतिष्ठासति, कुरुते च परनायकसमाश्रयणम् तदा नायकः स्वमभिक्रुध्यति ईर्ष्यते च परपुरुषाय ।

ईर्ष्यामानविवेचनप्रस्तावे दर्पण७कारोऽपि स्त्रीनिष्ठमेव तदूरीकुरुते । क्षेत्रान्तरमवतरन्तं नायकं वीक्ष्य, वयस्यासहचर्यादिना वा निवेद्यमानं निशम्य अन्तस्त्रियमुदीयमानो नाम ईर्ष्यामानत्वमाश्लिष्यति ।

धनञ्जयस्याप्यत्रैकसत्यं८ सार्वभौमत्वमस्याभिनक्ति । दशरूपके ईर्ष्यामानस्य प्रयोजकं कारणत्रिकमभिप्रेतं, यच्च संवदते दर्पणेनापि९ । मानलक्षणं भावप्रकाशनीयं१० विद्वद्भ्यो बहुरोरुच्यते । असौ हि प्रेमानुबन्धिनं ललितलास्यविलासमेव मानमाचष्ट, यस्य च स्वरूपं प्रणयमानविवेचनावसरे न्यरूपि प्रागेव । प्रणयसमुत्थ एव मानोमानः, ईर्ष्यासमुद्भूतस्तु दुर्भेदं तिमिरपटलमिवान्तरा यूनोरितष्ठति न च सः प्रणयकोपपरिपोषकः ।

अत्रेदमनवद्यं पद्यमिव हृद्यम्––

न सर्वथा विप्रलभ्य शृंगार एवान्तर्भवति

---

५ विप्रयोगस्तु विश्लेषो रूढ़ विस्रम्भयोर्मिदा ।
मानप्रवासभेदेन, मानोऽपि प्रणयेर्ष्ययोः ।
तत्र प्रणयमानः स्यात् कोपावसितयोर्द्वयोः ।
द०रू०च०प्र०५७–५८।।

६ मानः स नायके यं विकारमायाति नायिका सेर्ष्या।
उद्दिश्य नायिकान्तरसम्बन्धसमुद्भवं दोषम् ।
(काव्यालङ्कार रुद्ट–अ०१४का२२–२३)

७ पत्युरन्यप्रियासङ्गे दृष्टे चानुमिते श्रुते ।
ईर्ष्या मानो भवेत् स्त्रीणां तत्र त्वनुमितिस्त्रिया।।
(सा०द०विश्व०तृ०प०१९९)

८ स्त्रीणामीर्ष्या कृतो मानः कोपेऽन्यासङ्गिनिप्रिये ।
श्रुते वानुमिते दृष्टे श्रुतिस्तत्र सखीमुखात् ।।
(द०रू०च०प्र०५९–६०)।।

९ पत्युरन्यप्रिया संगे दृष्टे चानुमिते श्रुते ।

१० यत्तु प्रेमानुबन्धेन स्वातन्त्र्याद्धृदयंगमम् ।
बध्नाशावकौटिल्यं सोऽयं मान इतीर्यते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानः । यदा हि नायिकानायकयोरेकतरानुनयविनयपर्यन्तावस्थायी मानस्तदा तस्य विप्रलम्भश्रृंगारान्तर्भुक्तत्वम्, यदा चानुनयविनयादिकं सोढुं न भवत्यत्यन्तं मानो, न तदा तदन्तर्गतत्वमपितु तदा संभोगश्रृंङगारस्य सञ्चारी भावत्वमेव परिकल्पनीयं–यथा––

"प्रियतमे गाढ़परिरम्भसमुत्सुके समीपमागते चिरान्मानं विदधतयाः मानिन्याः मानः पीडनभयादुरसो निर्ययौ११ ।"

अत्र न कथञ्चिन्मानमपनुनोद नायको नायिकायाः । चिरायमानमाधृतवतीं मानिनीं भुजङगः परिषस्वजे, तेन तदीयो मानः क्षणमपि न तास्थवान्, द्रुतं पलाय्य मानिनीं विगतमानामकरोत् । अथ च "भ्रूभङ्गे रचितेऽपि–––मानस्य तस्मिन् जने" इत्यादिपद्येषु मानः संभोगस्य सञ्चारीभावत्वं परिगृह्यते समालोचकैः । एकमेव दर्पणकृदुद्धृतं पद्यमपरमुदाहरामि । "अर्थात्:–१२ हृदयेन सुरताभिलाषुकावपि नायिकानायकौ नैजं गरिमाणं रिरक्षयिषू आस्यं विपास्य योगपद्येन तल्पे शयानो कटाक्षनिक्षेपमिषेण यदैव मिथ आलुलोचतुः तदैव व्यपागमत् उभयोर्मानः सरभसञ्चाजयतरपरस्परं समासञ्चनम्" इत्यादिस्थलेषु विनैवानुनयमपससार मानः, अतश्चात्रापि सम्भोगसञ्चारित्वमेतस्याभ्युपगन्तव्यम् ।

मानोऽयं समुपलालभ्यते ललनास्वेवेतिप्रागवोचाम् किन्तु नृषु न बोभवीति नास्माकं हृदयम् । पुंसामपि मानो मनोमुग्धकरो भवतीति नात्र चित्रम् । एकं भवभूतिपद्यमेवोद्धरामः–१३

"लताभवने निषण्णो रामः ललनाकुलतिलकललामांरामामभिरामां सीतां प्रतीक्षणपरायणो बभूव, किन्तु सा गोदावर्य्याः सैकते पुलिने कलहंसैरनुक्रीडमानाचिराय न राममाजगाम । व्यपगते कतिचित् क्षणे निवृत्ता सीता रामं निर्विष्णं निर्वर्ण्य कुन्दकुड्मलनिर्भरङ्गुलिकोरकैः परिकलितप्रणामाञ्जलिः नतिविलसितेन राममानपमनिन्ये" ।

नायकगतं मानमुदाजहार दर्पणकारः । चिरायन्तीं प्रेयसीमासमीक्ष्य वासभवने प्रतीक्षाच्छन्नो नायको मानमादधार । समुपसर्पन्तीञ्च तामवगम्य निद्राव्याजनिमीलिताक्षो बभूव नायकः । स्वकीयचुम्बनसञ्जातपुलकं प्रणयिनमनूचिवान्––आर्यं१४ अलीकमीलितलोललोचन ! स्तोकमपसर, अहमपि शिशयिषामि, अन्येद्यौ न त्वां कोपायिष्यामि विलम्बात् । अद्यतनो विलम्बो मर्षणीयः, अनुमन्तव्या चाहं सहशयनाय । इत्यादिर्निरवधिर्मानसन्दर्भो नृषु समासाद्यते । (क्रमशः)

११–
गाढ़ालिङ्गानरभसोद्यते दयिते लघुसमपस यति ।
मनस्विन्याः मानः पीडनभीत इव हृदयात् ।।

१२–
एकस्मिन् शयने पराङमुखतयावीतोत्तरं ताम्यतो–
रन्योन्यस्य हृदिस्थितेऽप्यनुनयं संरक्षतोर्गौरवम् ।
दम्पत्योः शनकैरपाङगवलनान्मिश्रीभवच्चक्षुषो–
र्भग्नो मानकलिः सहासरभसव्यासवतकण्ठग्रहः ।।
(सा०द०तृ०परि०) ।।

१३–
अस्मिन्नेव लतागृहे त्वमभवत्सन्मार्गदत्तेक्षणः–
सा हंसैः कृतकौतुका चिरमभूद् गोदावरीसैकते ।।
आयान्त्या परिदुर्मनायितमिव त्वां वीक्ष्य वद्धस्तया
कातर्यादरविन्दकुड्मलनिभः मुग्धः प्रणामाञ्जलिः।।
(भवभूति उत्तररामचरित)

१४–
अलीक प्रसुप्तमिथ्या निमीलिताक्ष,
देहि सुभग ममावकाशम् ।
गण्डचुम्बनपुलकिताङ्ग न पुनश्चिरयिष्यामि ।।
सा०द०तृ०प०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ प्रकाशाभ्युदयो नाम

श्री डा० मंगलदेव शास्त्री

सतां तत्पावनं वृत्तम्

कर्तव्यभावनापूतं दम्भाहङ्कारवर्जितम् ।
धर्म्यमाचरणं पुण्यं सर्वभूतहितावहम् ।।३५।।
ज्ञानं यद् वस्तुजातस्य वस्तुतो मूल्यबोधकम् ।
आत्मनोऽनात्मनश्चापि भेदस्य प्रतिपादकम् ।।३६।।
स्वार्थबुद्ध्या न संपृक्ता हृदयाद्या प्रवर्तते ।
अद्वैतशालिनी भक्तिरयश्चुम्बकयोरिव ।।३७।।
अहिंसा परमो धर्मः सर्वभूतहितावहा ।
व्यक्तित्वभावना यस्यां सम्मानं लभतेऽखिला।।३८।।
स्नेहविश्वासयोर्धाम ह्यन्योन्यस्य कृते पुनः ।
कष्टं सहिष्णु यन्मैत्र्यं तुल्यं च सुखदुःखयोः ।।३९।।
सतां तत्पावनं वृत्तं भूमण्डलमिदं यतः ।
दिव्यलोकायते नूनं सोऽयं मे निधिरव्ययः ।।४०।।

चित्तस्य तादृशं स्वास्थ्यम्

आधिव्याधिसमुद्वेगआलम्बनमनुत्तमम् ।
विश्वासाश्वासयोर्हानौ मन संधारणं च यत् ।।४१।।
कृतघ्नता पिशाच्या वा मित्रद्रोहस्य रक्षसः ।
स्वार्थस्य दुष्टवृत्तेर्वा घाते त्राणाय यन्मतम् ।।४२।।
प्रलोभनस्थितौ यद्वा वैफल्ये समुपस्थिते ।
इष्टार्थस्य प्रहाणे वा परमं यत्परायणम् ।।४३।।
अभिमानेन दर्पेण पक्षपातेन वा पुनः ।
मूढानां दुष्टबुद्धीनां मार्गान्न च्यवते च यत् ।।४४।।
यदाश्रयेण तिष्ठन्तः सन्तश्चारित्रभूषणाः ।
निर्विकारा निरातङ्काः संतरन्त्यापदापगाः ।।४५।।
सर्वद्वन्द्वप्रसहने समर्थं निश्चलं दृढम् ।
चित्तस्य तादृशं स्वास्थ्यं सोऽयं मे निधिरव्ययः ।।४६

सौम्या मनःस्थितिः

अभिमानेन दम्भेन दर्पेण परिवर्जिता ।
शान्ता न मायया स्पृष्टा संयमेन पुरस्कृता ।।४७।।
श्रद्धया च विवेकेन सत्यमार्गानुसारिणी ।
लोककल्याणबुद्ध्यैव ज्ञानोपार्जनकारिणी ।।४८।।
हितबुद्ध्या समस्तानां प्राणिनां या समन्विता ।
उत्तरोत्तरमुत्कृष्ट-चारित्र्यपरिपोषिणी ।।४९।।
नैराश्येन विनिर्मुक्ता यासौ सौम्या मनःस्थितिः ।
सन्तुष्टा च प्रसन्ना च सोऽयं मे निधिरव्ययः ।।५०।।

अनन्ता प्रभा

अनन्ता या प्रभा नित्या सर्वस्यान्तः प्रकाशते ।
जगदेतत्समस्तं तु यस्या अंशेन भासते ।।५१।।
सौम्या- सौम्यतराशेषसौम्येभ्यस्त्वतिसुन्दरी ।
स्रोतस्विनी सदानन्दवारिणा चिन्मयी च या ।।५२।।
कृतकृत्या जितात्मनो यस्यां मज्जन्ति योगिनः ।
निर्धूतकल्मषा नूनं सोऽयं मे निधिरव्ययः ।।५३।।

प्रेमकारुण्ययोर्धाम

प्राणिनां दुःखतप्तानां सततं दुःखनाशने ।
रतानां यत्सतां चित्ते प्रेमरूपेण भासते ।।५४।।
सत्या ुसन्धानपरा लोकानां हितकाम्यया ।
सत्यरूपेण यन्नित्यं ज्ञानिनः पर्युपासते ।।५५।।
उद्वेगस्यावसादस्याशान्तेश्चित्तस्य धीमताम् ।
प्रतीकारार्थमुत्कृष्टममोघं साधनं च यत् ।।५६।।
सर्वप्रकाशकं तत्त्वं नित्यं विश्वनियन्तृ यत् ।
प्रेमकारुण्ययोर्धाम सोऽयं मे निधिरव्ययः ।।५७।।

(जीवनज्योतिः ११।३५-५७)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्पदं मे प्रकाशताम्

सद्भावनाप्रसूनैर्यद् वासितं सुमनोहरम् ।
सर्वलोकसमाकर्षि तत्पदं मे प्रकाशताम् ।।१३७।।
नैराश्यमन्धतमसं यतः सर्वं निवर्तते ।
आशाप्रकाशविच्छिन्नं तत्पदं मे प्रकाशताम् ।।१३८।।
सेवितं सततं सद्भिः सूरिभिर्गतमत्सरैः ।
सदाचारपरैः शुद्धैस्तत्पदं मे प्रकाशताम् ।।१३९।।
सति दुःखेऽप्यनुद्विग्नमादर्शमनु निश्चितम् ।
उत्तरोत्तरमुत्कर्षि तत्पदं मे प्रकाशताम् ।।१४०।।
सत्यानुसन्धानपरा लोककल्याणसेतवः ।
आश्रित्य यत्स्थिता धीरास्तत्पदं मे प्रकाशताम्।१४१
विषादेनावसादेन निर्मुक्तं मुक्तसंशयम् ।
कर्तव्यपथमारूढं तत्पदं मे प्रकाशताम् ।।१४२।।
श्रमेण तपसा नित्यं संयमेन समन्वितम् ।
विनयेनापि संजुष्टं तत्पदं मे प्रकाशताम् ।।१४३।।
येनेदं मधुमद्विश्वं स्वयं यन्मधुसत्तमम् ।
मधु यन्मधुविद्यायास्तत्पदं मे प्रकाशताम् ।।१४४।।
प्रेम्णा स्नेहेन दिव्येन कारुण्येनार्जवेन च ।
पृथ्वीस्वर्गायते येन तत्पदं मे प्रकाशताम् ।।१४५।।
भाषासीमा अतिक्रम्य स्वरूपेणैव संस्थितम् ।
यदेतच्छाश्वतं तथ्यं तत्पदं मे प्रकाशताम् ।।१४६।।
तत्तन्नामभिराख्यातं विभिन्नैः सांप्रदायिकैः ।
वस्तुतस्तैरसंस्पृष्टं तत्पदं मे प्रकाशताम् ।।१४७।।
मोहेन तमसा हीनमानन्दरसनिर्भरम् ।
दिव्येन ज्योतिषा दीप्तं तत्पदं मे प्रकाशताम् ।।१४८।
यत्र स्थिता महात्मानस्तत्त्वमव्ययमद्वयम् ।
पश्यन्त्यलौकिकं दिव्यं तत्पदं मे प्रकाशताम् ।।१४९।

जीवनज्योतिः १६।१३७-१४९)

जीवनस्य महती परीक्षा

पूर्वोक्तामवर्णनीयामध्यात्मजीवनस्य शान्तिमयीं दिव्यामवस्थामनुभवतो मम जीवनस्य महत्याः परीक्षाया अवसर उपस्थास्यत इति नैव कदाचिच्चिन्तितमासीत् ।

परं सर्वथा सत्यमेतद् यज्जगति जन्तूनां सहसैव विषमावस्थाः समापतन्तीति !

तथा च विविधसंघर्षबहुलायां मम जीवनयात्रायां सहधर्मचारिणी, जीवनस्योत्तरोत्तरविकासे सततं प्रवर्धमानप्रगतेरेकमात्रमधिष्ठात्री देवतेव, सहजस्नेहनिर्भरहृदया मम प्राणसमा श्रीमती सावित्रीदेवी सर्वानपि कुटुम्बिनोऽन्यांश्च प्रियजनान् शोकविह्वलान् विदधती माघशुक्ल६,२०२५ (वै०) तिथौ (==२३।१।१९६९ ई० दिनाँके) प्रातः प्रशान्तमुखमण्डला स्वीयं दिव्यलोकं प्रस्थिता ।

शमयित्री कुदृष्टीनां सन्मार्गपरिपन्थिनाम् ।
शान्ता न मायया स्पृष्टा दर्पेण परिवर्जिता ।।१।।
स्नेहकारुण्ययोर्मूर्त्तिः श्रद्धाविश्वासरूपिणी ।
नित्यं समाहिता सौम्या सर्वकल्याणकाम्यया ।।२।।
विष्णोः शिवस्य रूपेण दुर्गादेव्यास्तथैव च ।
अभजत्पुरुरूपं तमिन्द्रं या परमेश्वरम् ।।३।।
सत्यासत्यपरीक्षायां कार्याकार्यविनिश्चये ।
अवसादप्रवृत्तौ वा या सन्मार्गमदर्शयत् ।।४।।
गृहे लक्ष्म्याः सरस्वत्याः सहवासैककारणम् ।
नाम्ना गुणैश्च सावित्री प्रेरणामददात् शुभाम् ।।५।।

शुक्लाम्बरधरा शुभ्रा शुभ्रभावैः समुज्ज्वला ।
देवीदिव्यतनुर्भूत्वा स्वर्गस्था ननु राजते।।६।।

उत्तरोत्तरमुत्कर्षमार्गगावेकप्रत्ययौ ।
स्त्रीपुंसौ नूनमद्वैतमश्नुवाते न संशयः ।।७।।
विश्वासेनाश्वस्तो विषमावस्थां गतोऽप्येवम् ।
लक्ष्यैकदत्तचित्तो जीवनसंध्यामुपासेऽहम् ।।८।।

उपसंहारः

प्रकाशाभ्युदयो नाम प्रकरणमिदमात्मवृत्तीयम् ।
उद्बोधनाय रचितं चिराय निद्राप्रसुप्तानाम् ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्येदं प्रथमत्वेन यावत्संस्कृतवाङ्मये ।
तत्समुत्थाननिरताः सन्तस्तोषमवाप्नुयुः ।।
एकाशीतितमे वर्षे प्रारब्धे जीवनस्य मे ।
समाप्तिमगमद्ग्रन्थः प्रकाशाभ्युदयः खलु ।।
वस्तूनां संग्रहे तत्र तथा कालस्य निर्णये ।
परिश्रमो महान् यस्तं विजानन्तु विपश्चितः ।।
देववाणीविदां सोऽयं देववाण्यास्तथैव च ।
भूतये भवतान्नित्यं शन्तातिं तनुताद् भृशम् ।।
सांमनस्येन गच्छन्तोऽविद्वेषेण परस्परम् ।१
राष्ट्रस्य नवनिर्माणे उद्युक्ताः शुद्धभावनाः ।।
विद्याया निरवद्यायाश्चारित्र्यस्यामलस्य च ।
अर्जने रक्षणे दक्षा जायन्तां राष्ट्रवासिनः ।।
'चक्षुर्देवहितं तद्' यः श्रुतिशब्दैरसंशयम् ।२
एवं वर्णयितुं योग्यः प्रकाशाभ्युदयोऽनघः ।।
सोऽयं प्रकाशाभ्युदयः समन्तात्
समुज्ज्वलः सर्वहितानुबन्धी ।
देदीप्यमानस्तमसां विभेत्ता
संवर्धयेद् भारत भाग्यलक्ष्मीम् ।

इतिविद्यामार्तण्ड श्री मङ्गलदेवशास्त्रिणा संस्कृतवाङ्मय इदं प्रथमत्वेन विरचिते प्रकाशाभ्युदयनाम्नि आत्मवृत्तान्तीय प्रकरण एकादश उच्छ्वासः ।

---

१. तु० "सहृदयं सांमनस्यमविद्वेषं कृणोमि वः।" (अथर्व० ३।३०।१)

२. तु० "तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्" (यजु० ३६।२४) । चक्षुर्जगतां नेत्रभूतम् । देवेभ्यो विद्वद्भ्यो हितं हितार्थसंपादकमित्यर्थः ।

सुरभारती–सोमैया संस्कृत केन्द्र

मुम्बापुरीस्थाः संस्कृतानुरागिणः श्रीमान्कर्मसिंह जे. सोमैयाश्रेष्ठिनः तथा तेषां अभिजातकुलशीलोपपन्नाः अखिल भारतीय उत्पादक संघटनायाः माननीयाः अध्यक्षाः श्रीभक्तः शान्तिलाल क. सोमैयाश्रेष्ठिनः एतेषां दातृत्वशीलत्वेन समुपपन्नः "सोमैया-विश्वस्तनिधिः" । सत्सु अपि विविधेषु अन्येषु कार्येषु 'सुरभारती-सोमैया संस्कृत केन्द्राणि' निधिसञ्चालितानि महाराष्ट्र-गोवा-प्रदेशयोः अधुना पञ्चाशत्संख्याकाणि संस्थापितानि सन्ति । प्रतिमासं एकवार नियततिथौ नियतविषयमनुसृत्य व्याख्यान-चर्चा-युक्तः कार्यक्रमः गीर्वाणवाण्यामेव भवति । तत्र प्रतिकेन्द्रं प्रतिसंवत्सरं केन्द्रकार्यदर्शितां मानधनं, केन्द्रसंचालकसंस्थायाः कृते ग्रंथदानं तथा डाकव्ययकृते विश्वस्तनिधिद्वारा अनुदानं दीयते । अपरं च पठन-लेखन-वाचन-भाषण-अभिनय-समस्यापूरणादिकाः अनेकाः स्पर्धाः आयोजयितव्याः । तासां मध्ये एका स्पर्धा विश्वस्तनिधिना पारितोषिकार्हा संमता भवति । केन्द्रेण संस्कृतपरीक्षाणां कार्यं संचाल्य गीताजयन्ति संस्कृतदिन-व्यासपूजादयः दिनविशेषाः अपि संयोजनीयाः भवन्ति ।

महाराष्ट्र-गोवाप्रदेशयोः प्रसृता एषा योजना अन्येषु अपि प्रदेशेषु विस्तारतां यास्यति आगामिनि काले अचिरादेव इति दृढविश्वासः वर्तते ।

संकेतस्थानम्–श्री कार्यदर्शी, 'सुरभारती-सोमैया–संस्कृत–केन्द्र' गोदावरी शुगर मिल्स, फाझलमाय बिल्डिंग, म० गांधी पथः, मुंबई, १.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्निमन्त्रमाला

(श्री अरविन्दप्रणीत 'Hymns to the Mystic Fire' ग्रन्थस्य धारावाहिकोऽनुवादः,
अनुवादकोपज्ञेन भावार्थेन तदुपज्ञनानाविधटिप्पणीभिश्च संवलितः)

अनु० श्री जगन्नाथो वेदालंकारः

ऋ. १. १३

मेधातिथिः काण्वः । अग्निः । गायत्री ।

सुसमिद्धो न आ वह देवाँ अग्ने हविष्मते ।
होतः पावक यक्षि च ॥

[1]सु-समिद्धः [2]नः [3]आ [4]वह [5]देवान् [6]अग्ने [7]हविष्मते । [8]होतरिति [9]पावक [10]यक्षि [11]च ॥

[6]O fire [1]perfectly kindled [3,4]bear [5]the gods [2]to him (to me) [7]who has the offerings, [9]O thou who purifiest ! [8]thou summoner ! [10]sacrifice to the gods.

[6]हे अग्निदेव ! [1]सम्यक् सम्पूर्णतया च प्रदीप्तस्त्वं [7]प्रभूतहव्यशालिने [2]मह्यं [5]दवान् [3,4]आनय [8]हे आह्वातः ! [9]शोधयितः ! [10]यज [11]च [5]देवान् प्रति ।

भावार्थः

हे तपोदेव ! सिद्धहव्यसमर्पणेन संप्रदीप्तस्त्वं हविष्पतयेऽन्तर्यज्ञकर्त्रे देवान् आवह । हे पवितः ! आह्वानकारक ! यजस्व देवान् ।

व्याकरणम्

[2]नः । वचनव्यत्ययः ।

[5]देवान् । 'देवान्' इति पदं 'देवान् आवह,' 'देवान् यक्षि' इत्येवं द्विरन्वीयते ।

[8]होतरिति । द्र. १ : १ . १[7] । सम्बुद्धौ रूपम् ।

[10]यक्षि । यजतेर्लोण्मध्यमपुरुषैकवचने छान्दसं रूपम् ।

मधुमन्तं तनूनपाद् यज्ञं देवेषु नः कवे ।
अद्या कृणुहि वीतये ॥

[1]मधु-मन्तम् [2]तनू-नपात् [3]यज्ञम् [4]देवेषु [5]नः [6]कवे । [7]अद्य [8]कृणुहि [9]वीतये ॥

[2]O son of the body ! [7]now [8]make [5]the (our) [3]sacrifice [1]honied [4]for the gods (or [1]full of honey [4]among the gods) [9]for their enjoyments [6]O seer.

[2]हे यजमानस्य तन्वां जात, तत्तनुज ! [6]हे द्रष्टः अग्ने ! [7]अद्य [5]अस्माकं [3]यज्ञं [4]देवनिमित्तं देवानां मध्ये वा [9]तेषामुपभोगार्थं, तेषामानन्दप्राप्तये इत्यर्थः [1]मधुमयं [8]कुरु ।

भावार्थः

तदीयतन्वां प्रादुर्भूतमन्तरग्निं यजमानः प्रार्थयते—हे अस्मद्देहोद्भूत तपोऽग्ने ! हे सर्वार्थदर्शिन् कवे ! सम्प्रति अस्माकं यज्ञमानन्दरस—(मधु)-संप्लुतं कुरु येन अस्मासु देवाः प्रादुर्भवन्तु, आस्वादयन्तु च तदानन्दमधु ।

विवृतिः

[9]वीतये । गतिव्याप्त्याद्यर्थकाद् 'वी' धातोर्व्युत्पन्नो 'वीति'-शब्दो देवानां गतिम्, अस्मासु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आगतिं, सम्प्राप्तिं, प्रजनं प्रादुर्भावं वा, उपभोगं (खादनं) चाह ।

[7]अद्य । प्रकृतमन्त्रे श्री अरविन्दः शब्दमिमं now (अधुना) इत्येवमनुवदति, वर्तमानतामात्र-वाचकत्वादस्य । तथा चाह सायणः—"अस्मिन् काल इत्यर्थे द्य-प्रत्ययान्तो निपातितः ।" 'अधुना'-कालोऽपि अद्यत्वेन तथोच्यते ।

व्याकरणम्

[2]तनु-नपात् । नपात् इति शब्दोऽपत्यनामसु पठितः (निघः.२.२) । नपादित्यननन्तराया: प्रजाया नामधेयम् (निरु.८.२.६) । तन्वाः नपात् अपत्यमिति तनूनपात् । तनूनपात् 'अग्नि-रिति 'शाकपूणिः' (निरु.८.२.६) ।

[7]अद्य । अस्मिन् अहनि इति अद्य । 'सद्यः-परुत्परार्यैषमः— परेद्यव्यद्य०' (पा.५.३.२२) इत्यनेन इदमोऽश्भावो द्यप्रत्ययश्च निपात्येते । अस्य अद्येति पदस्य संहितायाम् 'अन्येषामपि दृश्यते' इत्यनेन दीर्घत्वं साधनीयम् ।

[8]कृणुहि । कृवि हिंसाकरणयोश्च (चकारा-द्गतौ) इत्यस्मात् लोटः सिप् । सेर्हिः । उतश्च प्रत्ययाच्छन्दो वा वचनम् (काशिका६.४.१०६) इति वार्तिकबलाद् हेर्लुक् न भवति ।

नराशंसमिह प्रियमस्मिन् यज्ञ उप ह्वये । मधुजिह्वं हविष्कृतम् ॥

[1]नराशंसम् [2]इह [3]प्रियम् [4]अस्मिन् [5]यज्ञे [6]उप [7]ह्वये [8]मधु-जिह्वम् [9]हविः-कृतम् ॥

Him ([1]who voices the godhead) [3]the beloved [6,7]I call [2]hither [4]to this [5]sacrifice [9]he who creates the offerings [8]possessed of honied tounge.

[3]प्रीत्यास्पदं, [9]हविःस्रष्टारं [8]मधुमयजिह्वा-युक्तं, [1]नराणां देवानां प्रशंसकम् अतश्च 'नराशंस' इति अन्वर्थनामानमग्निम् [2]अत्र अन्तर्वेद्यां प्रवर्त-माने [4]अस्मिन् अस्मदीये [5]यज्ञे [6,7]आह्वयामि ।

भावार्थः

अस्मिन मन्त्रे 'नराशंस' नामा अग्निरुपहूतो यज्ञस्योर्ध्वतरगमनसिद्धये । कोऽयं नराशंसः ? "नराशंसं नृशस्तं नृप्रणेत्रम्" इति मैत्रायणी-संहिता (४ १३.२) । नराणां देवानां शंसः प्रशंसकोऽसौ यजमानं प्रति देवान् प्रशस्य देवकामं तं संप्रेरयति देवावाप्तये, नृभिः अस्मद्देहान्तः-स्थैरिन्द्रियादिभिर्देवैः शस्तः प्रशस्तः स्तुतो वा भवति, अथवाऽस्माकं देहे पिहितानि गूढान्तर्धाम-द्वाराण्युद्घाट्य नॄन् देवान् शंसति, प्रणयति, प्रका-शयति, अभिव्यनक्ति वा इति हेतोः स नराशंसो-ऽभिधीयते ।

नराशंसोऽग्निरन्तर्याजिकस्य देवगणस्य च प्रियः प्रीणनशीलश्च । मधुमयी तस्य जिह्वा, यतो हि स तया (जिह्वयाऽन्तर्ज्वालया वा) देवताह्वाने समर्थः । अथवा हितरमणीयामृतवाग्वर्षकत्वात् स मधुजिह्व उच्यते । यजमानेनार्पणीयं हव्यं तदन्त-रुद्भूतोऽग्निरेव सिद्धं सफलं च करोतीति स हवि-ष्कृत् (हव्यनिष्पादकः) निगद्यते । एवम्भूतं तम-ग्निदेवमस्मिन् यज्ञ आह्वयति यजमानः ।

व्याकरणम्

[1]नराशंसम् । नराणां शंस इति नराशंसः इत्यादयो व्युत्पत्तयो भावार्थे द्रष्टव्याः । 'अन्येषा-मपि दृश्यते' इति दीर्घत्वम्, यद्वा 'उभे वनस्पत्या-दिषु युगपत्' इति सूत्रे 'नराशंस' पदस्य वनस्पत्या-दिगणे पाठात् पूर्वपदस्य दीर्घः ।

[8]मधु-जिह्वम् । मधुयुक्ता जिह्वा यस्य तम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[9]हविः–कृतम् । हवींषि करोतीति तं तथाभूतम् ।

अग्ने सुखतमे रथे देवाँ ईडित आ वह ।
असि होता मनुर्हितः ॥

[1]अग्ने [2]सुख–तमे [3]रथे [4]देवान् [5]इडितः [6]आ [7]वह । [8]असि [9]होता [10]मनुः–हितः ।

[1]O fire ! [5]thou art adored [6,7]bring [4]here the gods [2]in thy happiest [3]car; (for) [8]thou art [9]the summoner [10]established by man.

[1]हे अग्ने ! [4]संस्तुतः अधीष्टो वा त्वमात्मनः [2]अत्यन्तमङ्गलकरे, [3]तीव्रगतिके याने, ईदृशयानेन इत्यर्थः अत्र [4]देवान् [6,7]आनय । त्वं हि [10]मनुष्येण दृढनिहितः स्थापितो वा [9]देवताह्वानकर्ता [8]असि ।

भावार्थः

हे अग्निदेव ! संस्तुतोऽभीप्सितोऽधीष्टश्च त्वं स्वीये सुखतमे रथे देवान् उपवेश्य इह आनय, यतस्त्वं मनुष्येण, मन्त्रा (मननशीलेन) अन्तर्याजकेन तदुद्गीतमन्त्रेण वा दृढं स्थापितोऽसि । एवं प्रतिष्ठापितश्च त्वं देवाह्वायको होता भवसि । स्वकीयं देवाह्वानधर्मं निरुह्य देवानिहानय मम हृदयवेदौ इति यजमानः प्रार्थयते ।

व्याकरणम्

[3]रथे । रथे इत्यत्र तृतीयार्थे सप्तमी ।

[5]ईडितः । 'ईड' स्तुतौ इत्यस्माद् वर्तमानेऽर्थे कर्मणि क्तः (पा ३.२ १८८,३.४.७०) । इडागमः ।

[10]मनुः–हितः । मन्यते इति मनुर्मन्ता मानवः, यद्वा मन्यतेऽनेनेति मनु र्मन्त्रः । मन ज्ञाने इत्यस्मादौणादिक उप्रत्ययः । मनुना हित इति विग्रहे 'सुपां सुलुकः' इत्यादिना तृतीयायाः सु इत्यादेशः । तस्य रुः । लुगभावश्छान्दसः ।

स्तृणीत बर्हिरानुषग् घृतपृष्ठं मनीषिणः ।
यत्रामृतस्य चक्षणम् ॥

[1]स्तृणीत [2]बर्हिः [3]आनुषक् [4]घृत–पृष्ठम् [5]मनीषिणः । [6]यत्र [7]अमृतस्य [8]चक्षणम् ।

[5]O Thinkers ! [1]spread you [2]the holy seat [3]continuous and true in order [4]sprinkled with clear offerings (of calarified butter) [6]to where [8]is the vision [7]of immortality.

[5]मननशीला मनस्विनः [2]पवित्रासनम् [1]आस्तीर्णं कुरुत देवानामुपवेशनार्थम् । कीदृशमासनम् ? सत्येन [3]अनुषक्तम् सत्यमयविधानयुक्तम् [4]स्वकीये उपरिस्तरे मानसदीप्तिरूपघृतेन युक्तम्, मनोबुद्ध्योः प्रकाशाहुतिभिः प्रोक्षितं, [6]यस्मिन् च पवित्रहृदयासने [7]अमरत्वस्य [8]साक्षात्कारः भवति तथाभूतम् ।

भावार्थः

हे मनीषिणः ! यस्मिन् धामनि अमृतत्वस्य दर्शनं भवति तद् अभिलक्ष्य, तस्य प्राप्तये यूयं पवित्रं हृदयासनमास्तृणीत, येन देवास्तत्र पदार्पणं कुर्वन्तु विराजन्तु वा । आस्तीर्यमाणं तद् वो हृदयं सत्येन सह सततसंपृक्तमृतविधानानुकूलञ्च स्यादित्यवधेयम्, स्याच्च तत् मनोबुद्ध्योर्घृतेन, निर्मलालोकेन निषिक्तम् ।

व्याकरणम्

[3]आनुषक् । आ समन्तात् अनु अनुक्रमेण सजतीत्यानुषक् । आङनुपूर्वात् षञ्ज सङ्गे इत्यस्मात् क्विप् ।

[4]घृत–पृष्ठम् । घृत-युक्तं पृष्ठमुपरिभागो यस्य तत्, घृतं पृष्ठे यस्य तत् इति वा ।

[7]अमृतस्य । मरणमेव मृतम् । मृङ प्राणत्यागे इत्यस्माद् भावे क्तः (पा. ३ ३.११४) । न मृतमित्यमृतम् । नञ् तत्पुरुषः । यद्वा, नास्ति मृतं मरणं यस्मिन् अवस्था (भूमिका) विशेषे तदमृतम् अमृतत्वमित्यर्थः । नञ् बहुव्रीहिः । षष्ठ्येकवचनम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋ. १. ३६.

कण्वो घौरः । अग्निः, १३-१४ यूपो वा ।

प्रगाथः = अयुजो बृहत्यः तृतीयपादस्य द्वादशाक्षरत्वात् । युजः सतोबृहत्यः प्रथम-तृतीययोः पादयोर्द्वादशाक्षरत्वात् ।

प्र वो यह्वं पुरूणां विशां देवयतीनाम् । अग्निं सूक्तेभिर्वचोभिरीमहे यं सीमिदन्य ईडते ॥

[1]प्र [2]वः [3]यह्वम् [4]पुरूणाम् [5]विशाम् [6]देव-यतीनाम् । [7]अग्निम् [8]सु-उक्तेभिः [9]वचः-भिः [10]ईमहे [11]यम् [12]सीम् [13]इत् [14]अन्ये [15]ईडते ॥

[3]The Master [4]of many [5]peoples [6]who labour towards the godhead, [1,10]we seek [2]for you [9]with words [8]of perfect expression, [7]Agni [11]whom [14]others [13]also [12]everywhere [15]desire.

[6]देवान् देवत्वं वा कामयमानानां [4]बहूनां [5]प्रजानां [3]प्रभुं [2]त्वाम् [7]अग्निं वयं [8]पूर्णतयाऽभिव्यञ्जकैः [9]शब्दैः [1,10]प्रेप्सामः, [11]यमग्निम् [14]अन्ये [13]अपि सर्वतः [12]सर्वत्र, [15]अभिकाङ्क्षन्ति, स्पृहयन्ति ।

भावार्थः

अस्मिन् मन्त्रे स महतो महीयान् प्रभुरग्निदेव एव यह्वशब्देन विशेषितः, यातश्च हूतश्च भवति इति सतः (यात+हूत=या+ह्वा=यह्व) । स एव सर्वैः उपयायते शरणत्वेन, आहूयते च सर्वकामपूरकत्वेन । ये बहवोऽन्तर्यजमाना देवत्वं प्राप्तुकामाः, देवान् प्राप्तुं प्रयत्नपरास्तेषां सर्वेषां प्रभुरसौ महान् अग्निदेव, यस्मै खल्वन्येऽप्ययाजकाः प्राकृतजनाः स्पृहयन्ति सामान्यतया । तं सर्वैः सर्वत्र काम्यमानमग्निं वयं पूर्णाभिव्यक्तिकरैः स्तोत्रैः प्रेप्सामः प्रार्थयामश्च प्रादुर्भावार्थमस्मास्विति भावः ।

व्याकरणम्

[2]वः । त्वाम् इति वक्तव्ये वचनव्यत्ययेन 'वः' इति बहुवचनमुक्तम् । यद्वा पुरूणां बहूनां विशां प्रजारूपाणां वः युष्माकं मनुष्याणामित्यर्थः प्रभुम् अग्निम् इत्येवं व्याख्याने कृते वचनव्यत्ययो नापेक्षितः स्यात् ।

[3]यह्वम् । यह्वः इति पदं महन्नामसु पठितं निघण्टौ (३.३.१३) । यह्व इति महतो नामधेयम्, यातश्च हूतश्च भवति इति निरुक्तम् (८:२ ८) । ।

[6]देव-यतीनाम् । देवानात्मन इच्छन्तीति देवयन्ति । सुप आत्मनः क्यच् । क्यजन्तात् लटः शतरि ङीपि च छान्दसं रूपम् ।

[10]ईमहे । लुग्विकरण 'ई' धातु र्वेदे गतौ याच्ञायां च दृश्यते (द्र. निघ ३.१९)। प्रपूर्वकश्चायं प्रेप्सागवेषणार्थको बोध्यः । अस्माल्लडुत्तमपुरुषबहुवचनम् ।

[14]अन्ये । अनिति संवृणोत्यात्मानं परस्मादिति अन्यः । अन प्राणने इत्यस्मादादादिकात् 'अघ्न्यादयश्च' (उणा ४ १११) इत्यनेन यगन्तो निपातनीयोऽयं शब्दः । ततः पुंसि प्रथमाबहुवचनम् ।

'अन्य' शब्दस्य मूलप्रकृतिः प्राणनार्थकोऽनितिरत्रसंवरणार्थको ग्राह्यो धातूनामनेकार्थत्वात् ।

[15]ईडते । 'ईड' स्तुतौ अध्येषणायां च इत्यस्माल्लटि प्रथमपुरुषबहुवचने रूपम् । द्र. १ १.१[2]

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वराज्यं सुराज्यं भवेत्सर्वदा नः

श्री आचार्य धर्मदेवो विद्यामार्तण्डः, आनन्दकुटीरम्–ज्वालापुरम्

(१)

स्वराज्यं सुराज्यं भवेदेतदर्थं
प्रयत्नः समस्तैर्जनैः संविधेयः ।
सुखं प्राप्नुयुः सर्वएवात्र लोकाः
प्रयत्नस्तथा भारतीयैर्विधेयः ॥

(२)

भवेयुः समस्ता जना देवभक्ताः
भवेयुः समे देशभक्ताः प्रशस्ताः ।
भवेयुर्मिथः सर्वएवानुरक्ताः
प्रयत्नस्तथा सर्वलोकैर्विधेयः ॥

(३)

सन्धारणीयः सकलैः स्ववेशः
प्रीत्यार्चनीयः सकलैः स्वदेशः ।
भाषा प्रयोज्या शुभभारतीया
रक्ष्या स्वकीया शुभसम्मतेयम् ॥

(४)

स्युर्धार्मिकाः सर्वजनाः प्रशस्ताः
परोपकारे सततं प्रसक्ताः ।
कृत्येऽनुरक्ता विषयेष्वसक्ताः
इत्थं प्रयत्नोऽविरतं विधेयः ॥

(५)

भवेच्चरित्रं विमलं पवित्रं
कार्यं समेषामभिनन्दनीयम् ।
नराः सदाचाररताश्च नार्यः
भ्रष्टो भवेत् कोऽपि न भारतीयः ॥

(६)

प्रसारणीया विबुधैः सुशिक्षा
निवारणीया प्रसृता कुशिक्षा ।
स्वदेशरक्षा सततं विधेया
भ्रष्टाः समस्ता विधयोऽत्र हेयाः ॥

(७)

आदर्शमुच्चं जगतस्समक्षं
संस्थापयेद् भारतमस्मदीयम् ।
अध्यात्मविज्ञानसमन्वयेन
समुन्नतः स्यात्सकलोऽपि लोकः ॥

(८)

विश्वासघातो न भवेत् कदाचिद्
मद्यादिपानं च भवेन्निषिद्धम् ।
वेदान् पठेयुः सकलाः सुभक्त्या
इत्थं भवेद राष्ट्रमिदं प्रशस्तम् ॥

(९)

पाठ्या समस्तैः सुरभारतीयं
हिन्दी स्वराष्ट्रस्य भवेत्सुभाषा ।
सर्वे प्रहृष्टाः सुखिनो जनाः स्युः
यत्नः समस्तैः सततं विधेयः ॥

(१०)

राष्ट्रं भवेत् सर्वमिदं समृद्धं
सैन्यादिशक्त्याऽन्यजनैरधृष्यम् ।
भवेत् समस्ते भुवनेऽनुकृत्यं
सन्धारितं स्यात्सकलैश्च सत्यम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैदिकसाहित्यसौदामिनी

श्री वागीश्वरो विद्यालंकारः, साहित्याचार्यः

यथा वा–

उत त्वं सख्ये स्थिरपीतमाहु-
र्नैनं हिन्वन्त्यपि वाजिनेषु ।
अधेन्वा चरति माययैष
वाचं शुश्रुवाँ अफलामपुष्पाम् ॥
ऋ०मण्ड०१०।७१।५॥

देवता-ज्ञानम् । ऋषिः- बृहस्पतिराङ्गिरसः । छन्दः– त्रिष्टुप् ।

उत त्वमिति–उत त्वम् अप्येकं विद्वांसम् । सख्ये विदुषां समाजे । अथवा निमित्तार्थे सप्तमी । तेन सख्यार्थमित्याशयः । वाक्सम्बन्धादेव विदुषां सख्यं भवति । स्थिरपीतम् गुरुरूपाद् ह्रदाद् आकण्ठं स्थिरं पीतं ज्ञानजलं ज्ञानाऽमृतं वा येन तथाविधम् आहुः । एनं च वाजिनेषु वाचामिना ईश्वरा वाग्मिन इत्यर्थ तेषु । इनः पत्यौ नृपाऽर्कयोः । इति मेदिनी । अथवा, अर्था एव वाचामीश्वरा मुख्या इत्यर्थस्तेषां कृते वाचां प्रयोगात् । तेषु वाजिनेषु सूक्ष्मार्थतत्त्वनिरूपणेषु । अन्ये अतादृशा अव्युत्पन्नाः । एनं न हिन्वन्ति नानुगच्छन्ति । विमर्शनीयेषु गढार्थेषु स यावद्दूरं गच्छति, न ते तावद्दूरं गन्तुं शक्नुवन्ति । इति व्यतिरेकालङ्कारः । यः पुनरिमां वाचम् अफलाम् अपुष्पां शुश्रुवान् तदर्थज्ञानं विना फलपुष्पविवर्जिताम् इव श्रुतवान्, स मायया बहु वाचालतया श्रोतृषु पाण्डित्यभ्रमोत्पादिकया अधेन्वा गोसदृश्याऽपि अगवा निष्फलयेत्यर्थः । अतएव छलमय्या सह इतस्ततश्चरति । धेनुर्धयतेर्धिनोतेर्वेति निरुक्ते ११.३९ श्रीयास्कः । सा न भवतीति अधेनुः१ । अदोग्ध्री कामानाम् । उक्तं हि निरुक्ते- अफला अस्मै अपुष्पा च वाग् भवति वा, किंचित्पुष्पफलेति वा । अर्थं वाचः पुष्पफलमाह । याज्ञदैवते पुष्पफले, देवताऽध्यात्मे वा । (निरु. अध्या. १।पा. ६।ख. ४) अधेन्वा इत्यत्र सादृश्यार्थे नञ् । सादृश्यं हि तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम् । वाचि पुष्पफलयो र्बाधात् तज्जन्यं ज्ञानं विदुषां समाजे तस्य शोभार्थं धनादिलाभार्थं च न भवतीति पुष्पफलपदाभ्यां व्यज्यते । मन्त्रस्योत्तरार्धे अर्थज्ञानविहीना वाग् अधेनुरिति कथनेन अर्थज्ञानयुक्ता वाग् विपुलदोहा धेनुरिवेत्युपमालङ्कारध्वनिः । इह पुष्पफलशब्दौ वाक्सम्बन्धे स्वमुख्यमर्थं सर्वथा तिरस्कृत्य कीर्तिशोभाधनलाभादिरूपमर्थान्तरं लक्षयतः । किंच स्थिरपीतम् इत्यत्र ज्ञानसम्बन्धे पीतमिति पदमपि स्वमर्थं मुखद्वारा जलादेस्तरलपदार्थस्य उदरस्थीकरणरूपं व्यापारं परित्यज्य बुद्धौ सम्यक् प्रतिष्ठापनरूपेऽर्थान्तरे परिणतम् । पीतपद-

---

१ कामान् दुग्धे विप्रकर्षत्यलक्ष्मीं,
कीर्तिं सूते, दुष्कृतं या हिनस्ति
शुद्धां शान्तां मातरं मङ्गलानां
धेनुं धीराः सूनृतां वाचमाहुः ॥
भवभूतिकृतोत्तररामचरिते ॥

तथा–

गौ र्गौः कामदुधा सम्यक्
प्रयुक्ता स्मर्यते बुधैः ।
दुष्प्रयुक्ता पुनर्गोत्वं,
प्रयोक्तुः सैव शंसति ॥ श्रीदण्डिनः काव्यादर्शे ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रयोगादिह ज्ञानस्य अनुक्तेन जलादिना उपमानोपमेयमानोऽवगम्यते ।

अपिच–

यो जागार तमृचः कामयन्ते,
यो जागार तमु सामानि यन्ति ।
यो जागार तमयं सोम आह,
तवाऽहमस्मि सख्ये न्योकाः ।।

ऋ. मण्ड. ५।४४।१४।।

देवता–विश्वेदेवाः । ऋषिः–काश्यपोऽवत्सारः । छन्दः–त्रिष्टुप् ।

यो जागारेति–यः खलु जनो जागार स्वाध्यायादिषु स्वकर्तव्यकर्मसु सर्वदा सावधानः तम् ऋचः ऋग्वेदप्रतिपादिता विषयाः कामयन्ते अनायासेनैव तच्चेतसि प्रकाशन्ते । यो जागार तम् उ तमेव सामानि यन्ति प्राप्नुवन्ति । यो जागार तमेव अयं सोमः प्रभुराह यत् सर्वेषु कार्येषु संकटेषु वा अहं तव सख्ये मित्रभावे वर्तमानः न्योकाः निश्चितम् ओको गृहम् आश्रयो वा यस्य तथाविधोऽस्मि । सदा त्वयि तव समीपे एव वर्ते । न त्वां कदाचिदप्यहं निराश्रयं मुञ्चामि । "ओक आश्रयमात्रे च मन्दिरे च नपुंसकम् ।" इति मेदिनी । इह जागारपदं निद्राक्षयरूपं स्ववाच्यार्थं सर्वथा तिरस्कृत्य सावधानरूपेऽर्थान्तरे संक्रान्तम् । ऋचां कामनाक्रियाकर्तृत्वं न संभवति तेन 'कामयन्ते' इति पदमपि बुद्धौ स्थिरतां प्राप्नुवन्तीति रूपेऽर्थान्तरे संक्रान्तम् ।

यथा वा–

कृतं मे दक्षिणे हस्ते जयो मे सव्य आहितः ।
गोजिद् भूयासमश्वजिद् धनंजयो हिरण्यजित् ।।

अथर्व० ७.५०.८।

देवता–इन्द्रः । ऋषिः–अङ्गिराः । छन्दः–अनुष्टुप् ।

कृतं मे इति– मम दक्षिणे वामेतरे क्रियाकुशले वा हस्ते कृतं कर्मसामर्थ्यं पुरुषार्थो वा तिष्ठति । मम सव्ये दक्षिणेतरे हस्ते जयः सर्वत्र साफल्यरूपः फललाभ आहितो धृतः । स्वयं मम करप्रणयीव अल्पश्रमसाध्य इत्यर्थः । इह कृतं जयश्चेतिशब्दावपि पूर्ववत् स्वमुख्यमर्थं तिरस्कृत्य अर्थान्तरं लक्षयतः । "कृतं युगेऽलमर्थे स्याद् विहिते हिंसिते त्रिषु ।" "(जयः) अग्निमन्थे ना जयन्ते, विजये च युधिष्ठिरे ।" इत्युभयत्र मेदिनी ।

यथा वा–

यदग्ने स्यामहं त्वं, त्वं वा घा स्यामहम् ।
स्युष्टे सत्या इहाऽऽशिषः ।। ऋ. ८।४४।२३

देवता–अग्निः । ऋषिः–विरूप आङ्गिरसः । छन्दः–गायत्री ।

यदग्ने–हे अग्ने । अङ्गं नयति सन्नममानः (निरुक्ते ७ १४) आत्माङ्गतां नयति निविशमानः इति भौतिकाग्निः परमात्मा वा । परमात्मा यस्याऽऽत्मनि प्रवेशं करोति तमात्मसात्करोति । तथाविध हे भगवन्! तव कृपया यदि कदाचिदहं त्वं स्याम् त्वदभिन्नस्त्वदीयभूयो धर्मविशिष्टः सच्चिदानन्दस्वरुपः स्याम् । त्वं च अहम्-मदभिन्नो भूयसा मदीयधर्मा अल्पज्ञसुखदुःखभोक्ता संसारी जीवः स्याः–संसारी जीव इव स्या इति लुप्तोपमा । तर्हि तव भक्तस्य मम विषये तवाशिषः शुभकामनाः सत्याः स्युः । भक्तानां पीडां त्वं भक्तो भूत्वैव अनुभवितुं क्षमः तदैव च तेषां पीडाप्रतीकाराय समुद्यतः स्याः । स्फुटितविपादिकः पुमानेव विपादिकावतः पुंसः पीडां वेत्ति नेतरः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र प्रथमपादगतं त्वमिति पदं मध्यमपुरुषैकवचनरूपं स्वमर्थं सर्वथा परित्यज्य सच्चिदानन्दपरमात्मरूपमन्यमर्थम्, तथा द्वितीयपादगतम् अहम् इति पदम् उत्तमपुरुषैकवचनरूपं स्वमुख्यमर्थं सुखदुःखभोक्तृ-संसारि-जीवरूपम् अन्यमेवाऽर्थं लक्षयति । तयोरतिशयश्च व्यज्यते, तस्मादिदम् लक्षणामूलस्य अत्यन्ततिरस्कृतवाच्यस्य ध्वनेरुदाहरणम् ।

एवं लक्षणामूलस्य अविवक्षितवाच्यध्वने द्वौ भेदौ निरूप्य, विवक्षितेऽपि वाच्येऽर्थे तस्मिन्नन्यनिष्ठे व्यङ्ग्यार्थपरके सति अभिधोद्भवो ध्वनिर्भवतीति (पञ्चमोन्मेषस्य तृतीयकारिकायाम्) यदुक्तं प्राक् तदधुना प्रपञ्च्यते—
अभिधामूलो ध्वनिः—

लक्ष्याऽलक्ष्यक्रमव्यङ्ग्यत्वाद् द्विभेदोऽभिधोत्थितः
लक्ष्यव्यङ्ग्यक्रमः पूर्वोऽलक्ष्यव्यङ्ग्यक्रमः परः ।५।
प्रतीयमानः क्रमशो व्यङ्ग्यार्थो यत्र लक्ष्यते
घण्टाटङ्कृत्यनुस्वानवत् स लक्ष्यक्रमो मतः ।।६।।

घण्टायां वाद्यमानायां तदीयटङ्कारात्मकप्रधानशब्दश्रवणाऽनन्तरं यथा क्रमशो मन्दमन्दतरमन्दतमा अनुस्वानझङ्कारादिपदाऽभिधा काचिदनुरणनपरम्परा सुचिरं श्रुतिगोचरीभवति तथा यस्मिन् काव्ये वाच्यार्थप्रतीत्यनन्तरं कश्चिदन्योऽपि सूक्ष्मसूक्ष्मतरसूक्ष्मतमोऽर्थः प्रतीयते स हि संलक्ष्यक्रमव्यङ्ग्याऽऽख्योऽपरो ध्वनिभेदः । 'व्यङ्ग्यार्थो यत्र लक्ष्यते०' इत्यत्र लक्ष्यत इति पदं केवलप्रतीत्यर्थकं न तु लक्षणावृत्त्या प्रतीयत इत्यभिप्रायकम् । स हि तस्य द्वितीयोऽसंलक्ष्यक्रमव्यङ्ग्यनामा भेद इत्युच्यते——

असंलक्ष्यक्रमव्यङ्ग्ये त्वाशुभावितया क्रमः
छेदवत्पद्मपत्राणां लाघवान्नैव लक्ष्यते ।।७।।

न संलक्ष्योऽनुभवगोचरो व्यङ्ग्यार्थस्य प्रतीतेः क्रमो यत्र तस्मिन् रसभावादिप्रधाने काव्यभेदे कार्यस्य रसादिप्रतीतेर्हेतुः विभावाऽनुभावादिप्रतीति एव । कार्यप्रतीतिश्च कारणप्रतीतेरव्यवहितोत्तरकालभाविनीति तत्र केनचित् क्रमेण अवश्यं भवितव्यम् । तथापि शताधिकानां शतपत्राणां सूच्या छेदे यथा लाघवात् सच्छेदक्रमो न लक्ष्यते तथाऽत्र रसादिप्रतीतौ विद्यमानोऽपि क्रमः प्रतीतेरविषयः । अतएवाऽयं ध्वनिभेदोऽसंलक्ष्यक्रमव्यङ्ग्य इत्युच्यते । अथकोऽसौ इति जिज्ञासायाम्——

रसभावादिकः सर्वोऽप्यसंलक्ष्यक्रमो ध्वनिः
अगण्योऽवान्तरैर्भेदैरेकभेदोऽभिधीयते ।।८।।

अनयोर्हि संलक्ष्यक्रमाऽसंलक्ष्यक्रमव्यङ्ग्यसंज्ञयोरभिधामूलध्वनिभेदयो द्वितीयः असंलक्ष्यक्रमव्यङ्ग्यो ध्वनिः रसभावादिरुपः । तत्र रसः शृंगारहास्यकरुणादिभेदैरनेकविधः । शृङ्गाररसस्थायिभावस्य रतेः कदाचिद् देवादिविषयत्वे तु भावः । सोऽपि देवगुरुमातृभूम्यादिगतत्वाद् भावोदयभावप्रशमभावसन्धिभावशबलत्वाच्च बहुतरविधः । एषां चैकैकोऽपि रसादिः स्वीयाऽवान्तरैर्भेदैरनन्तप्रकारकः । एवं तेषां प्रकाराणामगण्यत्वाद् यद्यपि विपश्चिद्भिः स एक भेद एवोक्तस्तथापि स बहुप्रपञ्चः । अतोऽल्पतरप्रपञ्चतया संलक्ष्यक्रमव्यङ्ग्य एव प्राङ्निरूपयितुमुचितः ।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारते भीषणभ्रष्टाचारस्य भैरवीचक्रम्

विद्याभूषण: श्रीगणेशराम शर्मा, डूंगरपुरम् (राजस्थानम्)

अद्यत्वे देशस्य प्रत्येकस्मात् कोणाद् भ्रष्टाचारस्योद्घोषो जरीजृम्भमाणो वर्तते तथा च प्रत्येकं नागरिको घोषादस्माद् दु:खितो दरीदृश्यते । भ्रष्टाचारोऽस्माकं देशस्य जनजीवनस्यैक: स्वभाव इव स्थायी संजातोऽस्तीव प्रतीयते । नैतत् सत्यमास्ते यदस्योन्मूलनाय किमपि क्रियमाणं नास्तीति परन्तु भ्रष्टाचारस्य मूलाधारो नन्वेतावान् द्रढीयानस्ति संजातो यदस्मिन् हन्यमानै: प्रहारै: किंविधोऽपि प्रभावो जायमानो न हि दृश्यते । अपि च यो हि जनो भ्रष्टाचारमपहन्तुं नियुज्यते, कियत्कालानन्तरं स: स्वयमेवापादमस्तकमस्य गर्ते पतति ।

कियदाश्चर्यस्य विषयोऽयं यदेकस्मिंस्तथाविधे देशे, यत्र धर्मस्य, नैतिकतायाश्च परश्शतानि भाषणव्याख्यानप्रवचनानि युगयुगेभ्यो निरन्तरं प्रदीयमानानि स्युर्यत्रोपदेशग्रन्थानाम् भाण्डागाराणि संभृतानि भवेयुर्यत्र च मोक्षो मुक्तिश्चैव जीवनस्य चरमं लक्ष्यं मन्यमानं स्यात्तत्रत्या नागरिका: समधिकसंख्याका भ्रष्टाचारिणो बोभूयमाना: सन्ति । अप्यस्माकं संस्कृतावुच्चस्वरेण कृतो धर्मस्य नैतिकतायाश्च जयघोषोऽस्माकं व्यावहारिकाय जीवनाय किमपि महत्त्वं नावहति ? अपि,महतो महीयसामादर्शाणामुपदेशविषया अस्माकं प्राचीनग्रन्थान् यावदथवास्माकं वाणीं यावदेव परिसीमिता: सन्ति संजाता: ? अस्माकं व्यावहारिकं जीवनं तथाविधं बोभूयमानमास्ते यत्तस्मिन्नादर्शाणाम् छायामात्रमपि न दृश्यते । तस्मादेवैकतो भूतकालस्यादर्शाणां कथास्तथापरतो वर्तमानसमये सर्वत: प्रसृतस्य भ्रष्टाचारस्य कटुसत्यं साक्षाद्दरीदृश्यते । भ्रष्टाचारोऽस्माकं देशस्यैको व्यवहारोऽस्ति संजातस्तस्मादेवास्माभिर्विषयेऽस्मिन् गाम्भीर्येण चिन्तनीयं भवति ।

भ्रष्टाचारस्य सरलसरलोऽयमेवार्थो विधीयते यदेवंविधमाचरणं, यद्देशस्य, समाजस्य, व्यक्तेश्च प्रगतौ बाधकं भवेद्, यत्तेषां हानिं कुर्यात् । एवंविधं कार्यं यत् समाजस्य, राजसत्तायाश्च नियमेभ्यो विरुद्धं भवेत् । उत्कोच-ग्रहणमथवोत्कोचप्रदानं नाम तस्मादेव भ्रष्टाचारो भवति यत्तेन राज्यस्य नियमानामुल्लङ्घनं भवति, यतस्तत्कार्यं समाजस्य मान्येभ्य आचरणेभ्यो विरुद्धमास्ते, तेन च राष्ट्रस्य प्रगतौ बाधा भवति । सेयमतीव विस्तृता व्याख्यास्ते तथा चास्या व्याख्याया अन्तर्गतं तल्लघीयसो लघीयोऽप्याचरणं,यद्धि समाजस्य वा राज्यसत्ताया हितविरुद्धं भवेदन्तर्भूतं भवति । उत्कोचग्रहणं, पक्षपातो, मिथ्याभाषणं, न्यायनिर्णये विलम्बाचरणं, अन्नपानादिषु भोग्यवस्तुषु संकरीकरणमित्यादीनि सर्वाण्यपि च कार्याणि भ्रष्टाचारस्यैवोदाहरणानि सन्ति । एवं भ्रष्टाचारस्य परिधिर्व्यापकोऽतीव विस्तृतश्च भवति ।

सर्वकारस्य शासनतन्त्रे व्याप्तस्य भ्रष्टाचारस्य अद्यत्वे बह्वधिका चर्चास्ते । अनेन सम्बद्धानि किलैतावन्त्यधिकानि कार्याणि वर्तन्ते यत्तेषां सहभावेनैकत्र युगपद्गणनां कर्तुं न सम्भवति । तथापि वयमत्रास्य कानिचिदुदाहरणानि दास्याम: । किन्तु तस्मात्पूर्वमेकस्मिंस्तथ्येऽपरस्मिन् ध्यानप्रदानमावश्यकमास्ते । तच्चास्ते भ्रष्टाचारस्य प्रमाणस्य विषय: । यदापि भ्रष्टाचाराद्विरुद्धं किमप्युच्यते, तदा तस्य विधिविधानसमर्थितानि प्रमाणान्यपेक्ष्यन्ते, यद्यपि सर्वेऽपि विश्वसन्ति यद्भ्रष्टाचारोऽबाधगत्या प्रवर्तमानोऽस्ति । स एषोऽतीवा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

जिसमें समस्त ब्रह्मचारियों, अध्यापकों व कर्मचारियों ने सोत्साह भाग लिया। कुलपति डा० सत्यकेतु जी ने श्रावणी पर्व के महत्व पर प्रकाश डाला। अनन्तर आचार्य रामनाथ जी, श्री प्रो० बुद्धदेव जी, डा० निगम जी ने प्रवचन व श्लोक पाठ किए। श्रावणी पर्व के समस्त कार्यक्रम का पेरिस में भारतीय संस्कृति के प्रचारक तथा "भोलानन्द वेदान्त संघ पेरिस" के संस्थापक श्री स्वामी श्रद्धानन्द गिरि ने फिल्मांकन किया। हम उनके आभारी हैं।

कार्य परिषद् का चुनाव

कुलसचिव डा० गंगाराम जी की सूचना के अनुसार १।८।७४ को बड़े ही उत्साहपूर्ण व उत्तेजनापूर्ण वातावरण में गुरुकुल काँगड़ी व कन्या गुरुकुल देहरादून की ओर से कार्य परिषद् के सदस्यों का चुनाव हुआ। जिसमें श्री प्रो० जयदेव जी वेदालंकार (दर्शन विभाग) तथा श्री प्रो० नारायण शर्मा जी (आँग्लभाषा विभाग) चुने गए। हम विजयी सदस्यों को पुनः बधाई देते हैं।

कृष्ण जन्माष्टमी

१० अगस्त १९७४ को वेदमन्दिर के भव्य भवन में एक विशाल सभा का समायोजन किया गया। यज्ञ आदि के पश्चात् गीता के द्वितीय अध्याय का सस्वर पाठ किया गया। तदनन्तर अनेक वक्ताओं ने श्री कृष्ण जी के दिव्य-चरित्र पर अपने विचार प्रस्तुत किए।

स्वतन्त्रता-दिवस

पन्द्रह अगस्त का पुण्य दिवस प्रति वर्ष भारतवासियों के लिए जैसे एक आजादी का महानतम प्रतीक बनकर आता है, उसी प्रकार गुरुकुलवासियों के लिए भी यह एक महान् प्रेरणादायी स्रोत बन जाता है। आजादी की लड़ाई में इस गुरुकुल का भी अपना एक अलग स्थान रहा है।

कुल में स्वतन्त्रता दिवस का कार्यक्रम बड़ा ही रोचक व प्रेरणादायक रहा। प्रातः प्रभातफेरी के साथ कार्यक्रम का प्रारम्भ होकर सायंकाल क्रीड़ा व काव्यगोष्ठी के रूप में सम्पन्न हुआ। प्रातः ९ बजे एन. सी. सी. के छात्रों ने श्री वीरेन्द्रसिंह अरोड़ा के नेतृत्व में राष्ट्रध्वज को सलामी दी। कैडिटों एवं सामान्य जनता ने प्रतिज्ञा-पत्र पढ़े व शपथ ग्रहण की। मान्य कुलपति डा० सत्यकेतु जी ने १५ अगस्त के महत्व पर अपने विचार प्रकट किए तथा कहा कि "राष्ट्रीयता और देशभक्ति" इन दोनों बातों को प्रत्येक कैडिट को अपने जीवन में ढाल लेना चाहिये। गुरुकुल काँगड़ी, भल्ला कालेज हरिद्वार तथा आनन्दमयी सेवा सदन के युवक और युवतियों ने मार्च पास्ट किया। मिलिट्री के बैंड की सुन्दर धुन अनुपम समा बाँध रही थी। कुलपति जी ने परेड का निरीक्षण किया।

तदनन्तर वेद मन्दिर में आचार्य श्री रामनाथ जी वेदालंकार की अध्यक्षता में सभा का समायोजन हुआ। डा० अनन्तानन्द जी, प्रो० बुद्धदेव जी, ब्र० योगेन्द्र जी पुरुषार्थी, प्रो० वेदप्रकाश जी, डा० वासुदेव जी, जगदेव जी (विद्यालय विभाग) प्रो० बुद्धिप्रकाश जी, श्री रामावतार जी (शोध छात्र) शिवकुमार जी आदि ने अपने विचार प्रकट किए। श्री आचार्य रामनाथ जी ने स्वतन्त्रता संग्राम में गुरुकुल विश्वविद्यालय की गतिविधि का वर्णन करते हुए बताया कि "आचार्य रामदेव जी तथा आचार्य देवशर्मा जी अनेक बार जेल गए। ब्र० सर्वमित्र का स्वतन्त्रतासंग्राम में बलिदान हुआ।' आचार्य जी ने कहा कि यह गुरुकुल धार्मिक शिक्षण संस्था ही नहीं अपितु राष्ट्रीय भावों को उद्भूत करने वाला शिक्षणालय भी है। शान्तिपाठ के पश्चात् सभा समाप्त हुई।

विरोध दिवस

कुल में ६ अगस्त को गुरुकुल के कुलाधिपति तथा आर्य प्र० नि० सभा पंजाब के प्रधान स्वामी श्री इन्द्रवेश जी की गिरफ्तारी के विरोध में कुलवासियों की विशाल सभा हुई। इसमें हरियाणा सरकार की दमनीय नीति की कटु आलोचना की गई, साथ ही विरोधस्वरूप प्रस्ताव भी पारित हुआ। निश्चय हुआ कि सभा प्रधान जी की गिरफ्तारी के विरोध में किए गए किसी भी आन्दोलन में कूदने के लिए कुलवासी पीछे नहीं रहेंगे। सभा की अध्यक्षता श्री आचार्य जी ने की।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वाध्याय के लिये चुनी हुई पुस्तकें

वैदिक साहित्य

वेदोद्यान के चुने हुए फूल (सजिल्द)	५.00
वेद का राष्ट्रीय गीत (सजिल्द)	५.00
मेरा धर्म (सजिल्द)	७.00
वरुण की नौका (दो भाग)	६.00
अग्निहोत्र (सजिल्द)	२.२५
आत्म-समर्पण	.५0
वैदिक स्वप्न विज्ञान	२.00
वैदिक अध्यात्म विद्या	.७५
वैदिक सूक्तियां	.७५
ब्राह्मण की गौ (सजिल्द)	.७५
वैदिक ब्रह्मचर्य गीत	२.००
वैदिक विनय (तीन भाग)	६.00
वेद गीतांजलि	२.००
सोम सरोवर (सजिल्द)	२.00
वैदिक कर्त्तव्य शास्त्र	.५०
सन्ध्या सुमन	५०
स्वामी श्रद्धानन्द जी के उपदेश	३.७५
आत्म मीमांसा	२.००
वैदिक पशु यज्ञमीमांसा	२.00
सन्ध्या रहस्य	२.००
अथर्ववेदीय मन्त्रविद्या	३.५०
ईशोपनिषद्भाष्य (सजिल्द)	२.००
अध्यात्म रोगों की चिकित्सा	२.५०
ब्रह्मचर्य संदेश	४.५०
आर्य संस्कृति के मूल तत्त्व	४.००
स्त्रियों की स्थिति	४.००
एकादशोपनिषद्	१.००
विष्णु देवता	२.००
ऋषि रहस्य	२.००
हमारी कामधेनु	२.००

ऐतिहासिक तथा जीवन चरित्र

भारतवर्ष का इतिहास ३ य भाग	४-५०
बृहत्तर भारत	७.००
योगेश्वर कृष्ण	४.००
स्वामी श्रद्धानन्द जी महाराज	.२५
स्वामी दयानन्द का पत्र व्यवहार	.७५
गुरुकुल की आहुति	.५०
अपने देश की कथा	.३७
दी मिडिल ईस्ट (इङ्गलिश)	३.००
ऐशियण्ट फींडम	५.७०

स्वास्थ्य सम्बन्धी ग्रन्थ

स्तूप निर्माण कला (सजिल्द)	३.००
प्रमेह श्वास अर्शरोग	.२५
जल-चिकित्सा विज्ञान	.७५
होमियोपैथी के सिद्धान्त	२.५०
आसवारिष्ट	२.५०
आहार	५.००

संस्कृत ग्रन्थ

संस्कृत प्रवेशिका प्रथम भाग	.६६
संस्कृत प्रवेशिका २य भाग	.८७
बालनीति कथामाला	.७५
साहित्य सुधा संग्रह	.२५
पाणिनीयाष्टकम् (दो भाग)	प्रतिभाग ७.००
पंचतन्त्र पूर्वार्द्ध (सजिल्द)	२.५०
पंचतन्त्र उत्तरार्द्ध (सजिल्द)	२.००
सरल शब्द रूपावली	.२५
सरल धातु रूपावली	.६०
संस्कृत ट्रांसलेशन	.२५
पंचतंत्र (मित्र सम्प्राप्ति)	.७५
पंचतंत्र (मित्र भेद)	.५०
संक्षिप्त मनुस्मृति	.५०
रघुवंशीय सर्गत्रयम्	.२५

पुस्तकों का बड़ा सूचीपत्र मुफ्त मगाइये । धार्मिक संस्थाओं के लिये विशेष रियायत का भी नियम है।

पुस्तक भण्डार, गुरुकुल कांगड़ी विश्वविद्यालय, हरिद्वार (जि० सहारनपुर) ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादक : भगवद्दत्त वेदालंकार।

प्रकाशक : डा० गंगाराम, कुलसचिव : गुरुकुल कांगड़ी विश्वविद्यालय।

मुद्रक : सुरेशचन्द्र वैष्णव, मैनेजर : गुरुकुल कांगड़ी प्रिंटिंग प्रेस, हरिद्वार।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल-पत्रिका

गुरुकुल कांगड़ी विश्वविद्यालय, हरिद्वार

अगस्त १९७४, श्रावण २०३१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषय-सूची

सं०	विषया:	लेखका:	पृष्ठांका:
१	श्रुति-सुधा		४५७
२	वेदसंख्याविचार:	प्रा० श्री भद्रसेन:	४५८
३	विश्वप्रकृति: कुरुते निरन्तरं भगवते यज्ञम्	सुश्री आशा	४६०
४	अथ प्रकाशाभ्युदयो नाम	श्री डा० मंगलदेव शास्त्री	४६१
५	अग्निमन्त्रमाला	श्री अरबिन्द:, अनु० श्री जगन्नाथो वेदालंकार:	४६६
६	ध्वनितत्त्वम्	डा० रामनारायणदास:	४६८
७	वैदिक-साहित्य-सौदामिनी	श्री वागीश्वरो विद्यालंकार:, साहित्याचार्य:	४७१
८	सम्पादकीय टिप्पण्य:	श्री पं० भगवद्दत्तो वेदालंकार	४७५
९	साहित्य-समीक्षा	,, ,, ,,	४७६
१०	सोम राजा का आतिथ्य और अग्निमन्थन	,, ,, ,,	४७७
११	हृद्रोग और तक्र	आचार्य ब्रह्मदत्त शर्मा आयुर्वेदालंकार	४८०
१२	सामवेद हिन्दी-पद्यानुवाद	श्री विद्यानिधि शास्त्री	४८४
१३	महर्षि दयानन्द की विश्वदर्शन को देन	प्रो० जयदेव वेदालंकार	४८६
14	Letter to P. Minister of India to get released S. Indraveshji	Karmchari Union, G. K. V. V.	491
१५	गुरुकुल-समाचार	श्री महावीर 'नीर' विद्यालंकार, एम०ए०	४९२

गुरुकुल-पत्रिका का वार्षिक मूल्य —

देश में - ४ रुपये, विदेश में — ७ रुपये, एक प्रति - ४० पैसे

पृष्ठ ४९६ से आगे——

हिन्दी में भाषण न दे सकने के कारण क्षमा प्रार्थना कर मान्य श्रममन्त्री जी ने कहा कि मैं गुरुकुल में श्रममन्त्री की हैसियत से नहीं अपितु गुरुकुल का प्रशंसक व प्रेमी होने के नाते आया हूं। स्वामी दयानन्द जी व स्वामी श्रद्धानन्द जी का लक्ष्य एक ही था। वे समाज में वर्गभेद नहीं चाहते थे। गुरुकुल संस्था उस को मिटाने का एक प्रतीक है। मानव जीवन में जो उदात्त है, सुन्दर है, सरल है गुरुकुल उसका पोषक है अतः गुरुकुल जैसी संस्थाओं का निर्माण हो। समाजवाद का उद्देश्य व्यक्तियों को आर्थिक दृष्टि से उन्नत करने के साथ२चरित्र को भी ऊंचा उठाना है। अन्त में मान्य अतिथि ने कहा " मेरा सौभाग्य है कि मैं गुरुकुल में आया और यहां के विद्वान कुलपति जी से विचार कर गुरुकुल की उन्नति और आदर्शों का परिचय प्राप्त कर सका। मैं समस्त कुलवासियों का आभारी हूं।'

आंग्लभाषा विभाग के अध्यक्ष प्रो० श्रीसदाशिव जी भगत ने मान्य अतिथि के अंग्रेज़ी भाषण को साथ ही साथ हिन्दी में अनुवाद कर सुनाया।

शोक समाचार

हमें यह समाचार देते हुए महान् हार्दिक दुःख है कि गुरुकुल कांगड़ी विश्वविद्यालय के सुयोग्य स्नातक श्री युधिष्ठिर विद्यालंकार का बम्बई में २ अगस्त १९७४ को अचानक हृदयगतिरुद्ध हो जाने से स्वर्गवास हो गया। वे महान् कर्मठव्यक्ति थे। सन् १९३४ में गुरुकुल से स्नातक बनने के बाद उन्होंने पत्रकारिता का व्यवसाय अपनाया। कुछ काल पश्चात् स्वतन्त्र व्यवसाय के रूप में बम्बई में फिलम इण्डस्ट्रीज में खूब नाम कमाया। उनकी अभी बहुत अधिक आयु भी नहीं हुई थी। कुलवासियों की ओर से हम प्रभु से याचना करते हैं कि वह दिवंगत आत्मा की सद्गति तथा परिजनों को सुख शान्ति व सान्त्वना प्रदान करें।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

नव कुलपति अभिनन्दन-समारोह (२-७-१९७४)

Digitized by Arya Samaj Foundation Chennai and eGangotri

आर्य प्रतिनिधि सभा के प्रधान स्वामी इन्द्रवेश जी नव कुलपति डा० सत्यकेतु विद्यालंकार का अभिनन्दन करते हुए



गुरुकुल कांगड़ी विश्वविद्यालय के नव कुलपति डा० सत्यकेतु विद्यालंकार का स्वागत करते हुए स्वामी अग्निवेश जी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीक्षान्त-समारोह (१२-४-७४)

नव स्नातकों को आशीर्वाद देते हुए गुरुकुल कांगड़ी विश्वविद्यालय के लब्धप्रतिष्ठ पुराने स्नातक डा० सत्यकेतु विद्यालंकार। दायीं ओर चोला पहने हुए गुरुकुल कांगड़ी विश्वविद्यालय के कुलसचिव डा० गंगाराम जी तथा आचार्य रामनाथ जी वेदालंकार

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीक्षान्त-समारोह (१२-४-७४)



मान्य अभ्यागत श्री प्रकाशवीर शास्त्री तथा स्वामी ब्रह्ममुनि जी के साथ कुलाधिपति श्री स्वामी इन्द्रवेश जी, आर्यप्रतिनिधि सभा के उपप्रधान श्री पृथ्वीसिंह जी आजाद और श्री रामगोपाल जी शालवाले तथा मन्त्री श्री वीरेन्द्र जी एवं अन्य अधिकारी गण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीक्षान्त-समारोह
(१२-४-७४)



गुरुकुल कांगड़ी विश्वविद्यालय के कुलाधिपति स्वामी इन्द्रवेश जी (बायें से ३रे) दीक्षान्तभाषणकर्त्ता स्वामी ब्रह्ममुनि जी (बायें से ४थे), श्री वीरेन्द्र जी (बायें से २रे), श्री मरवाहा जी तथा अन्य अधिकारीगण नवस्नातकों के साथ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओ३म्

गुरुकुल-पत्रिका

[गुरुकुलकांगड़ीविश्वविद्यालयस्य मासिक पत्रिका]

श्रावण २०३१, अगस्त १९७४, वर्षम्-२६, अङ्कः १२, पूर्णाङ्कः ३०८

श्रुति सुधा

ओ३म् सं यं स्तुभोऽवनयो न यन्ति समुद्रं न स्रवतो रोधचक्राः ।
स विद्वां उभयं चष्टे अन्तर्बृहस्पतिस्तर आपश्च गृध्रः ॥७॥

(अवनयः न) जिस प्रकार अङ्गुलियां किसी पदार्थ को थामने के लिये (सं यन्ति) मिल कर जाती हैं और (न) जिस प्रकार (रोधचक्राः) अवरोध तथा चक्र=भंवर वाली (स्रवतः) नदियां मिलकर (समुद्रं) समुद्र में गिरती हैं उसी प्रकार (स्तुभः) स्तुभनामक ये स्तुतियां स्तुत्य देव को मिलकर थामती हैं। ऐसे स्तुभनामक स्तुति वाले व्यक्ति को (विद्वान् बृहस्पतिः) विद्वान् बृहस्पति आचार्य (गृध्रः) संसार सागर से पार पहुंचाने की इच्छा वाला होकर (अन्तः) अपने अन्दर हृदय गुहा म बैठ शिष्य के (तरः आपश्च) तरणसाधन नौका तथा व्यापक जल (उभयं) दोनों को (चष्टे) देख लेता है।

रोधचक्राः—रोधचक्राः नदी नाम । निघ. १।१३

रोधाश्चक्राणि च यासु ताः नद्यः—स्वामी दयानन्द

ऐसी नदियां जिनमें बीच २ में अवरोध बने होते हैं तथा चक्र अर्थात् भंवर बनती रहती हैं। यहां स्तुति प्रसंग में ये दोनों भाव दृष्टिगोचर होते हैं। स्तुति प्रवाह के मार्ग में भी अनेकों अवरोध तथा गुमराह करने वाली भंवरें आ जाती हैं। सम्भवतः ये योगज सिद्धियों के रूप में भी हो सकती हैं। जिनके प्रभाव में आकर एक योगी व विज्ञानी पुरुष सीधे मार्ग से भटक जाता है या वहीं रुक जाता है। दूसरी दृष्टि से शिष्य के लिये भी गुरु के प्रति भक्ति व स्तुति में कई अवरोध व गुमराहें पैदा हो जाती हैं, परन्तु विद्वान् बृहस्पति शिष्य के अन्दर बैठकर उसकी सामर्थ्य व उसके तैरने योग्य वासनादि जल प्रवाह को सम्यक् प्रकार से देखलेता है। इसका अन्य भी तात्पर्य हो सकता है।

अवनयः—अवनयोऽङ्गुलयो भवन्त्यवन्ति कर्माणि । नि. ३।९। अवनि अर्थात् अङ्गुलि का उदाहरण यह दर्शाने के लिये है कि जिस प्रकार अङ्गुलियों की मिलकर पकड़ होती है, उसी प्रकार भिन्न २ स्तुतियों की पकड़ दृढ़ होनी चाहिये, सबका ध्येय व पकड़ एक ही हो।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदसंख्या विचारः

प्रा० श्री भद्रसेन, साधु आश्रम, होशियारपुर

केषाञ्चिदियं धारणा यत्पूर्वमेक एव वेद आसीत्, वेदव्यासेन लोककल्याणाय विषयानुसारं वेदस्य चतुर्विधो विभागो विहितः। प्रमाणमत्र वेदं तावद् एकं सन्तमतिबृहत्त्वाद् दुरध्येयं दुर्ज्ञेयमनेक-शाखाभेदेन समाम्नासिषुः सुखग्रहणाय व्यासेन समाम्नातवन्तः। नि. १,२० दुर्गभाष्ये।

पूर्वं भगवता व्यासेन जगदुपकारार्थमेकीभूय-स्थिताः वेदा व्यस्ताः शाखाश्च परिच्छिन्नाः तै. सं. भूमिकायां भट्टभास्करः।

तत्रादौ ब्रह्मपरम्परया प्राप्तं वेदं वेदव्यासो मन्दमतीन् मनुष्यान् विचिन्त्य तत् कृपया चतुर्धा व्यस्य ऋग्यजुःसामाथर्वाख्यांश्च चतुरो वेदान् पैलवैशम्पायनजैमिनिसुमन्तुभ्यः क्रमात्-उपदिदेश-महीधरः—यजुर्भाष्ये।

वेदान् विव्यास यस्मात् स तेन व्यास इति स्मृतः।
अवतीर्णो महाभागो वेदं चक्रे चतुर्विधम्॥
ब्रह्मणा चोदितो व्यासो वेदान् व्यस्तुं प्रचक्रमे।

महाभारते, पुराणेष्वपि मिलति भावनैषा। अपरपक्षेण तु—वेदव्यासतः पूर्वमेव विभक्तानां चतुर्णां वेदानां साहित्ये चर्चोपलभ्यते। पुनः कथं व्यासेन विभागः कृतः। वेदेष्वेव चतुर्णां नामानि प्राप्नुवन्ति। तद्यथा—

१—तस्माद्यज्ञात्सर्वहुतः · · ऋग्यजुः।
२—यस्मादृचोऽपातक्षन्, अथर्व०।
३—यस्मिन् वेदा निहिता विश्वरूपाः, अ०४,३५,६
अत्र वेदाः बहुवचनम्, पुनः कथमेक एवेति।
४—एवं वा अरेऽस्य महतो भूतस्य, शतपथ, बृह०-उप०, मै. उप.।
५—चत्वारि शृंगा-इति वेदा वा एतदुक्ता क. ब्रा.।
६—चत्वारो हीमे वेदाः—काठक।
७—यो ब्रह्माणं विदधाति पूर्वं। यो वै वेदांश्च प्रहिणोति-श्वेता-उप०।
८—तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदश्च, मुण्डकोपनिषत्।
९—ऋग्वेदं भगवोऽध्येमि, यजुर्वेदं सामवेदमथर्वाणं चतुर्थम्, छान्दोग्य।
१०—अग्निवायुरविभ्यस्तु त्रयं ब्रह्म · मनुस्मृति १, २३।
११—चत्वारि शृंगा-। चत्वारो वेदाः नि० १३, ७ महाभाष्येऽपि-एषैव व्याख्या।

तत्र यदुक्तं चातुर्वेद्यं चत्वारो वेदविज्ञाता भवन्ति। तत्र ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वश्चेति चरणव्यूह।

१२—रामायणे हनूमान् महोदयस्य परिचयावसरे—
न ऋग्वेदविनीतस्य न यजुर्वेदधारिणः।
इति वर्णितम्।
१३—ऋचो बह्वृच मुख्यैश्च प्रेर्यमाणाः पदक्रमैः।
शुश्राव मनुजव्याघ्रो—तेषु इह कर्मसु॥ ३१
अथर्ववेदप्रवराः—पंच याज्ञिकाः सम्मताः।
संहितामीरयन्ति स्म पदक्रमयुतां तु ते॥
महा. आदिपर्व ६४, ३२।

शाकुन्तलोपाख्यानानुसारं दुष्यन्तसमये एषा स्थितिः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१४–वेदाः–महा. शल्य ४१, ४; वन २९, ३९।

१५–वेदैश्चतुर्भिः द्रोण ५१, १२।

१६–राज्ञश्चाथर्ववेदेन शा. ७३, ७।

महाभारतस्याध्ययनेन विज्ञायते, यत् श्रीव्यास-महोदयस्य पितृपितामहप्रभृतिभिश्चत्वारो वेदाः पठिताः। यदि तैः चतुर्णामध्ययनं विहितं तर्हि व्यासः कथं तान् व्यभजत्।

उपसंहारः–सम्भवतो वेदव्यासकृतविभागस्यायमभिप्रायः स्यात्, यद् व्यासशिष्यप्रशिष्यैः पाठ-संग्रहं विधाय शाखाब्राह्मणानि विरचितानि। तदभिप्रायबोधकमेवेदं मतं प्रतीयते। तथा च वेदान् अनेकधा कर्तुं यदि ते रुचितं प्रभो! महा. शा० ३३६, ३। एवमेव-वेदद्रुमश्च यं प्राप्य सशाखः समपद्यत। वायु० पु० १, ४५॥

आभ्यां प्रमाणाभ्यामपि–एतदेव सिध्यति यद् व्यास एव वेदीयशाखाब्राह्मणग्रन्थानाम् मूलप्रणेता। अत एव वेदविभागकर्तृरूपेण स्मर्यते।

वेदा त्रयश्चत्वारो वा—

प्रथमपक्षः–साहित्ये प्रायः त्रयाणामेव नाम श्रूयते। यथा-त्रयं ब्रह्म सनातनम्, मनुस्मृति १,२३। तेभ्यस्तप्तेभ्यस्त्रयो वेदाअजायन्त, शतपथ। तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे। तस्माद्यजुः। वेदैरशून्यैस्त्रिभिरेति सूर्यः तै. ब्रा.। ऋषयस्त्रयिविदो विदुः ऋचः सामानि यजूंषि, तै. ब्रा. १,२,१,२६,। यद्वै यज्ञस्य साम्ना यजुषा क्रियते, शिथिलं तत्। यद् ऋचा तद्दृढम् तै. ६,५,१०,३ त्रिभिर्वेदैर्विधीयते–। तथा देवता-भाषा-भाव-छन्द-सामपि नूतनत्वं प्राप्यते।

अतो वक्तुं शक्यते, अथर्ववेदो नूतनः, बहु-कालानन्तरं चतुर्थवेदरूपेण स्थानं प्राप्तवान्।

द्वितीयः पक्षः–यस्मादृचोऽपातक्षन्–अथर्व। अस्य महतो भूतस्य–शतपथ। तत्रापरा ऋग्वेदो–मुण्डक। रामायण-महाभारतयोरध्ययनेनापि चतुर्णां नामानि प्राप्नुवन्ति। ऋग्यजुः सामाथर्वणञ्च चत्वारो वेदाः, नृसिंह उप. १, २।

गोपथब्राह्मणे (१,२,११९; १,३,२,) चतुर्णां नामानि मिलन्ति।

बहुषु स्थलेषु त्रयाणामेव नामानि कथमिति कथनस्य समाधानं कुर्वन् श्री सायणाचार्यः अथर्व-भूमिकायां प्राह–व्याहृतीनां तिसृत्वात् क्वचित् त्रयाणामेव चर्चा। कुत्रचित् पूर्वाह्णादि कालाभिप्रायेण, तत्र कालदृष्ट्या, त्रयाणामेव चर्चा। कुत्रचिद् वेदगतमन्त्राभिप्रायेण त्रैविध्यम्। मीमांसादर्शने अस्मिन् विषये विशिष्टा चर्चा वर्तते। तच्चोदकेषु मन्त्राख्या ३२। तेषां ऋग् यत्रार्थवशेन पादव्यवस्था ३५। गीतिषु सामाख्या ३६। शेषे यजुः शब्दः मी. २,१,३७। अर्थात् त्रिविधमन्त्रदृष्ट्या त्रैविध्यं स्वीक्रियते। ज्ञान-कर्म-उपासनाविषयभेदतस्त्रैविध्यम्। वेदास्तु चत्वार एव त्रयाणां नामानि तु विशेषदिशैव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

" विश्वप्रकृतिः कुरुते निरन्तरं भगवते यज्ञम् "

आशा, संस्कृतविभागः, श्री अरविन्दाश्रमः, पाण्डिचेरी

चराचरविश्वं ननु प्रकृतेः यज्ञशाला यत्र सा निरन्तरं यज्ञे व्यापृता । श्रीअरविन्दो यदस्मान् प्रतिपादयति "सम्पूर्णं जीवनं खलु योगः" इति तस्य साक्षात्प्रमाणस्वरूपा सा अस्माकं सम्मुखम् । उच्चादुच्चतरं गच्छन्ती निष्कम्पा, देदीप्यमाना पवित्रनीरवाग्निशिखा इव भगवन्तमभीप्सन्ती सा चराचरं तदेव शिक्षयति । प्रकृतेः दर्शनेन कथं कृत्स्ना सृष्टिः भगवल्लीलां संकीर्तयति इत्यपि स्पष्टमेव ।

अवसन्नायां यामिन्यामागतायां च उषायां पक्षिणां कूजनेन प्रकृतिः चराचरं जागरयति । तस्मिन् समये विहङ्गानां ध्वनिः वेदमन्त्र इव कर्णकुहरे प्रविशति । चतुर्दिग्भ्योऽमृतवर्षां कुर्वती सा आद्योऽपि चिरनूतनः प्रणवनाद इव उद्घोष्यमाणः प्रतीयते । तस्यां मङ्गलवेलायां भगवत्प्रेमपरिप्लाविता धरित्री आनन्दगीतं गायति, शाश्वती परमा शान्तिः सर्वत्र राजते, सुखदः शीतलश्च समीरः नवजीवनस्य सञ्चारं करोति, तृणगुल्मानि नर्तं नर्तमानन्दसमारोहे आह्लादेन हिन्दोलायन्ते, प्रकाशाभिमुखं गच्छन्त्यः वृक्षश्रेण्योऽनागतप्रकाशस्य स्वागतसज्जां कुर्वन्ति । सागरोर्मिमालाः उत्थायोत्थाय भगवतेऽर्घ्यं समर्पयन्ति उपकूलं सङ्क्षिप्य च भगवच्चरणे विधौते कुर्वन्ति । प्रभातागमने सर्वाणि सुमानि पुष्प्यन्ति । भगवत्सौन्दर्यमभिव्यञ्जयन्ति तानि सर्वभावेन भगवत्सर्मपितानि, यतो हि भगवच्चरणारविन्दे स्वात्मसमर्पणमेव तेषां लक्ष्यम् । भगवदभिव्यक्तिरेव तेषामस्तित्वस्यैकमात्रं कारणं ननु । स्पष्टमेव यत् प्रकृतिमाताखिलविश्वं भगवन्निमित्तं यज्ञायाहूय कथयति, "निबिडान्धकारः समाप्तः । हे धरित्रि ! प्रकाशाभिमुखी जागृहि ।" अचिरमेव सूर्योदयेन वसुन्धरारुणरागेण रञ्जिता भवति । तपनोऽभीप्सायाः जागरितमुदाहरणम् । कुसुमेषु स्वर्गोपमाः विमलोज्ज्वलशुभ्रनीहारबिन्दवः मातृप्रार्थनां स्मारयन्ति । "बिन्दुशः स्वीयसर्वशक्तिमयप्रेम्णः प्राणदायिनीमुद्धर्त्रीमग्निशिखां सिञ्चसि त्वम् । यदास्माकमज्ञानान्धकाराच्छन्नजगति इमे शाश्वतज्योतिर्बिन्दवः सुमधुरं पतन्ति तदा प्रतीयते यत् कृष्णव्योम्नः धरित्र्यामेकैकशः हिरण्मयानि नक्षत्राणि वर्षन्ति ।"

व्योम्नः श्वेतकृष्णौ वर्णौ अस्मान् श्रीअरविन्दस्य श्रीमातुश्च दिव्यप्रकाशमण्डलं स्मारयतः । प्रभातागमने प्रकृतिमाता सर्वानाह्वयति कार्याय, यतो हि श्रीमाता कथयति–कार्यं देहस्य परमा प्रार्थना ननु । मध्याह्ने आदित्यस्य प्रचण्डकिरणाः अस्मान् भगवतः प्रखरदिव्यप्रकाशपुञ्जं स्मारयन्ति। प्रदोषकालेऽस्तमयन् दिनकरः विभिन्नवर्णैः स्वमधुररवतरागैः गगनं रञ्जयित्वा सृष्टौ वर्णवैचित्र्यं च निदर्शयति । तत्परमचिरं सुधाकरः स्वकिरणजालैः निबिडान्धकारग्रस्तधरणीं स्वज्योतिषा उद्भासयति, वर्षति च स्वचन्द्रिकां भगवत्कृपारूपेण, सर्वानन्धकारनिमज्जितान् जडजङ्गमान् भगवदभिमुखान् करोति । तारकापुञ्जाः अपि कथयन्ति–'सर्वे भगवतः अंशभूताः स्फुलिङ्गाः ननु ।' सर्वान् च स्वलक्ष्यं स्मारयन्ति ।

सम्पूर्णा सृष्टिः निरन्तरं भगवतोऽद्भुतकथां कीर्तयति । रात्रौ वात्सल्यमयी प्रकृतिमाता विश्वचराचरं स्वक्रोडे स्वापयति गायति च नीरवतायाः परमसङ्गीतम् ।

इत्थं निरन्तरं सृष्ट्याः आदिकालात् प्रभातात् रात्रिपर्यन्तं प्रतिमुहूर्तं सम्पूर्णा विश्वप्रकृतिः भगवद्गाथां निगदन्ती परमकृतज्ञतायां भगवन्मुखी यज्ञं करोति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ प्रकाशाभ्युदयो नाम

श्री डा० मंगलदेव शास्त्री

एकादश उच्छ्वासः

प्रत्यवमर्शः

१९२४ ई० वर्षादारभ्य १९६८ ई० वर्षपर्यन्तम्, अर्थात् प्रायेण पञ्चचत्वारिंशतं वर्षाणि यावत्, कतिचिद्वर्षाणामवान्तरकालं विहाय, ममासीत् साक्षात्संवन्धः प्रथमं काशिकराजकीयसंस्कृत-महाविद्यालयेन तदनन्तरं तस्यैव रूपान्तरेण वाराणसेयसंस्कृतविश्वविद्यालयेन । सुदीर्घेऽस्मिन् काले तयोः संवन्धेन मम कीदृशं कियद्वा कार्यमिति संक्षेपेण पुरस्ताद् व्याख्यातम् ।

स्पष्टं मम जीवनस्यातिमहान् भागोऽस्मिन् कार्ये व्यतीतः । सततमहोरात्रस्य श्रमेण तत्संपादितम् । एकमात्रं लक्ष्यमासीत्–संस्कृतस्य संस्कृतज्ञानां तद्द्वारा भारतीयसंस्कृतेश्च व्यापकदृष्ट्या विश्वमुखी समुन्नतिः ।

१. **अद्य यावत् पी-एच०डी०उपाध्यर्थं स्वीकृतानां शोधनिबन्धानां विषया एते (१) ब्रह्मसूत्रीय वैष्णवभाष्याणामालोचनापुरःसरं तुलनात्मकमध्ययनम् । (२) पुराणान्तर्गत वैदिक विषयाणामालोचनात्मकमध्ययनम् । (३) विष्णुपुराणान्तर्गतानां धार्मिकसामाजिकैतिहासिक विषयाणामालोचनात्मकमध्ययनम् । (४) शाङ्करवेदान्ते बौद्धदर्शनस्य प्रभावः । (५) महाभारतस्य पुराणानां चाधारेण हिन्दूतीर्थानामालोचनात्मकमध्ययनम् ।**

अद्य यावद् या कापि प्रगतिस्तस्यां दिशि दृष्टिपथमायाति सर्वस्या अपि तस्याः सूत्रपातः सोत्साहमनेनैव जनेन कृत आसीदिति नाविदितं तदितिहासविदाम् ।

तेषु दिनेषु संकीर्णमतीन् प्रगतेर्विरोधिनः प्रति मदीयमुद्बोधनमासीत्–'अद्यत्वे भवद्भिर्यस्याः प्रगतेर्विरोधः 'मया मोहान्धेन प्रहृतमिदमात्मन्यकरुणम्' इत्यनुसारं क्रियते, भविष्ये नूनं स एव प्रगतेः पन्था भवद्भिरप्यनुसर्तव्यः' इति ।

उदाहरणार्थम्, राजनीतिः, आगमशास्त्रम्, जैन बौद्धदर्शने, अर्थानुसन्धानपूर्वकं वेदाध्ययनम्, तुलनात्मकदृष्ट्या दर्शनशास्त्राध्ययनम्, स्त्रीणां कृते विशेषाध्ययनक्रमः, तुलनात्मकं भाषाविज्ञानम्, ऐतिहासिकदृष्ट्या संवलिता भारतीयसंस्कृतिः, प्राचीनाकरग्रन्थानामन्येषां च विलुप्तप्रायाणां विशिष्टग्रन्थानामुद्धारः–इत्यादि विषयेषु प्रथमं तु जनस्यास्य दिग्दर्शनं नैवानुसरणीयमित्येव पक्षः साग्रहं समर्थितस्तैस्तैः संकीर्णमतिभिः कार्यकर्णधारैः !

परं सामयिकीरावश्यकता अनुरुध्य तत्तद्विषयाणां कालक्रमेण क्रियमाणः स्वीकारोऽपि नाद्य यावत्सर्वात्मनोदारदृष्टिमनुसरति !

अत्र विषये ममैतन्निश्चितं मतम्—

अद्यत्वे प्रगत्युन्मुखताया उदारबुद्धेश्च सर्वतः प्रथममपेक्षा संस्कृतज्ञेषु, न केवलं राष्ट्रस्य कल्या-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

णार्थमेव, किन्तु तेषामेव सर्वक्षेत्रेषु समुन्नत्यर्थमपि। 'ज्ञानस्य सीमाया बन्धनं ज्ञानस्य विकासश्चेति विप्रतिषिद्धम् !'

'सूर्यप्रकाशावरोधः पादपानामिव, विद्याप्रकाशावरोधो बुद्धीनां हितावहो न भवति !'

उदारबुद्धेर्व्याख्यानम्

उदारबुद्धेः सर्वतः प्रथममपेक्षा संस्कृतज्ञेष्विति पुरस्तादुक्तम्। तत्र तस्या उदारबुद्धेर्वस्तुतः किं स्वरूपमिति चेच्छ्रूयताम्——

तत्तज्जातिवर्गप्रान्तसंप्रदायादिगतसंकुचितभावनाभ्य उत्थाय राष्ट्रियभावना, अखिल भारतीय भावना, भारतीय संस्कृतेर्भावना इत्याद्युदात्तभावनाभिः संस्कृता परिष्कृता च बुद्धिरेव वस्तुत उदारबुद्धिरित्यभिख्यां भजते।

उदारबुद्धिश्च पुनः प्रगत्युन्मुखतायामेव पूर्णतः सफलतां समश्नुते।

तत्रैतौ श्लोकौ भवतः—

सत्यासत्यपरीक्षायां तत्परा आग्रहं विना।
उदारमतयो नूनं प्रगतेः पक्षपातिनः ॥१॥
पश्चाद्दृष्ट्या प्रवर्तन्ते संकीर्णमतयो नराः।
रूढिमार्गेण गच्छन्तः प्रगतेस्ते विरोधिनः ॥२॥

उदात्तवैदिकभावनानां वातावरणे बाल्यादेव लालितः वर्धितश्च, प्राचीनार्षसंस्कृतेरादर्शाननुसरति गुरुकुले राष्ट्रियभावनाभवने प्रायेण सर्वश्रेष्ठे पाश्चात्य विश्वविद्यालये चान्तेवासित्वगौरवमनुभूयाहं स्वभावादेवोक्तलक्षणाया उदारबुद्धेः पक्षपाती अभवम्। अत एव यत्र कुत्रापि वसन् निश्छद्मभावेन पूर्वोक्तानां राष्ट्रियभावनादीनां संपत्त्यै सततं प्रयत्नपर आसम्।

तदत्र कतिचिदुदाहरणानामुल्लेख एव पर्याप्तः।

तथा च, विदेशयात्रायाः पूर्वमेव लाला लाजपतरायादिराष्ट्रनेतॄणां प्रभावेण दलितवर्गस्योद्धारार्थं मया नैकरूपेण प्रयत्नः प्रारभ्यत।

विदेशप्रवासेऽपि उक्तविषये मम तीव्रा रुचिरन्ववर्त्तत, अत एव तत्र दलितजनताया उद्धारार्थं क्रिश्चियनधर्मानुयायिभिरनुस्रियमाणायाः कार्यपद्धतेरध्ययनार्थं मम विशेषप्रयत्न आसीत्। किं च, विदेशेषु राजामहेन्द्रप्रतापः, मानवेन्द्रनाथरायः, अवनीमुकर्जी इत्यादिभिः प्रसिद्धक्रान्तिकारिभिः स्वसंपर्कस्य स्थापने मम राष्ट्रहितप्रेरणैव एकमात्रं कारणमासीत्।

स्वदेशे प्रत्यागमनानन्तरं तु सततं राष्ट्रहितभावनया प्रगत्युन्मुखोदारबुद्ध्या च प्रेरितेन मया, प्रतिक्रियावादिनामत्यन्तं घोरविरोधेऽपि, यद्यत्संपादितं संपाद्यते च तत्प्रायेण विवृतं पुरस्तात्।

किञ्च, राजकीयसंस्कृतमहाविद्यालयस्य प्रधानाचार्यत्वकाले, ततः पूर्वं च, ब्रिटिशशासनस्य क्रोधादिभाजनेभ्यो राष्ट्रियकार्यपरेभ्यश्छात्रेभ्योऽन्येभ्यश्च विविधरूपेण मया प्रदत्तस्य संरक्षणस्य समाश्रयस्य च ये प्रसङ्गास्तेषामत्र वर्णनेनालम्।

किं बहुना, १९४२वर्षे बिहारप्रान्तीय कारागारादात्मानं गूढोपायेनोन्मोच्य स्वतन्त्रस्य सत इतस्ततो गूढं विचरतः श्री जयप्रकाशनारायणस्यापि दिनद्वयमस्मत्कुटुम्बेन सह निवासः, एतादृशा एवान्येऽपि प्रसङ्गाः—सर्वमेतदेकान्तभावेन ममोक्तप्रवृत्तीनां पक्षपातमेव द्योतयति।

राजकीयसंस्कृतमहाविद्यालये छात्राणां प्रवेशे जन्मजातिगतभावना संकीर्णसांप्रदायिकभावना वा बाधिका न भवेत्, केवलं योग्यतायाः प्रश्न एव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विचारणीयो भवेदित्येतदर्थं मया सततं प्रयतितम्। अन्ततो गत्वा द्वौ शासनादेशावपि (g. o no. A-4017/xv–910-47, dated May 12, 1947 तथा G." O." no. O-1422/II-B-55-1948, daned April 14, 1948) उक्तार्थपुष्टिकरौ प्राप्तौ आस्ताम्। तदनुसारमुक्तमहाविद्यालये प्रवेशावसरे, न केवलं छात्राणां जन्मजातेः प्रश्न एव नोत्थापनीय इत्यादिष्टमासीत्, किन्तु प्रवेशपुस्तके कस्यापिच्छात्रस्य जातेरुल्लेखोऽपि न करणीय इत्यप्यादिष्टमासीत्।

एतादृशैरेव विचारैः प्रेरितेन मया तत्तज्जातिविचारमुपेक्ष्यैव केवलं योग्यताया आधारेणैवच्छात्राणां प्रवेशः प्रचालितोऽभूत्। तत्कारणादेव स्वाभिरामानन्द (हरिजनजातीयः सः) शास्त्री (अद्यत्वे संसत्सदस्यः) स्वामि सर्वानन्द शास्त्री (हरिजनजातीयः), अन्येऽपि च तत्सदृशाः अस्माकं महाविद्यालयस्य स्नातका दृष्टिपथमायान्ति।

तदेतन्नूनं मम सात्त्विकगर्वस्य प्रसन्नतायाश्च विषयः!

एवमेव महाविद्यालयीयच्छात्रेषु विशेषतः, संस्कृतजगति च सामान्यतः, परम्परागतसंकीर्णबुद्धेरुन्मूलनार्थं प्रगतिभावनायाश्च विकासार्थं मम नैके प्रयत्ना आसन्। अलमत्र तेषां परिगणनया।

तेषामेवैष सुपरिणामो यदस्माकं नैके प्राचीनच्छात्रा अनुसन्धानोपाधिभिर्युक्ता अथच वैदेशिकविश्वविद्यालयीयशिक्षादीक्षिता दृष्टिपथमागच्छन्ति।

तत्र खेदावहोऽन्तरायः

परमत्यन्तखेदस्यायं विषयो यदुक्त महाविद्यालयाद्मयावकाशग्रहणानन्तरं यैर्महोदयैः प्रधानाचार्यकार्यभारो गृहीतः प्रायेण ते तत्तत्क्षेत्रे प्रगतिभावनाया उन्मूलनार्थं कृतसंकल्पा इवासन्।

भारतवर्षेण नूनं स्वराज्यं लब्धम्। परं राजकीयसंस्कृतमहाविद्यालये तत्तज्जातिवर्गसंप्रदायगताः संकीर्णभावना अहमहमिकया भूयोऽपि लब्धप्रसरा आसन्। छात्राणां प्रवेशे उदारताया भावना तावद्दूर आस्ताम्, अध्यापकानामपि नियुक्तौ चिरपरम्परया प्राप्तोदारभावना प्रायेणास्तंगता।

संकीर्णभावनामूलाया अस्या दुष्प्रवृत्तेः प्रभावः स्वभावतो वाराणसेयसंस्कृतविश्वविद्यालयमपि प्रसृतवान्। सत्यमेतत् 'कार्यं निदानाद्धि गुणानधीते' इति। स च प्रभावो भूतावेशइव तं विश्वविद्यालयमद्यापि न मुञ्चति। एतत्कारणादेव तत्रत्योपकुलपतिकृतेआत्मरक्षार्थम्, आरक्षकबलस्य (of the Police Force) आवश्यकता प्रायेण जायते। उच्चपदस्थाधिकारिणामपि न केवलं प्रतिष्ठाभङ्गस्य, किन्तु प्राणरक्षाया अपि, गम्भीरप्रश्नो यदा कदा समुत्पद्यते।

तदस्या विश्वविद्यालयीय दुःस्थितेः किं मौलिकं कारणमिति जिज्ञासायाः समाधानं तु विश्वविद्यालयस्य प्रारम्भकाल एवोच्चशिक्षाधिकारिणां संकुचितमनोवृत्तेरनु संधान एव निहितमित्यन्यत्र विस्तरः!

शास्त्रेषु 'विद्या ह वै ब्राह्मणमाजगाम गोपायमा शेवधिष्टेऽहमस्मि।' (निरुक्ते २।४), 'एतस्मिन्नार्यावर्ते निवासे ये ब्राह्मणाः कुम्भीधान्या अलोलुपा अगृह्यमाणकारणाः किञ्चिदन्तरेण कस्याश्चिद् विद्यायाः पारगास्तत्रभवन्तः शिष्टाः' (व्याकरणमहाभाष्ये ६।३।१०९) इत्यादिप्रकारेण येषामध्यापकानां महिमा शतशो गीयते, यादृशां हि महात्मनां दर्शनं भारते प्रायेण पूर्वं सुलभमासीत्,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साम्प्रतमपि च दिष्ट्या बहवस्तादृशाः (=तपः-स्वाध्यायनिरताः शान्तादान्ता मनीषिणः) वाराणसीमलंकुर्वन्ति (तदत्रास्मिन्नेव ग्रन्थे द्वितीयउच्छ्वासेऽद्यत्वेऽपि संस्कृतविद्वत्सूपलभ्यमानानां विशिष्टगुणानां वर्णनं द्रष्टव्यम्), तेष्वेवाद्यत्वे भारतस्य दौर्भाग्येण कश्चिन्नूतन एव प्रकारोऽपि दृष्टिपथमागच्छन् सखेदं सर्वानाश्चर्यचकितान् विदधाति !

तस्मिन् प्रकारे हि—

कर्तव्यभावनाह्रासो मायाचारप्रवीणता ।
कूटकापट्यवृत्तिश्च कस्य दुःखाय नो भवेत् ! ।।१।।

तदेतदतीव खेदावहं भारतीयसंस्कृतेर्गीर्वाणवाण्या वा उद्धारायकृतसंकल्पानाम् ।

एतादृशे प्राणशोषणवातावरणे विश्वविद्यालये 'असतो मा सद्गमय, तमसो मा ज्योतिर्गमय' (बृहदारण्यकोपनिषदि १।३।२८), 'अश्रद्धामनृतेऽदधाच्छ्रद्धां सत्ये प्रजापतिः' (यजुर्वेद १९।७७) इत्यादि श्रुतिप्रतिपादितस्य सत्यानुसंधानस्य वा विद्यायाः समुन्नतेश्च वानुकूलोऽवसर उपस्थितो भवितुमर्हतीत्येव तावदसंभवं प्रतीयते ।

अत एव तत्रत्येनोपकुलपतिना २०।८।१९६७ ई० दिनाङ्के कार्यकारिण्यां परिषदि **"अनुसन्धानकार्ये विशिष्टविद्वत्तापूर्णप्रकाशनकार्ये वा लब्धप्रतिष्ठा योग्या एव विद्वांसो व्याख्यातृपदेषु प्राध्यापकपदेषु च विश्वविद्यालये नियोज्याः' इत्यर्थको मदीयः प्रस्तावः साग्रहं प्रस्तुतोऽपि पूर्णतयोपेक्षित एव ।**

विश्वविद्यालयस्य प्रारम्भकालादेव प्राध्यापकानां नियुक्तावस्था दृष्टेरुपेक्षा तद्भविष्यमन्धकारमयं कृतवती ! तत्रत्याः केचित् प्राध्यापका अद्य यावत्कथमनुसन्धानकार्यस्य मार्गप्रदर्शनं कृतवन्तः कुर्वन्ति वा? तदेतच्चिन्तयत एव रोमाञ्चो जायते ! तदेतत्तावदेकं मुख्यं तत्रत्यवैचित्र्यस्य निदर्शनम् !

अन्यच्च रहस्यात्मकं निदर्शनम्

अत्र स्मृतिपथमायात्यपरं रहस्यात्मकं निदर्शनम् । सामयिकमिति नात्र तदुल्लेखनमसाम्प्रतम् ।

१९६६ वर्षे **ताशकन्दगमनस्य** किञ्चित्कालात्प्राग् देहलीराजधान्यां प्रधानमन्त्रिभिः स्व० श्री लालबहादुरशास्त्रिभिर्मया साक्षात्कारो जातः । काशीविद्यापीठे स्थितिकाले स मम शिष्य आसीदिति पूर्वमवोचाम । अस्माकं राजकीय संस्कृत महाविद्यालयीय प्रथमदीक्षान्तमहोत्सवेऽपि स निमन्त्रणेनोपस्थित आसीत् । मम प्रधानाचार्यत्वेन नियुक्तेरवसरे जातेन महता संघर्षेणापि सपरिचित आसीत्। प्रधानाचार्यत्वेन मम नियुक्तेरनन्तरं या अभूतपूर्वा प्रगतिर्महाविद्यालयस्याजायत, सापि नूनं तस्य श्रुतिपथमागताभूत् ।

१९६४ वर्षे (२६।१२।१९६४ दिनाङ्के) स्वकीय प्रधानमन्त्रित्वकाले वाराणसेय संस्कृतविश्वविद्यालयस्य दीक्षान्तभाषणप्रदानाय स आमन्त्रितोऽभूत् । तस्य भाषणस्य स्मृतिर्नवीनैवासीत् तस्य मानसे । तद् भाषणं विश्वविद्यालयात् प्रेषितसूचनाया अनुसारेणैव लिखितं मुद्रितं चासीत् ।

तस्मिन् भाषणे **डा० जे० म्यौर, डा० जे० आर० बैलेन्टाइन, डा० जी० थीबो, श्री आर० टी० एच० ग्रिफिथ**प्रभृतिपाश्चात्यानामपि प्रधानाचार्याणां नाम्नामुल्लेखे सत्यपि मदीयनाम्न उल्लेखाभावेन स खिन्नइव मां प्रति किञ्चिदाश्चर्यं प्रकटीकृतवान् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मया तु सस्मितं केवलमेतावदेवोक्तम्--**नैवात्र किञ्चिदाश्चर्यम् । एष खलु तत्रत्यः 'शीलसमुदाचारः'** !

शतशः शासनीयपत्रादिषु संस्कृतमहाविद्यालयीयविशिष्टप्रगतिसम्बन्धे मम नाम्न उल्लेखे सत्यपि वाराणसेय संस्कृतविश्वविद्यालयेन संबद्धानां **केषांचिद्** 'महानुभावानाम् एष' एव प्रयत्नो दृश्यते यत्तस्य विद्यालयस्य विश्वविद्यालयस्य वा इतिहासान्मम नामोल्लेखोऽपि विलुप्येत इति । अत्र विषये निदर्शनानां बाहुल्यमिति नाविदितं विपश्चिताम् । तदेतदतीव मे मनोरञ्जनस्य विषयः !

एतादृशस्थलेषु स्वकीय आदर्शस्तु एवं प्रतिपादितोऽस्माभिरेवान्यत्र--

'कृतघ्नतापिशाच्या वा मित्रद्रोहस्य रक्षसः ।
स्वार्थस्य दुष्टवृत्तेर्वा घतित्राणाय यन्मतम् ।।
चित्तस्य तादृशं स्वास्थ्यं सोऽयं मे निचिरव्ययः ।'
(जीवनज्योतिः ११।४२, ४६)

मम जीवनस्य भविष्यकार्यक्रमः

तदेवं संस्कृतविश्वविद्यालये तत्प्रगतेर्वर्तमानस्य स्वरूपस्य प्रवृत्तीनां च दृष्ट्या तद्विषयकस्वजीवनस्वप्नानां पूर्णरूपेण साफल्यमदृष्ट्वापि नैवाहं भग्नमनोरथो भवामि । नूनं स समय आगमिष्यति यदा स विश्वविद्यालयः सगर्वं सोल्लासं च मत्प्रदर्शितमार्गेणैव क्रमशो विकासमेष्यति । नूनं 'नान्यः पन्था विद्यतेऽयनाय'

स्वजीवनस्य भविष्यकार्यक्रमसंबन्धे तु नास्ति मम किञ्चिन्नूतनं वक्तव्यम् ।

२५।७।१९६१ दिनांके स्वकीयोपकुलपतित्वकाले संस्कृतविश्वविद्यालयीय सत्रारम्भभाषणे[1] मया स्पष्टमुक्तमासीत्--उपकुलपतित्वं मया स्वीकृतं केवलं विश्वविद्यालयस्य, **स्वाभिमतादर्शानां दृष्ट्या**, हितकरणार्थम् । यदि तत्र बाधोपतिष्ठते, तर्हि विद्यते ममान्यो निरत्ययो मार्गः कार्यस्य । **स च भारतीय संस्कृतेर्विकासस्य सप्तसु अष्टसु वा खण्डेषु धारारूपेण व्याख्यानरूपः** । उपकुलपतिपदान्निरतिशयेनात्यधिकं महत्त्वं तस्य कार्यस्य । अवश्यं चिरचिरकालस्थायि तद् भविष्यति ! इति ।

स एवाद्यत्वे मम जीवनस्य मुख्यो भविष्यकार्यक्रमः । 'यद् भूतं यच्च भाव्यम्' सर्वं तद्विस्मृत्य साम्प्रतं तावदेकान्तभावेन, स्थविरतानुषङ्गिणि शरीरास्वास्थ्ये सत्यपि, प्रधानतस्तदनुसन्धानकार्यमेव कर्तुमभिलषामि ।

स्वजीवनस्यादर्शानां विषये यत्प्रधानतो वक्तव्यं तत् खलु अस्यात्मवृत्तान्तीय प्रकरणस्य प्रारम्भ एव स्पष्टरूपेणोक्तम् ।

साम्प्रतमेव प्रकाशितः 'असाम्प्रदायिक दृष्ट्या विश्वमानवीय दृष्ट्या च जीवनदर्शनस्य प्रतिपादकः' 'जीवनज्योतिः' अथवा 'वैदिक गीताञ्जलिः' इत्याख्यो ग्रन्थ एकप्रकारेण मम जीवनप्रगतेरेव जीवनादर्शानां वा व्याख्यारूप इति पूर्वमवोचाम ।

नैव तत्प्रतिपादनं पुनरुक्तिमपेक्षते । तथापि ततः कश्चिदंशोऽत्र समुद्ध्रियते, **यो वै मम जीवनयात्रायाः प्रकाशस्तम्भरूपः--**

(क्रमशः)

१--अस्मिन्नेव ग्रन्थे इतः पूर्वं तत्प्रकाशितं विद्यते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्निमन्त्रमाला

(श्री अरविन्दप्रणीत 'Hymns to the Mystic Fire' ग्रन्थस्य धारावाहिकोऽनुवादः, अनुवादकोपज्ञेन भावार्थेन तदुपज्ञनानाविधटिप्पणीभिश्च संवलितः)

अनु० श्री जगन्नाथो वेदालंकारः

स नः पावक दीदिवोऽग्ने देवां इहा वह ।
उप यज्ञं हविश्च नः ॥१०॥

१ सः २ नः ३ पावक ४ दीदि-वः ५ अग्ने ६ देवान् ७ इह ८ आ ९ वह १० उप ११ यज्ञम् १२ हविः १३ च १४ नः ।

4 O Shining 5 flame 1,3 thou who purifiest 7 hither 8,9 bear (2 for us) 6 the Gods 10 to 14 our 12 offerings 13 and 10 to 14 our 11 sacrifice.

३ हे परिशोधक ! ४ महातेजोमय ५ अग्ने! १ पूर्वकीर्तितः प्रसिद्धस्त्वम् २ अस्मभ्यम् ७ अत्र अन्तर्यजनवेदौ १४ अस्माकम् ११ अन्तर्यागम् १२ पूर्वोक्तहव्यसमूहम् १३ च प्रति, तयोः १० समीपे, ६ देवान् ८,९ प्रापय ।

भावार्थः

हे देदीप्यमान अग्ने, हे परमपावक, इह अस्माकं यज्ञं हव्यं च प्रति देवानाहर ।

व्याकरणम्

४ दीदि-वः । द्र. १ १२.५[2] ।

स नः स्तवान आ भर गायत्रेण नवीयसा ।
रयिं वीरवतीमिषम् ॥११॥

१ सः २ नः ३ स्तवानः ४ आ ५ भर ६ गायत्रेण ७ नवीयसा ८ रयिम् ९ वीर-वतीम् १० इषम् ॥

1 Thou 3 adored 7 by our fresh 6 Gayatri rhythms 4.5 bring 2 for us 8 the felicity and 10 force 9 full of hero's strength.

७ नवतरेण ६ गायत्रीछन्दोबद्धस्तोत्रेण ३ स्तूयमानः १ पूर्वमभिगीतः त्वम् २ अस्मभ्यम् ८ आनन्दनिधिं ९ वीरत्वपरिपूर्णां, शौर्यवीर्योपेतां १० प्रेरयित्रीं शक्तिं च ४,५ आहर ।

भावार्थः

हे अग्ने ! अस्माकं नव्यतरेण गायत्रस्तोत्रेण संस्तुतस्त्वमस्मभ्यमानन्दैश्वर्यं पराक्रमशालिनीं शक्तिं चाहर ।

व्याकरणम्

३ स्तवानः । ष्टुञ् स्तुतौ इत्यस्मात् कर्मणि लटः शानचि छान्दसं रूपम् ।

५ भर । हृ धातो र्लोण्मध्यमैकवचनम् । हृस्य भश्छान्दसः ।

६ गायत्रेण । गायत्र्या इदं गायत्रं तेन ।

९ वीर-वतीम् । वीरशब्देन वीरत्वं लक्ष्यते । वीरः अर्थात् वीरत्वं वीर्यं वाऽस्यामस्तीति ताम् ।

१० इषम् । एषणं गतिः प्रेरणं वा । तदेव इट् । इष गतौ इत्यस्माद् दैवादिकात् स्त्रियां भावे क्विप् । तदन्तात् 'इष्' शब्दात् द्वितीयैकवचनम् । अन्तरर्थेऽयं शब्दः प्रेरणबलस्य प्रकाशशक्तेर्वा वाचकः ।

अग्ने शुक्रेण शोचिषा विश्वाभिर्देवहूतिभिः ।
इमं स्तोमं जुषस्व नः । १२॥

१अग्ने २शुक्रेण ३ शोचिषा ४विश्वाभिः ५ देवहूति-भिः ६ इमम् ७ स्तोमम् ८ जुषस्व ९ नः ॥

1 O fire 3 with thy lustres 2 white and 4 all 5 thy divine hymns that summon the Gods 8 come and accept 6 this 7 hymn 9 that we affirm.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१ हे तपोदेव अग्ने ! स्वात्मनः २ शुभ्र-श्वेतेन तेजसा, ३ स्वीयशुभ्रप्रभाभिः स्वकीयैः ४ सर्वैरपि ५ देवाह्वायकैः दिव्यसूक्तैश्च युक्तस्त्वं तैः सहात्रागत्य ६ अस्माकम् ६ इदं स्तोत्रं ८ प्रीत्या सेवस्व ।

भावार्थः

हे अग्ने ! निजसमुज्ज्वलज्योतिःप्रभाभिः देवाह्वानकरीभिर्दिव्यस्तुतिभिश्च सह त्वमत्र समेहि, स्वीकुरु चास्माकमिदमस्माभिर्गीयमानं स्तोत्रम् ।

व्याकरणम्

५ देवहूति-भिः । देवानां हूतयः आह्वानानि यासु स्तुतिषु ताभिः ।

(क्रमशः)

गुरुकुल पत्रिका के नियम

१ 'गुरुकुल पत्रिका' मासिक है । यह प्रत्येक अंग्रेजी मास की १२, १३ तारीख को प्रकाशित होती है ।

२ यह आधी संस्कृत में तथा आधी हिन्दी में होती है । इस में कवर समेत प्रायः ४४ पृष्ठ होते हैं । वर्ष में एक या दो विशेषांक लगभग १२०-१५० पृष्ठों तक के होते हैं ।

३ इसमें प्रमुख रूप से लेख वैदिक-साहित्य, भारतीय-संस्कृति-सम्बन्धी होते हैं ।

४ वार्षिक मूल्य देश में ४) और विदेश में ७) है, जो धनादेश (मनीआर्डर) द्वारा ही "**सम्पादक : गुरुकुल-पत्रिका**" के नाम से आना चाहिए । ग्राहक कभी भी बन सकते हैं ।

५ लेख छोटे, सारगर्भित तथा मौलिक होने चाहिएं । शुद्ध, सुपाठ्य तथा एक ओर लिखे होने चाहिएं । लेख, कविता तथा समालोचनार्थ पुस्तकें (२ प्रतियां), परिवर्तनार्थ पत्र-पत्रिकाएं सम्पादक के नाम भेजनी चाहियें ।

६ किसी लेख अथवा कविता आदि के प्रकाशित करने या न करने, घटाने-बढ़ाने या संशोधन करने का अधिकार सम्पादक को है । बिना डाक खर्च भेजे अप्रकाशित कविता वा लेख लौटाये न जा सकेंगे ।

सम्पादक—गुरुकुल पत्रिका, डाकघर : गुरुकुल कांगड़ी

जिला : सहारनपुर (उ० प्र०)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ध्वनितत्त्वम्

डा० रामनारायणदासः

तत्र वीरो नाम विविधमीरयति विश्ववैचित्र्यमिति भगवान् शब्दराशिरिति भट्टारकः। तदुक्तं चिद्गगनचन्द्रिकायाम्--

ईरणेन विविधेन वीरतां यो यदक्षरयणः प्रपद्यते। वीरसम्बन्धी धर्मो वीर्यमित्युच्यते। मन्त्राणां वीर्यमिति मन्त्रवीर्यम्। तच्च वीर्यं पूर्णाहङ्कार एव। यदि त्वमात्मानं देहमात्रं मन्यसे, तर्हि तव देहाधिकृतं यावद् विद्यते, तावदेव अधिकर्तुं समर्थः। तदधिकं चेद् वाञ्छसि तर्हि दण्डभीतिः। तदुक्तं भट्टगङ्गाधरमिश्रैः--

अपूर्णम्मन्यता व्याधिः कार्पण्यैकनिदानभूः।
क्लेशावहो जुगुप्सश्च सर्वधर्मबहिष्कृतः॥
आनन्दकणभिक्षार्थं शब्दस्पर्शादिपक्वणे।
अटत्यविरतं येन तद्दारिद्र्यं विदुर्बुधाः॥

यदि च त्वम् अकारहकारप्रत्याहारात्मा गर्भीकृताशेषविश्वसमग्रशास्त्रप्रसरप्रथमाङ्कुरः चित्स्वरूपः पूर्णाहन्तारूपो यो भगवान् शब्दराशिः तदात्मना स्वात्मानं परामृशसि तर्हि यावदुतद् अधिकृतम्, तावद् अनुशास्तुं समर्थः। चित्स्वरूपस्य अहमित्यस्य मन्त्रवीर्यत्वमुक्तं श्रीसंवित्स्तोत्रे--

आदिमान्तगृहीतवर्णाराश्यात्मिकाहमिति या स्वतः प्रथा।
मन्त्रवीर्यमिति साधितागमैस्तन्मयो गुरुरसि त्वमम्बिके॥

अस्येदं तात्पर्यम्--प्रकाशविमर्शात्मका अकार-हकारौ मध्यवर्तिनां लौकिकवर्णमालाघटकानां समेषां वर्णानां बोधकौ अथ च स्वात्मनोरपि। यथा पाणिनीयशास्त्रे 'आदिरन्त्येन सहेता' इति सूत्रेण निष्पन्ना अणादिप्रत्याहाराः अकारादिध्वनीनामथ च मध्यपतितवर्णानां बोधकास्तथा अत्रापि ब्रह्मनिष्ठस्पन्दभूतौ अकारहकारावपि। भेदस्तावद् उभयत्र अयमस्ति यत्पाणिनीयव्याकरणशास्त्रे अणादिसंज्ञाभिः, अन्त्यस्य णकारादे ग्रहणं न क्रियते, इत्संज्ञकत्वात्। किन्त्वहमिति इत्यत्र हकारोऽपि 'अह' इति प्रत्याहारेण गृह्यते। ब्रह्मनिष्ठप्रकाशविमर्शयोः समरसीभूते 'अहम्' इत्यत्र प्रत्याहृताः स्वरव्यञ्जनात्मकाः सर्वे ध्वनयो भगवतः शक्तिस्वरूपाः।

परमात्मनि अकारककारादि स्वरव्यञ्जनवाच्यानामशेषशक्तीनामभेदरूपतया समन्वयो विद्यते। अत एव निष्कले ब्रह्मणि पूर्णाहन्ता स्वाभाविको धर्मः। निखिलं स्वरव्यञ्जनात्मकं सार्थकं निरर्थकञ्च ध्वनिम्, अथ च निखिलं विश्वं मयूराण्डरसे पुच्छपादाङ्गानीव यद्वा वटबीजे शाखापल्लवादीनि इव अभेदरूपतया गर्भीकृत्य परात्मनि परावागात्मकं चित्स्वरूपं 'अहम्' इति स्फुरति। उक्तञ्च योगिनी हृदयस्य मन्त्र सङ्केत निरूपणे--

अतोऽकारहकाराभ्यामहमित्यपृथक्तया।
प्रपञ्च शिवशक्तिभ्यां क्रोडीकृत्य प्रकाशते[1]॥

परावागात्मकमिदं स्फुरणं '**स्वरूपज्योतिरेवान्तः परावागनपायिनी**' इत्युक्त्या स्वतः प्रकाशस्वरूपा। पश्यन्त्यादिकं वैखरीपर्यन्तञ्च उत्तरोत्तरं क्रमशः प्रकाशयति। विमर्शस्वभावा विगलितोपरागा निरोधकाभावाद् अनिशं स्फुरद् रूपतया च स्वरसवाहिनीयमहन्ता चेतनाचेतनात्मकस्य जगतः देशकालादिभेदकानाञ्च स्वात्मन्यसम्भवाद् अद्वितीयः सन् आगमेषु अहमित्यभिहितः। स एव

---

१ नित्यषोडशिका पट १२ श्लोक ४४तमस्य शिवानन्दकृत ऋजुविमर्शिनी व्याख्यायामयं श्लोकः समुद्धृतः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनाहृत महाध्वनिभट्टारकः । नित्यं स्फुरद्रूपतया तद्विशिष्टतया च परब्रह्मापि तद्रूपमेवेति परावागात्मिका पूर्णाहन्ता च तदभिन्ना ।

एतत्सर्वम् अद्वैतवादिनां मतानुसारेण ध्वनितत्त्वं व्याख्यातम् । द्वैतवादिनां मतानुसारेण तु परावागात्मनो ध्वनेः विन्दोः समभिव्यक्तिः । यथा बौद्धमतानुयायिनो **'बुद्धो धर्मः संघश्च'** इति रत्नत्रयमङ्गीकुर्वन्ति, एवं भेदवादिनस्तान्त्रिका अपि शिवः शक्तिः बिन्दुः इति रत्नत्रयं मन्यन्ते । शिवः पुरुषनाम्ना अथ च शक्तिर्मायानाम्नाऽप्यभिधीयते । शक्तेश्चापरं नाम 'एकोऽहं बहु स्याम्' इत्येवं रूपा इच्छा । बिन्दुश्च त्रिगुणात्मिका प्रकृतिरुच्यते । अयञ्च बिन्दु नादबीजभेदेन त्रिधा भिद्यते । उक्तञ्च—

कालेन भिद्यमानस्तु स बिन्दुर्भवति त्रिधा ।
स्थूलसूक्ष्मपरत्वेन तस्य त्रैविध्यमिष्यते ।
स बिन्दुबीजनादभेदेन च निगद्यते ॥

—प्रपञ्चसार० तं० पट० १२, श्लो० ४३ ।

गुणत्रयात्मकाद् यो बिन्दुः समुत्पद्यते स स्थूलः, तन्मूलभूतश्च योः विन्दुः स सूक्ष्मः, क्षुम्यमाणात् सूक्ष्मविन्दोः चेतनमिश्रो नादः समुत्पद्यते । उक्तञ्च—

विन्दोस्तस्माद् भिद्यमानाद् रवो व्यक्तात्मको भवतु स एव श्रुतिसम्पन्नैः शब्दब्रह्मेति गीयते ।

बिन्दुसमुद्भूतश्चायं नाद एव परावाङ्नाम्ना व्यपदिश्यते । परादिवाचां स्वरूपविषये द्वैताद्वैतिनोरुभयोर्मते साम्यमपि विद्यते । परावाक् चेतनमिश्रा भुवनादिसृष्टिसमर्था च । विन्दोः संक्षोभात् समुद्भूतो योऽव्यक्तात्मको रवः, स एव नाभिहृदयादिदेशं क्रमशः उत्तरोत्तरं प्राप्य पश्यन्त्यादिरूपम् उपाधिमाश्रयति । विन्दोः शब्दात्मिका वृत्तिरेव परादिभेदेन चतुर्धारूपं भवति । सर्वप्राणिषु च आसां परादिवाचां सत्ता स्वीक्रियते । पुण्यापुण्यादिकर्मोपाध्यवच्छिन्नत्वात् प्राणिषु न्यूनाधिक्येन परादिवृत्तीनामुदयो दृश्यते परादिवृत्तीनां विषमरूपेण प्राणिषूदयात् कस्यचिज्ज्ञानमुत्कृष्टम्, कस्यचिच्च मध्यमं अपकृष्टं वा दृश्यते । परादिवाचाम् अतिक्रमणे सत्येव शिवत्वलाभो मोक्षः सम्प्राप्यते ।

तदेव विन्दुः संक्षुब्धः सन् यथा इन्द्रियभोगभुवनादीनि सृजति, तथैव परादिध्वनिमपि । द्वैतमते परावाग्रूपो ध्वनिः विन्दोर्वृत्तिविशेषभूतः । अस्यातिक्रमणे सति मोक्षलाभः । यद्यपि त्रिगुणात्मकः सूक्ष्मो बिन्दुः विशुद्धः सत्त्वगुणस्याधिक्यात् अद्वैतवादिनां मते तु परावाग्रूपो ध्वनिः, ब्रह्मणः स्वतन्त्राचिन्मयी शक्तिः । चित्तस्वरूपा इयञ्च वाक् पूर्वोक्तपूर्णाहन्तात्मना परमात्मन्यभेदेन विराजते । नित्यमभेदसम्बन्धस्य सत्त्वाच्च परब्रह्मापि तन्मयम् ।

अत्र युक्तायुक्तत्वविचारः—

वस्तुतस्तु महाविन्दोरूर्ध्वं चित्कला यद्वा चिच्छक्तिः स्वच्छन्दतया परिक्रीडति । क्रीडेयं परायावाचो यद्वा परमात्मनो विलासरूपा । सा च परावाक् चिन्तनशून्या आत्माश्रिता अनपायिनी च । विशेषोपायैर्यदा मनः निःसङ्कल्पम् तदा चिदात्मरूपया परया वाचा सह तस्यानवरतरूपेण सम्बन्धः अखण्डानन्दश्चानुभूयेते । परमात्मनि गर्भीकृताशेषविश्वं चिन्मयम् अहमात्मकं यत्स्फुरणम्, तदेव प्रथमो ध्वनिः, स एव ध्वनिः परावाङ्नाम्ना आम्नातः । महाविन्दोः पराया वाचः जनित्वमसङ्गतं प्रतिभाति । कस्यचिदपि स्पन्द-

---

१ योगिनीहृदयदीपिकायां मन्त्रसङ्केतनिरूपणे २१-२२तमेषु श्लोकेषु दीपिकासेतुबन्धाख्यटीकायामयं श्लोकः मानिनीशास्त्रसिद्धान्ततन्त्रात् समुद्धृतः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नस्य यद्वा समुत्पत्तेर्ध्वनिशून्यत्वाभावात् । ब्रह्मणि 'एकोऽहं बहु स्याम्' इत्येवं स्पन्दनं यदा समभवत् तदव्यवहितक्षण एव ध्वनिरभूत् । किञ्च वैयाकरणलघुसिद्धान्तमञ्जूषायां शक्त्याश्रयनिरूपणावसरे यो नादाभिव्यक्तिक्रमो दृश्यते स अविचारितरमणीयः, मञ्जूषोक्तक्रमोऽधस्तात् समुद्धृतः——

ततोऽपरिपक्वप्राणिकर्मभिः कालवशात् प्राप्तपरिपाकैः स्वफलप्रदानाय भगवतोऽबुद्धिपूर्विका सृष्टिर्मायापुरुषौ प्रादुर्भवतः । ततः परमेश्वरस्य सिसृक्षात्मिका मायावृत्तिर्जायते । ततो बिन्दुरूपम् अव्यक्तं त्रिगुणं जायते । इदमेव शक्तितत्त्वम् । तस्य बिन्दोरचिदंशो बीजम् । चिदचितमिश्रोंऽशो नादः । चिदंशो बिन्दुरिति । अचिच्छब्देन शब्दार्थोभयसंस्काररूपाऽविद्या उच्यते ।

अस्माद् बिन्दोः शब्दब्रह्मापरनामधेयं वर्णादिविशेषरहितं ज्ञानप्रधानसृष्ट्युपयोग्यावस्थाविशेषरूपं चेतनमिश्रं नादमात्रमुत्पद्यते । एतज्जगदुपादानमेव रव पराआदिशब्दैर्व्यवह्रियते । इति प्रोक्तम् ।

"अबुद्धिपूर्विका" इति नागेशोक्तघटकस्य अबुद्धिपदस्य 'परमेश्वरस्य स्वभावः लीलाच' इति पर्यायौ । स्वभावः कीदृग् इति चेत् बहुत्वभवनरूपः परिस्पन्दः । यद्वा रन्तुमिच्छारूपः तदुक्तं काशीखण्डे——

यदेकलो न शक्नोसि रन्तुं स्वैरञ्चरप्रभो ।
तदिच्छा तव योत्पन्ना सैषा शक्तिरभूत्तव ।।

अस्माद्बिन्दोः शब्दब्रह्मापरनामधेयम् इति पूर्वोद्धृतनागेशवाक्ये 'अस्माद्बिन्दोः' इत्यनेन त्रिगुणात्मकबिन्दोर्ग्रहणम्, न तु त्रिदंशो बिन्दुरित्यस्य । अत्र प्रक्रियायां पूर्वं रन्तुमिच्छा ततस्त्रिगुणात्मको बिन्दुः, ततश्चेतनमिश्रो नादः, इत्येवं क्रमः । रन्तुमिच्छारूपं परिस्पन्दजन्यत्रिगुणात्मकबिन्दोरभिव्यक्त्युत्तरं नादः, समजनि । परायावाचः स्वरूपविषयेऽयमेव नागेशस्य सिद्धान्तः। परन्तु परायाः वाचोऽयं क्रमो विश्वासं न समारोहति । ब्रह्मणि एकोऽहं बहुस्याम्, इत्येवं यदा परिस्पन्दः समभूत् तदव्यवहितोत्तरमेव ध्वनिरभिव्यक्तः । कस्यचिदपि परिस्पन्दस्य ध्वनिशून्यत्वाभावात् । यद्वा कस्यचिदपि ध्वनेः स्पन्दशून्यत्वाभावात् । अतएव स्पन्दध्वनयोः अपृथकत्वमामनन्ति मनीषिणः । अतएव स्पन्दप्रदीपिकायां स्पन्दः सविन्मूलं ध्वनिरूपमिति बहुशो व्याख्यातः । किञ्च उभयोः साहचर्याद् ध्वनिरेव स्पन्दः, स्पन्द एव ध्वनिः इत्यपि व्यवहर्तुं शक्यते । तस्माद् ब्रह्मणि स्पन्दनस्य यद्वा सम्विद्शक्तेः त्रिकालाबाध्यत्वात् परायावाचश्च सम्बित्स्वरूपत्वात् शक्तिशक्तिमतोरभेदाच्च ब्रह्मणा सह तस्याः अद्वैतमेव समायातीति शम् ।

—

'उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः'

कार्य परिश्रम से सफल होते हैं, केवल चाहने से नहीं । अतः सब पुरुषों को पुरुषार्थ करना चाहिये ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैदिकसाहित्यसौदामिनी

श्री वागीश्वरो विद्यालंकारः, साहित्याचार्यः

पञ्चम उन्मेषः

तत्र ध्वनिविमर्शः

चतुर्थोन्मेषे साङ्गोपाङ्गा व्यञ्जना निरूपिता। अथ व्यञ्जनालभ्यस्य अर्थस्य वाच्यार्थातिशायित्वे तस्य ध्वनित्वम् उत्तमकाव्यत्वं च प्राचीनाचार्यैः श्रीमदानन्दवर्धनप्रभृतिभिर्यत् प्रतिपादितं तत् तेषु बहुमानात् प्राप्तावसरं प्रस्तूयते--

प्राचीनाः प्राहुराचार्या आनन्दवर्धनादयः,
ध्वनिं नामोत्तमं काव्यं व्यङ्ग्ये वाच्यातिशायिनि।।१
अतादृशे पुनर्व्यङ्ग्ये तुल्ये हीनादिकेऽथवा,
मध्यमं तु गुणीभूतव्यङ्ग्याख्यं संप्रचक्षते ।।२

इह प्रथमं ध्वनेरेव प्रासङ्गिकत्वाद् गुणीभूतव्यङ्ग्याख्यं मध्यमं काव्यं केवलनामतो निर्दिश्य प्रकृतमनुसरामः। ध्वन्यतेऽस्मिन्निति ध्वनिनामकम् उत्तमं काव्यम्। ध्वन्यते इति ध्वनिर्यस्त्वलङ्काररसादिरूपोऽर्थः। ध्वनतीति ध्वनिः शब्दोऽर्थो वा। ध्वननं ध्वनिः शब्दादेर्व्यापारविशेषः। एवं ध्वनिपदं प्रकरणानुसारमनेकार्थकम्।

अभिधा लक्षणा मूलतयाऽऽदौ द्विविधो ध्वनिः।
विवक्षितेऽपि वाच्येर्थेऽन्यनिष्ठे सोऽभिधोत्थितः ।।३

अभिधामूलो लक्षणामूलश्चेति ध्वनिः प्रथमं द्विविधः। अभिधामूलध्वनौ वाच्यार्थो विवक्षितोऽप्यन्यपरको यतः स प्रधानप्रतिपाद्यस्य व्यङ्ग्यार्थस्य रसभावादेर्वा प्रतीतौ अङ्गतां गच्छति। ध्वनेर्द्वितीयो भेदो लक्षणामूलो यत्र लक्षणामूलत्वादेव बाधितस्य वाच्यार्थस्य न विवक्षा तादूप्येण वोपयोगः। अतः स क्वचित् स्वकीय एव विशिष्टार्थे संक्रान्तो भवति, क्वचिन्मुख्यार्थस्य सर्वथा हाने तस्य अत्यन्ततिरस्कृतता वा। एवं लक्षणामूलोऽयं ध्वनिर्द्विविधः। अभिधाया मुख्यवृत्तित्वाद् यद्यपि तन्मूलो ध्वनिरेव प्रथमं स्थानमर्हति, तथापि लक्षणामूलयोर्ध्वनिभेदयोः स्वल्पविषयत्वाद् सूचिकटाहन्यायेन तयोरेव प्रथमं प्रतिपादनमुचितम्। लक्षणामूलध्वनेर्द्वौ भेदौ--

ध्वनौ तु लक्षणामूले वाच्यर्थो न विवक्षितः।
संक्रान्तः स्वविशिष्टाऽर्थेऽत्यन्तं वा स्यात् तिरस्कृतः ।।४।।

अर्थान्तरसंक्रान्तो ध्वनिर्यथा--

ग्रसमानमिवौजांसि सदसा गौरवेरितम्।
नाम यस्याभिनन्दन्ति द्विषोऽपि स पुमान् पुमान् ।।

किरातार्जु० ११.७३ ।।

अत्र प्रथमः पुमानिति शब्दः पुरुषमात्रार्थकः द्वितीयस्तु श्लाघ्यः पुमानिति तद्गुणविशिष्टपुरुषार्थकः, अन्यथा पुनरुक्तिदोषापत्तिः। एवम्--

त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति।
आत्मीयां मतिमास्थाय स्थितिमत्र विधेहि तत् ।।
काव्यप्र४।२३।।

इह संबोध्यस्य पुंसः पुरतः स्थित्यैव लभ्यत्वेऽपि 'त्वाम्' इति पदमनुपयुक्तं सद् विशेषतो ममोपदेशपात्रं त्वामिति, वक्तरि विद्यमानेऽपि अहमर्थकम् अस्मीति पदं तवाऽहम् अत्यन्तहिताभिलाषीति। एवं वच्मीति पदं सामान्यतया कथनमात्रपरमपि उपदिशामीति स्वरूपं स्वं स्वं विशिष्टमर्थं प्रति संक्रान्तम्। अस्मीति पदम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहमर्थे तिङन्तप्रतिरूपकम् अव्ययं प्रसिद्धम् ।
यथा वा--

हत्वाय देवा असुरान् यदाऽऽयन् ।
देवा देवत्वमभिरक्षमाणाः ॥

ऋ० १०।१५७।४

देवता विश्वेदेवाः, ऋषिः भुवन आप्त्यः साधनो वा भौमनः, छन्दः द्विपदा त्रिष्टुप्--

हत्वायेति-देवास्तेजसा प्रदीप्ताः सुक्षत्रियाः। देवत्वं रक्षमाणाः शत्रुं विजित्याऽपि तत्र निरपराध-प्रजा जनेषु स्त्रीषु च अत्याचारमकुर्वाणाः । असुरान् दुष्टशत्रून् हत्वाय निहत्य क्त्वो यक् (पाणि० ७.१.४७) यदा स्वदेशमायन् आगच्छन्ति तदा ते यथार्था देवाः उच्यन्ते । अत्र द्वितीयं देवा इति पदं विशिष्टदेवपरकत्वात् अर्थान्तरसंक्रमितवाच्यम् ॥

तथा--

परं मृत्यो अनुपरेहि पन्थां
यस्ते अन्य इतरो देवयानात् ।
चक्षुष्मते शृण्वते ते ब्रवीमि,
मा नः प्रजां रीरिषो मोत वीरान् ॥

ऋ० १०.१८.१

देवता-मृत्युः । ऋषिः-संकसुको यामायनः । छन्दः-त्रिष्टुप् ।

परं मृत्यो इति मन्त्रेऽस्मिन् मृत्योः कश्चित् कल्पितोऽधिष्ठातृदेवश्चेतनव्यक्तिवत् सम्बोध्यते । सर्वदेवमयः परमेश्वरो वा । तदुक्तम्-'....एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः।' ऋ०१।१६४।४६। हे मृत्यो! देवयानात्(१)मार्गात् इतरो भिन्नो यस्ते अन्य एव मार्गोऽस्ति पितृयाणाख्यः । परा अस्मत्पराङ्मुखः सन् त्वं तम् मार्गं अन्विहि अनुसर । जितेन्द्रिया योगिनो विद्वांसो हि देवाः । ते येन यानेन जीवनसरण्या यान्ति व्यवहरन्ति तद्देवयानम् । तेन पथा गच्छतो मृत्युंजयान् मृत्युर्न निहन्ति । ते हि स्वेच्छया देहं जहति भीष्मादिवत् । इतरेण पितृयाणाख्येन पथा गच्छतो भोगिनो मर्त्यान् मृत्युर्हन्ति ते हि पुनः पुनर्म्रियन्ते जायन्ते च । हे मृत्यो ! यतो हि त्वं चक्षुष्मान् शृण्वंश्चासि तस्मात् चक्षुष्मते शृण्वते च ते ब्रवीमि । किं ब्रवीमि ? यत् त्वं नः प्रजां संततिपरम्पराम् वीरान् पुत्रांश्च मा रीरिषः मा हिंसीः ॥ मृत्यौ चेतनव्यक्तित्वारोपे कृते तस्य विलोकनश्रवणशक्तिमत्त्वं नाऽनुपपन्नम् । इह चक्षुष्मते शृण्वते इति पदे न केवलं नेत्रवत्त्वं श्रवणवत्त्वमात्रमेव वाऽर्थं प्रतिपादयतः किन्तु तयोः प्रकर्षम् । अन्यथा प्रायः सर्वेषामेव प्राणिनां चक्षुरादिमत्त्वादिह तयोः पृथगुपादानं व्यर्थं स्यात् । एवं ब्रवीमीति पदमपि कथनस्य प्रार्थनारूपे स्वविशिष्टार्थे संक्रान्तम् ।

१-अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्म विदोजनाः ॥
धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् ।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥
शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ।
एकया यात्यनावृत्तिमन्यया वर्तते पुनः ॥
भग० गीता ।अ०८।श्लो०२४-२६

२- त्रयस्त्रिंशत्त्वेव देवाः इति । कतमे ते त्रयस्त्रिंशदिति ? अष्टौ वसवः+एकादशरुद्राः+द्वादशादित्यास्ते एकत्रिंशत्+इन्द्रश्च+प्रजापतिश्चेति त्रयस्त्रिंशाविति । अष्टौ वसवः-अग्निः+पृथिवी+ वायुः + अन्तरिक्षम् + आदित्यः+द्यौ+चन्द्रमाः+नक्षत्राणि चेति=८। रुद्राः=पुरुषे१०प्राणाः+एकादश आत्मा=११। आदित्याः=द्वादशमासाः।=३३ ।
बृहदारण्यकोपनि०, अध्याय३।ब्राह्म२,३,४,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथैव--

तनूनपादसुरो विश्ववेदा देवो देवेषु देवः ।
पथो अनक्तु मध्वा घृतेन ॥ यजु०अ०२७।मं०१२॥

देवता-विश्वेदेवाः । ऋषिः-अग्निः । छन्दः-वराड्गायत्री ।

ग्रीष्मावकाश के पश्चात् विश्वविद्यालय के विभिन्न विभागों में अब अध्ययन व अध्यापन प्रारम्भ हो गया है। विद्याविनोद, विद्यालंकार, एम-ए , एम-एस-सी, इन्टर साइंस, बी० एस-सी आदि की कक्षाओं में प्रवेश आरम्भ है। प्रवेश की अन्तिम तिथि ७ अगस्त है, पश्चात् ३१ अगस्त तक २० रुपये विलम्ब शुल्क सहित कुलपति जी की आज्ञा से प्रवेश हो सकेगा।

सत्रारम्भ पर विशेष व्याख्यान

गुरुकुल कांगड़ी विश्वविद्यालय के भूतपूर्व कुलपति तथा शिक्षाशास्त्री व मनोवैज्ञानिक तथा यशस्वी साहित्यकार श्री पं० सत्यव्रत जी सिद्धान्तालंकार ने १७।७।७४ को नये शिक्षा-सत्र का उद्घाटन किया। सभा की अध्यक्षता कुल के वर्तमान कुलपति श्री डा० सत्यकेतु विद्यालंकार ने की। आचार्य रामनाथ जी वेदालंकार ने पं०सत्यव्रत जी का सामान्य परिचय दिया। तदनन्तर अपने उद्घाटन-भाषण में श्री पं० सत्यव्रत जी ने जहां अनेक पुरानी यादें ताजा की, वहां उन्होंने कहा कि हमें गुरुकुल में एक ज्योतिपूर्ण वातावरण तैयार करना चाहिए। केवल भवन बनाने से ही काम नहीं चलेगा। यहां के प्रत्येक छात्र व अधिकारी अथवा कर्मचारी के जीवन पर गुरुकुल की अपनी एक अलग संस्कृति की छाप होनी चाहिए। प्रत्येक के हृदय में संस्था के प्रति एक दर्द होना चाहिए। कुल के प्रति हमारे मनों में अपकार भावना नहीं आनी चाहिए।' अन्त में मान्य कुलपति जी ने उनके प्रति हार्दिक आभार प्रकट किया। ज्ञात हो कि श्री पं० सत्यव्रत जी ने अपनी वर्तमान आयु के ७७ वर्षों में से ४०. वर्ष गुरुकुल की सेवा में

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लगाये तथा गुरुकुल को विश्वविद्यालय स्तर की मान्यता दिलाने में उनका प्रमुख उद्योग रहा। हम पण्डित जी का पत्रिका-परिवार की ओर से सादर अभिनन्दन करते हैं।

आर्यसमाज की अपूर्व विजय व कुलपति-सम्मान

हार्दिक प्रसन्नता का विषय है कि गुरुकुल कांगड़ी की स्वामिनी सभा आर्य प्रतिनिधि सभा पंजाब का पंजाब सरकार के साथ 'भारत वर्ष का इतिहास' नामक पुस्तक पर चला आ रहा विवाद समाप्त हो गया है। इस पुस्तक में वेदों व महापुरुषों के विषय में अनर्गल व बेहूदी बातें लिखी हुई थीं। जिसके कारण एक भयंकर आन्दोलन की आशंका हो गयी थी किन्तु पंजाब के मुख्य-मन्त्री ज्ञानी जैलसिंह जी ने सभा प्रधान स्वामी इन्द्रवेश जी तथा महामन्त्री वीरेन्द्र जी, प्रस्तोता श्री स्वामी अग्निवेश जी तथा वरिष्ठ उप प्रधान श्री रामगोपाल जी शालवाले तथा श्री पृथ्वीसिंह जी आजाद से अपनी कोठी पर विचार विनिमय के बाद कहा कि इस पुस्तक को तत्काल ही पाठ्यक्रम से हटा दिया जायगा और दो महीने के अन्दर दूसरी पुंस्तक तैयार की जाएगी। पुस्तक तैयार करवाने वाली समिति में गुरुकुल कांगड़ी विश्वविद्यालय के कुलपति श्री डा० सत्यकेतु जी भी हैं। हम आर्य प्रतिनिधि सभा पंजाब को इस विजय पर बधाई देते हैं।

मान्य अभ्यागत

इस मास भूतपूर्व स० मुख्याधिष्ठाता श्री पं० धर्मपाल जी विद्यालंकार गुरुकुल पधारे। उन्होंने मान्य कुलपति जी से भेंट की। साथ ही २४।७।७४ को श्री केवलक्रृष्ण जी स्पीकर पंजाब विधान-सभा ने गुरुकुल के समस्त विभागों का अवलोकन कर सन्तोष प्रकट किया। कुलपति जी ने उन्हें गुरुकुल की प्रगति और आदर्शों से परिचित कराया। हम मान्य महानुभावों का स्वागत करते हैं तथा आशा करते हैं कि वे गुरुकुल से अपना स्नेह बनाये रखेंगे।

फार्मेसी-समाचार

गुरुकुल और फार्मेसी की उन्नति के लिए आर्य प्रतिनिधि सभा पंजाब ने कुछ नयी नियुक्तियां की हैं। ज्ञात हो कि फार्मेसी के कार्यों को गति देने और व्यवस्था को बनाये रखने के लिए श्री डा० हरिप्रकाश जी आयुर्वेदालंकार व्यवसायाध्यक्ष पद पर नियुक्त किये गए हैं। श्री पं० गणपति जी वेदालंकार पूर्ववत् कार्य करते रहेंगे।

प्रबन्ध-निरीक्षक

विदित हुआ है कि श्री पं० गणपति जी वेदालंकार के नवयुवक सुपुत्र श्री देवराज को गुरुकुलीय प्रबन्ध निरीक्षक नियुक्त किया गया है। अतः प्रबन्धसम्बन्धी किसी भी कष्ट को उनसे कहा जा सकता है। हम श्री देवराज के उज्ज्वल भविष्य की कामना करते हुए आशा करते हैं कि प्रबन्ध के अति उलझनभरे कार्य को वे सुचारू रूप से करते रहेंगे तथा अनेक खामियों की ओर विशेष ध्यान देंगे।

अतिथि सेवा-विभाग

विश्वविद्यालय के अनुभवी तथा युवक प्राध्यापक श्री भारतभूषण जी वेदालंकार को अतिथि-विभागाध्यक्ष नियुक्त किया गया है। वे "सीनेट" आदि में आए मान्य अतिथियों के प्रबन्ध को देखेंगे। आशा है भारत जी अपने मृदु-स्वभाव से सबको प्रसन्न करते रहेंगे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जल-विद्युत-विभाग

बड़ी प्रसन्नता का विषय है कि अनेक वर्षों से जीर्ण-शीर्ण अवस्था में पड़ी हुई अमृत-बाटिका स्थित गुरुकुल की जल-वितरण-टंकी की मरम्मत पूर्ण हो गई है। आशा है आगामी कुछ दिनों में कुलवासियों के गृहों में जल न पहुंचने की कठिनाई दूर हो जाएगी। इस उत्तम कार्य के लिए हम उक्त विभाग एवं नये अधिकारियों का हार्दिक धन्यवाद करते हैं तथा आशा करते हैं कि वे समस्त कुलवासियों की परेशानियों को दूर कर यश के भागी बनेंगे।

आयुर्वेद-महाविद्यालय

हमें यह समाचार देते हुए अत्यधिक दुःख हो रहा है कि गुरुकुल कांगड़ी श्रद्धानन्द-चिकित्सालय के सुयोग्य आर० एम० ओ० व प्राध्यापक श्री डा० सोमप्रकाश जी खन्ना आयुर्वेदालंकार की बम्बई में दुर्घटनावश गम्भीर चोट लगने से कूल्हे की हड्डी टूट गई है तथा अन्य भी चोटें आई हैं। डाक्टर जी अभी गम्भीर अवस्था में हैं। समस्त कुलवासी उनकी चोट से चिन्तित तथा दुःखी हैं। प्रभु से प्रार्थना है कि डाक्टर जी को शीघ्र ही स्वास्थ्य लाभ हो और वे दीर्घकाल तक आयुर्वेद जगत् की सेवा करते रहें।

प्राध्यापकों द्वारा कुलपति जी का अभिनन्दन

कुल के सुयोग्य कुलपति डा० सत्यकेतु जी विद्यालंकार का २६ जुलाई १६७४ को सीनेट हाल में विश्वविद्यालय के प्राध्यापकों ने हार्दिक अभिनन्दन किया। कुलपति जी ने सबका धन्यवाद करते हुए कुल की प्रगति की ओर सबका ध्यान आकर्षित किया। पश्चात् चायपान आदि हुआ।

आर्यसमाज गुरुकुल कांगड़ी

आर्य समाज गुरुकुल कांगड़ी के साप्ताहिक अधिवेशन के उपलक्ष्य में २७।७।७४ को आयुर्वेद जगत् के लब्धप्रतिष्ठित विद्वान् तथा आयुर्वेद महाविद्यालय के वरिष्ठ प्राध्यापक श्री वैद्य रामनाथ जी का 'नमस्ते वायोः' पर सुन्दर प्रवचन हुआ। सदस्यों की भारी कमी रही। हम वैद्य जी के आभारी है।

साथ ही मन्त्री आर्य समाज ने आर्य प्र० स० प० के प्रधान तथा गुरुकुल कांगड़ी विश्वविद्यालय के कुलाधिपति श्री स्वामी इन्द्रवेश जी की गिरफ्तारी के विरोध में निम्नलिखित 'रोष प्रस्ताव' पढ़ा जो कि हरियाणा सरकार के मुख्य मन्त्री श्री बंसीलाल को प्रेषित किया जाएगा।

"आर्य समाज गुरुकुल कांगड़ी आर्य प्रतिनिधि सभा पंजाब के प्रधान तथा गुरुकुल काँगड़ी विश्वविद्यालय के कुलाधिपति श्री स्वामी इन्द्रवेश जी की गिरफ्तारी पर हार्दिक रोष प्रकट करती है और हरियाणा सरकार की वर्तमान नीति का घोर विरोध करती है। पिछले चार मास में श्री स्वामी जी महाराज को दो बार गिरफ्तार करके हरियाणा सरकार ने यहां बता दिया है कि वह हरियाणा में आर्य समाज की गतिविधियों को सहन करने को तैयार नहीं हैं। यह एक ऐसी चुनौती है, जिसे आर्य समाज अवश्य ही स्वीकार करेगा। आर्य समाज आज तक किसी भी सरकार के आगे नहीं झुका और न ही हरियाणा सरकार के आगे झुकेगा।

आर्य समाज गुरुकुल कांगड़ी हरियाणा के मुख्य मन्त्री चौ० बंसीलाल जी को यह चेतावनी देना चाहती है कि उन्होंने आर्य समाज के विरुद्ध

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जो अभियान प्रारम्भ किया है, वह उनके लिए बहुत महंगा पड़ेगा। आर्य समाज ने अभी तक सक्रिय राजनीति में कोई भाग नहीं लिया है। न वह लेना चाहता है। इस पर भी यदि हरियाणा सरकार उसके मान्य नेताओं को स्वतन्त्ररूप से अपने प्रचार की अनुमति देने को तैयार नहीं तो आर्य समाज सामूहिक रूप में उन सब प्रतिबन्धों को तोड़ने पर विवश हो जायेगा, जो हरियाणा सरकार की ओर से उस पर और उसके मान्य नेताओं पर लगाये जा रहे हैं। यह हरियाणा सरकार के अपने हित में होगा कि वह श्री इन्द्रवेश जी के विरुद्ध सब मुकद्दमें वापस ले और उन्हें स्वतन्त्ररूप में आर्य समाज का प्रचार करने दे। यदि उसने ऐसा न किया तो उसका जो भी परिणाम होगा, उसका उत्तरदायित्व हरियाणा सरकार पर होगा।

यह सभा, प्रधान मन्त्री श्रीमती इन्दिरा गान्धी से भी प्रार्थना करती है कि वह इस विषय में हस्तक्षेप करें और हरियाणा सरकार को यह आदेश दें कि वह स्वामी इन्द्रवेश जी के विरुद्ध जो प्रतिशोधात्मक कार्यवाही प्रारम्भ कर रक्खी है उसे बन्द करे।

महावीर 'नीर' विद्यालंकार
मन्त्री
आर्य समाज,
गुरुकुल कांगड़ी विश्वविद्यालय,"

श्री रघुनाथ जी रेड्डी, श्रम मंत्री भारत सरकार का भव्य स्वागत

२७ जुलाई को लगभग १ बजे मध्याह्न में वेद मन्दिर के भव्यभवन में श्रममंत्री भारत सरकार के गुरुकुल पधारने पर उनके स्वागत में एक विशिष्ट सभा का आयोजन किया गया। सभा का संचालन कुलसचिव डा० गंगाराम जी ने की। संस्कृत विभाग के प्राध्यापक श्री बुद्धदेव जी के सुमधुर वैदिक राष्ट्र-गान से सभा की कार्यवाही प्रारम्भ हुई। अनन्तर कुलपति डा० सत्यकेतु जी, आचार्य श्री रामनाथ जी, कुलसचिव डा० गंगाराम जी, स० मुख्याधिष्ठाता श्री डा० वासुदेव जी चैतन्य, आयुर्वेद महाविद्यालय से श्री डा० इन्द्रसेन जी, विज्ञान महाविद्यालय से श्री सुरेशचन्द्र जी, कर्मचारी यूनियन गुरुकुल कांगड़ी व हरिद्वार युवक कांग्रेस की ओर से श्री काश्मीरसिंह राही तथा छात्रों की ओर से ब्र० वेदकुमार ने मान्य अतिथि को मालायें पहनाईं। ब्र० गणेश १३ वीं श्रेणी व ब्र० वेदकुमार व सत्यकाम १४ वीं श्रेणी ने स्वागतगान प्रस्तुत किया। श्री प्रो० वेदप्रकाश जी संस्कृत विभाग ने संस्कृत-भाषा में ही मान्य अतिथि को गुरुकुल का सामान्य परिचय दिया। श्री काश्मीर राही ने कुल के कर्मचारियों की निवासीय कठिनाई को दूर करने की अपील करते हुए श्रममन्त्री जी को मांग-पत्र भी प्रस्तुत किये। श्री अम्बरीष ने हरिद्वार क्षेत्र से मान्य अतिथि का स्वागत किया। गुरुकुल के कुलपति डा० सत्यकेतु जी ने गुरुकुल के आदर्शों की चर्चा कर मान्य अतिथि के प्रति सम्मान प्रकट किया और उन्हें इतिहास के इस तथ्य से अवगत कराया कि ऋषि दयानन्द जब पूर्व में अपने सत्यार्थप्रकाश का निर्माण कर एक सामाजिक व धार्मिक क्रान्ति का बीजारोपण कर रहे थे तो दूसरी ओर उसी समय पश्चिम में कार्लमार्क्स अपने साम्यवादी विचारों का प्रसार कर रहे थे। मान्य कुलपति जी ने कहा कि गुरुकुल शिक्षाप्रणाली ही आज की अनेक समस्याओं का समाधान बन सकती है।

प्रत्युत्तर में अपने विद्वत्तापूर्ण भाषण को आरम्भ करते हुए सबसे पूर्व संस्कृत अथवा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वाध्याय के लिये चुनी हुई पुस्तकें

वैदिक साहित्य

वेदोद्यान के चुने हुए फूल (सजिल्द)	५.00
वेद का राष्ट्रीय गीत (सजिल्द)	५.00
मेरा धर्म (सजिल्द)	७.00
वरुण की नौका (दो भाग)	६.00
अग्निहोत्र (सजिल्द)	२.२५
आत्म-समर्पण	.५०
वैदिक स्वप्न विज्ञान	२.00
वैदिक अध्यात्म विद्या	.७५
वैदिक सूक्तियां	.७५
ब्राह्मण की गौ (सजिल्द)	.७५
वैदिक ब्रह्मचर्य गीत	२.००
वैदिक विनय (तीन भाग)	६.00
वेद गीतांजलि	२.००
सोम सरोवर (सजिल्द)	२.00
वैदिक कर्त्तव्य शास्त्र	.५०
सन्ध्या सुमन	.५०
स्वामी श्रद्धानन्द जी के उपदेश	३.७५
आत्म मीमांसा	२.००
वैदिक पशु यज्ञमीमांसा	२.00
सन्ध्या रहस्य	२.००
अथर्ववेदीय मन्त्रविद्या	३.५०
ईशोपनिषद्भाष्य (सजिल्द)	२.००
अध्यात्म रोगों की चिकित्सा	२.५०
ब्रह्मचर्य संदेश	४.५०
आर्य संस्कृति के मूल तत्त्व	४.००
स्त्रियों की स्थिति	४.००
एकादशोपनिषद्	२.००
विष्णु देवता	२.००
ऋषि रहस्य	२.००
हमारी कामधेनु	२.००

ऐतिहासिक तथा जीवन चरित्र

भारतवर्ष का इतिहास ३ य भाग	४-५०
बृहत्तर भारत	७.००
योगेश्वर कृष्ण	४.००
स्वामी श्रद्धानन्द जी महाराज	.२५
स्वामी दयानन्द का पत्र व्यवहार	.७५
गुरुकुल की आहुति	.५०
अपने देश की कथा	.३७
दी मिडिल ईस्ट (इङ्गलिश)	३.००
ऐंशियण्ट फींडम	५.७०

स्वास्थ्य सम्बन्धी ग्रन्थ

स्तूप निर्माण कला (सजिल्द)	३.००
प्रमेह श्वास अर्शरोग	.२५
जल-चिकित्सा विज्ञान	.७५
होमियोपैथी के सिद्धान्त	२.५०
आसवारिष्ट	२ ५०
आहार	५.००

संस्कृत ग्रन्थ

संस्कृत प्रवेशिका प्रथम भाग	.६६
संस्कृत प्रवेशिका २य भाग	.८७
बालनीति कथामाला	.७५
साहित्य सुधा संग्रह	.२५
पाणिनीयाष्टकम् (दो भाग)	प्रतिभाग ७.००
पंचतन्त्र पूर्वार्द्ध (सजिल्द)	२.५०
पंचतन्त्र उत्तरार्द्ध (सजिल्द)	२.००
सरल शब्द रूपावली	.२५
सरल धातु रूपावली	.६०
संस्कृत ट्रांसलेशन	.२५
पंचतंत्र (मित्र सम्प्राप्ति)	.७५
पंचतंत्र (मित्र भेद)	.५०
संक्षिप्त मनुस्मृति	.५०
रघुवंशीय सर्गत्रयम्	.२५

पुस्तकों का बड़ा सूचीपत्र मुफ्त मंगाइये । धार्मिक संस्थाओं के लिये विशेष रियायत का भी नियम है।

पुस्तक भण्डार, गुरुकुल कांगड़ी विश्वविद्यालय, हरिद्वार (जि० सहारनपुर) ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादक : भगवद्दत्त वेदालंकार ।
प्रकाशक : डॉ० गंगाराम, कुलसचिव : गुरुकुल कांगड़ी विश्वविद्यालय ।
मुद्रक : सुरेशचन्द्र वैष्णव, मैनेजर : गुरुकुल कांगड़ी प्रिन्टिङ्ग प्रेस, हरिद्वार ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल-पत्रिका

पुस्तकालय
गुरुकुल काँगड़ी
28/11/79

गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार

DIGITIZED C-DAC
2005-2006
30 AUG 2006

जुलाई १९७४, आषाढ़ २०३१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषय-सूची

स० विषया:	लेखका:	पृष्ठांका:
१ श्रुति-सुधा		४१७
२ अग्निमन्त्रमाला	श्री अरविन्द:, अनु० श्री जगन्नाथो वेदालंकार:	४१८
३ ऋषयो मन्त्राणां द्रष्टार: कर्त्तारो वा ?	श्री प्रा० भद्रसेन:	४२२
४ भारतविभूति: पं० श्री लेखराम:	श्री हजारीलाल शास्त्री (विद्यालंकार:)	४२६
५ प्रशस्ति: (महाकविशतकात्)	कवीश: श्री रामकैलाशपाण्डेय:	४२७
६ भूस्वर्ग:	श्री जगन्नाथ रिवू शास्त्री	४२८
७ प्लेटो : सामान्यपरिचय:	श्री डा० हरिदत्त पालीवाल: 'निर्भय:'	४२९
८ ध्वनितत्त्वम्	डा० रामनारायणदास:	४३२
९ सम्पादकीय टिप्पण्य:	श्री पं० भगवद्दत्तो वेदालंकार:	४३४
१० साहित्य-समीक्षा	" " "	४३६
११ गुरुकुल-प्रेमियों से एक निवेदन	कुलसचिव, गुरुकुल कांगड़ी विश्वविद्यालय	४३७
१२ प्रवेश-सूचना (गुरुकुल कांगड़ी विश्वविद्यालय)	" " " "	४३९
१३ सोम राजा का आतिथ्य और अग्निमन्थन	श्री भगवद्दत्त वेदालंकार	४४१
१४ अबीर गुलाल उड़ाने वालो···	श्री महावीर 'नीर' विद्यालंकार	४४५
१५ सामवेद हिन्दी-पद्यानुवाद	श्री विद्यानिधि शास्त्री	४४६
१६ सम्बन्धों की महानदी का पानी सूख गया है	श्री सालिक राम शर्मा 'विमल'	४४९
१७ अद्वैत वेदान्त में सृष्टि की व्याख्या	श्रीमती स्वदेश भट्टाचार्य एम.ए.	४५०
१८ ऋण और वह भी घी का	श्री मंजुल मयंक पन्तुल	४५२
१९ गुरुकुल-समाचार	श्री महावीर 'नीर' विद्यालंकार, एम०ए०	४५३

—★—

गुरुकुल-पत्रिका का वार्षिक मूल्य—

देश में - ४ रुपये, विदेश में - ७ रुपये, एक प्रति - ४० पसे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओ३म्

गुरुकुल-पत्रिका

[गुरुकुलकांगड़ीविश्वविद्यालयस्य मासिक पत्रिका]

आषाढ : २०३१, जौलाई १९७४, वर्षम्-२६, अङ्कः ११, पूर्णाङ्कः ३०७

श्रुति सुधा

ओ३म् सुप्रैतुः सूयवसो न पन्था दुर्नियन्तुः परिप्रीतो न मित्रः ।
अनर्वाणो अभि ये चक्षते नोऽपीवृता अपोर्णुवन्तो अस्थुः ॥६॥

हे बृहस्पति ! तुम शिष्य के लिये (सुप्रैतुः) शोभन तथा प्रकृष्ट गति तथा (सूयवसः) श्रेष्ठ अन्नवाले पथिक के (पन्था न) मार्ग के तुल्य हो । (दुर्नियन्तुः) अपनी इन्द्रिय आदियों को नियन्त्रित कर सकने में असमर्थ शिष्य के लिये (परिप्रीतः) प्रीतिपूर्वक व्यवहार करने वाले (मित्रः न) मित्र के सदृश हो । (अनर्वाणः) अहिंसनीय पापरहित स्वाश्रयी (ये) जो गुरुजन (नः अभि-चक्षते) हमारी देख रेख करते हैं वे (अपीवृताः) गुह्य हृदयप्रदेश में रहने के कारण प्रच्छन्न होते हुए भी (अपोर्णुवन्तः अस्थुः) हम शिष्यों के प्रति खुले हुए हैं ।

सुप्रैतुः=सु+प्र+इण् गतौ–सुष्ठु विद्योपेतस्य,––स्वामी दयानन्द
सुष्ठु गन्तुः,–सायणाचार्य

दुर्नियन्तुः–दुःखेन नियमितुः

अपीवृताः–आच्छादिताः, गुह्यहृदयप्रदेशे प्रच्छन्नाः ।

जिसप्रकार खूब चलने वाला पथिक मार्ग में बुभुक्षा के शमन के लिये कुछ अन्न साथ में रख लेता है और आसानी से अपना मार्ग तै कर लेता है, उसी भांति ज्ञानमार्ग पर चलने वाले शिष्य के लिये बृहस्पति आचार्य एक पन्था के समान हैं अर्थात् शिष्य, बृहस्पति आचार्य को देखता है और यह निश्चय करता है कि बृहस्पतित्व तक पहुंचना है । बृहस्पति के उपदेश उसके पाथेय हैं । वह उसका पन्था होता हुआ भी शोभनमार्गद्रष्टा भी हैं । अन्य गुरुजन भी अपने हृदय–गुहा में सततरूप में विद्यमान रहते हुए भी सुशिष्य के प्रति सदा खुले रहते हैं । इस मन्त्र से यह ध्वनित होता है कि गुरुजनों को योगाभ्यास भी करते रहना चाहिये ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्निमन्त्रमाला

(श्री अरविन्दप्रणीत 'Hymns to the Mystic Fire' ग्रन्थस्य धारावाहिकोऽनुवादः, अनुवादकोपज्ञेन भावार्थेन तदुपज्ञनानाविधटिप्पणीभिश्च संवलितः)

अनुवादकः श्री जगन्नाथो वेदालंकारः

अग्ने देवां इहा वह जज्ञानो वृक्तबर्हिषे ।
असि होता न ईड्यः ॥३॥

१ अग्ने । २ देवान् । ३ इह । ४ आ । ५ वह । ६ जज्ञानः । ७ वृक्त-बर्हिषे । ८ असि । ९ होता । १० नः । ११ ईड्यः ॥

1 O fire. 6 thou being born. 3 hither. 4,5 bear. 2 the Gods. 7 for the sacrificer who spreads the holy seat. 8 thou art. 10 our. 11 desirable. 9 summoning priest.

१ हे अग्निदेव ! ७ आस्तीर्णपवित्रासनाय यजमानाय । ६ जातः, प्रादुर्भूतः सन् । त्वम् ३ अत्र यज्ञवेदौ । २ अन्यान् इन्द्रादीन् देवान् । ४,५ आनय । त्वं हि । १० अस्माकम् । ११ अध्येषणीयत्वेन (काम्यत्वेन) स्तुत्यः । ९ आह्वानकरः पुरोहितः । (भवसि) ।

भावार्थः

हे अग्ने ! प्रादुर्भव । येन यजमानेन तव अन्येषां च देवानामागमनार्थं पवित्रासनं, पूतहृदयासनमास्तीर्णं तस्मै त्वम् तस्यान्तर्वेदौ देवान् आवह। त्वमस्माकमध्येषणीयः, अभीप्स्यः, देवानाम् आह्वाता पुरोहितोऽसि ।

व्याकरणम्

६ जज्ञानः । 'जनी' प्रादुर्भावे इत्यतः लिटः कानच् ।

७ वृक्त-बर्हिषे । वृक्तमास्तीर्णं बर्हिः पवित्रासनं, हृदयासनं येन तस्मै ।

११ ईड्यः । द्र. १.१.२[4] । अत्र ईडिरध्येषणाकर्माऽपि द्रष्टव्यः ।

तां उशतो वि बोधय यदग्ने यासि दूत्यम् ।
देवैरा सत्सि बर्हिषि ॥४॥

१ तान् । २ उशतः । ३ वि । ४ बोधय । ५ यत् । ६ अग्ने । ७ यासि । ८ दूत्यम् । ९ देवैः । १० आ । ११ सत्सि । १२ बर्हिषि ।

6 O fire. 5 when. 7 thou goest. 8 as our envoy. 4 awaken. 1 them. 3 up. 2 who desire. our offerings. 11 take thy seat. 9 with the Gods. 10,12 on the holy grass.

६ हे अग्निदेव ! ५ यदा । त्वम् अस्माकं ८ दूतत्वं ७ प्राप्नोषि, अस्माकं दूतः सन् देवान् प्रति गच्छसि । तदा त्वम् २ अस्मदाहुतिकामिनः। १ तान् देवान् । ३,४ जागरय, प्रबुद्धान् कुरु । १०,१२ पवित्रकुशासने, पवित्रितहृदासने । त्वं ९ देवताभिः सह । ११ आसीद, विराजेत्यर्थः ।

भावार्थः

हे अग्ने ! यदा त्वं देवान् प्रति अस्माकं दूतो भूत्वा गच्छसि दूतकर्मनिर्वाहार्थं, तैः सहास्माकं सम्पर्कस्थापनार्थं, तदा त्वमस्मद्हव्याभिलाषिणः अस्मत्सत्तासमर्पणकामिनस्तान् प्रबोधय, प्रबोध्य च तैः सहैव त्वमस्माकं परिपूतहृदयासने आसीनो भव ।

व्याकरणम्

२ उशतः । वश कान्तौ (कान्तिरिच्छा) इत्यस्माल्लटः शतरि द्वितीयाबहुवचनम् ।

१० आ । आङिति निपातत्वादव्ययम् । अत्रैष निपातो 'बर्हिषि' इति सप्तम्यन्तपदेन युक्तस्तदर्थोपबृंहणः कर्मप्रवचनीयः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

११ सत्सि । षद्लृधातो र्लोडर्थे लट् । शब्लुगादि छान्दसम् ।

घृताहवन दीदिवः प्रति ष्म रिषतो दह ।
अग्ने त्वं रक्षस्विनः ॥५॥

१ घृत-आहवन । २ दीदि-वः । ३ प्रति । ४ स्म । ५ रिषतः । ६ दह । ७ अग्ने । ८ त्वम् । ९ रक्षस्विनः ।

7 O Fire. 8 thou. 1 who art called by the offerings of clarity. 2 thou shining one. 3 do thou oppose. and 6 burn down. 5 the haters. 9 that confine. (4 expletive)

१ घृतेन घृताहुतिभिरर्थाद् दीप्तधियो हव्यैराहूयमान । २ देदीप्यमान । ७ अग्निदेव ! ८ त्वम् । ९ रक्षोयुक्तान्, मार्गावरोध-परिसीमनादिराक्षसभावयुक्तान् । ५ द्वेषद्रोहपरान् शत्रून् । ३ प्रतिकुरुष्व । ६ भस्मसाच्च कुरु ।

(४ 'स्म' इति पादपूरकः)

भावार्थः

हे अग्ने ! त्वं दीप्तधियैव, प्रकाशितमनसैव आह्वातुं पार्यसेऽन्तर्याजिकैः, त्वाम् आह्वातुं मानसज्योतिषो हव्यानि त्वयि हूयन्ते तैः । ईदृशहव्यार्पणेनाहूतस्त्वमस्मासु प्रज्वलितो जायसेऽतितराम् । प्रज्वलितश्च त्वं राक्षसभावयुक्तान् प्रगतिपथप्रतिरोधकान्, सीमाबन्धनजनकान् शत्रून् प्रत्यवस्थाय भस्मीकुरु ।

अस्मिन् मन्त्रे प्रयुक्तं प्रतीकात्मकं 'घृत' पदं विशेषव्याख्यानमर्हति । घृ क्षरणदीप्त्योरित्यस्य क्तान्तं रूपं घृतमिति । लोके तु घृतं क्षरणसर्पणशीलत्वाद् 'घृत'मिति' सर्पि'रिति चोच्यते, भवति च क्षरितं घृतं दीप्तिमदपीति घृधातो र्द्वितीयोऽर्थोऽपि तत्र सङ्गच्छते । किन्तु वेदे आध्यात्मिकेऽर्थे घृतपदं मनसो दीप्तेः, मानसिकविशदतायाः, दीप्त (प्रकाशित) मनसो दीप्तधियो वा प्रतीकम् । वेदवचसां स्थूले बाह्यार्थे सर्पिर्वाचकं सदपीदं पदमन्तरर्थे मनसो धियो वा विशदतां दीप्तिं च, प्रकाशितं मनः प्रकाशितां धियं वा सङ्केतयति । सन्त्यन्यान्यपीदृशि गो-अश्व-उषस्-अग्नीन्द्र-सोमसूर्यादिपदानि वेदे, यानि यौगिकत्वम् अत्यजन्त्यपि नियते गुह्यार्थे प्रयुक्तानि सर्वत्र । वेदरहस्यसमुद्घाटनकुंचिकायमानानि चैतानि पदानि 'प्रतीकानि' 'सङ्केत (साङ्केतिक) पदानि', 'सङ्केताः' इति वा वक्ष्यन्तेऽस्माभिरुत्तरत्र ।

ऋग्वेदे प्रथममण्डलस्य द्वितीयसूक्तसप्तममन्त्रे एव सर्वप्रथमं प्रयुक्तं 'घृत' पदं 'घृताचीम्' इति समस्तपदाङ्गत्वेन । तत्र च 'घृताचीम्' इत्यस्य शब्दस्य धियो विशेषणत्वात् (धियं घृताचीं साधन्ता) घृतेन दीप्त्या अर्थात् प्रकाशेनाञ्चितां धियमित्येवार्थः उपपद्यते नान्यः । एवं 'घृत' पदप्रयोगवतामन्येषामपि सन्दर्भाणां परीक्षणेन श्रीअरबिन्दकृतः 'घृतस्य' साङ्केतिकोऽर्थः सुदृढं समर्थितो भवति । एतदेव च गो-अश्वादिशब्दानां गूढार्थप्रामाण्यविषयेऽपि बोध्यम् ।

व्याकरणम्

१ घृत-आहवन । घृतेनाऽऽहूयते इति विग्रहे 'कर्तृकरणे कृता बहुलम्' इति समासः । आहूयत इत्याहवनः । कर्मणि ल्युट् छान्दसः । यद्वा, कृत्यल्युटो बहुलमिति बाहुलकाल्ल्युट् । घृताहवन इति प्रातिपदिकात् सम्बुद्धौ रूपम् ।

२ दीदि-वः । दीप्त्यर्थकाद् दीप्यते र्लिटः क्वसुः ।

अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा ।
हव्यवाड् जुह्वास्यः ॥६॥

१ अग्निना । २ अग्निः । ३ सम् । ४ इध्यते । ५ कविः । ६ गृह-पतिः । ७ युवा । ८ हव्य-वाट् । ९ जुहु-आस्यः ॥

1 By the fire. 4 is. 2 the fire. 3 perfectly. 4 kindled. 5 the seer. 6 the lord of the house. 7 the youth. 8 the bearer of

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

offering. 9 whose mouth receives the offerings

२ भगवत्सङ्कल्पाधिष्ठाताऽग्निदेवः समष्टिगतः। १ व्यष्टिगतेन यजमानान्तर्निर्मथिताग्निना, दिव्य-सङ्कल्पाग्निनैव । ३ सम्यक् । ४ प्रदीप्यते । कीदृशोऽग्निः ? ५ क्रान्तदर्शी ऋषिः । ६ देहगृहस्य स्वामी । ७ चिरयौवनः, नित्यनवशक्तिसम्पन्नः । ८ हविःप्रापकः । ६ ज्वालात्मकजिह्वारूपमुखोपेतः।

भावार्थः

भागवतसङ्कल्पाधिपतिर्देवोऽग्निर्हि अतीन्द्रियार्थदर्शी ऋषिः । योऽन्तर्याजकस्तस्मै स्वात्मानं स्वात्मीयं च सर्वं समर्पयति, तस्य गृहस्य, वासस्थानस्य, देहगेहस्यान्तर्मन्दिरस्य च पती रक्षकः प्रभुश्च भवत्यसौ नित्ययुवाऽजरामरशक्तिमयोऽग्निः। स यजमानस्य हव्यानि वहति देवान् यथायथम् । ज्वालाजिह्वामयं हि तस्यास्यं यद् यजमानस्य हविर्गृह्णाति यस्मिंश्च यजमानेन सततं हवनीयाः स्वदेहप्राणमनसां तत्क्रियाणाँ च समिधः प्रदीपनार्थं प्रकाशप्राप्त्यर्थं वा । एवम्भूतोऽसौ परमात्माग्निरात्माग्निना, अस्मदन्तःस्थदिव्यसङ्कल्पाग्निनैव प्रदीप्यते, सकृत् प्रदीपितश्च प्रदीप्ततरो भवत्युत्तरोत्तरम् ।

व्याकरणम्

४ इध्यते । ञिइन्धी दीप्तौ इत्यस्मात् कर्मणि लट्प्रथमपुरुषैकवचनम् ।

६ जुहु-आस्यः । जुह्वति अस्यां हविरिति जुहूर्जिह्वा, अग्नेर्ज्वाला, सैवास्य जिह्वा । 'हुवः श्लुवच्च' इति क्विप् औणादिकः । जुहूः अर्थात् ज्वालारूपिणी जिह्वा एव आस्यं मुखं यस्य सः ।

कविमग्निमुप स्तुहि सत्यधर्माणमध्वरे ।
देवममीवचातनम् ॥७॥

१ कविम् । २ अग्निम् । ३ उप । ४ स्तुहि । ५ सत्य-धर्माणम् । ६ अध्वरे । ७ देवम् । ८ अमीव-चातनम् ॥

2 To the divine flame. 1 the seer. 5 him whose law of being is the truth. 7 the shining one. 8 the destroyer of all evils. 3 approach. and 4 chant the hymn of praise (6 at the pilgrim-sacrifice.)

६ ऊर्ध्वसत्यधामपथिके यज्ञे । १ अतीन्द्रियार्थद्रष्टारं । ५ सत्यात्मकधर्मयुक्तम् । ८ सर्वविधदुरितविनाशकं । ७ दीव्यन्तं प्रकाशमानं दिव्यं वा । २ अग्निम् । ३ उपेत्य । तस्य ४ स्तोत्रमुपगाय ।

भावार्थः

हे अन्तर्यागकारिन् ! ऊर्ध्वारोहणयात्रारूपिणि, दिव्यपथस्य प्रदातरि यज्ञे त्वं क्रान्तदर्शिनं, सत्यधर्माणं, प्रकाशमयं, सर्वदुरितापहं दिव्याग्निमुपगम्य तस्य स्तुतिगानं कुरु ।

व्याकरणम्

८ अमीव-चातनम् । अम रोगे इत्यस्माच्चौरादिकात् 'शेवयह्वजिह्वा०' इत्यादिना उणादिसूत्रेण (१.१५२) 'वन्' प्रत्ययः ईडागमश्च निपात्येते ।

पदमिदं नान्तमकारान्तं स्त्रियामाबन्तं च त्रिधाऽपि प्रयुक्तं दृश्यते । तत्र निपातनाद् बाहुलकाच्च यथाभिमतरूपसिद्धिरास्थेयेति दिक् ।

अथोत्तरपदम् । चातयति विनाशयतीति चातनः । चते याचने इत्यस्मात् णिजन्तात् 'नन्दिग्रहि-पचादिभ्यो ल्यु०' (पा. ३.१.१३४) इत्यादिना कर्तरि ल्युः । योरनादेशः । णेरनिटीति णेर्लोपः । अमीवानां रोगादिदुरितानां चातनस्तम् । षष्ठीतत्पुरुषः । धातूनामनेकार्थत्वात् चतिरत्र हिंसार्थकः ।

यस्त्वामग्ने हविष्पतिर्दूतं देव सपर्यति ।
तस्य स्म प्राविता भव ॥८॥

१ यः । २ त्वाम् । ३ अग्ने । ४ हविः-पतिः । ५ दूतम् । ६ देव । ७ सपर्यति । ८ तस्य । ९ स्म । १० प्र-अविता । ११ भव ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

3 O Flame. 6 O divine. 5 messenger. 4 the lord of the offerings. 1 who. 7 waits on. 2 thee. 8 of him. 11 become. 10 the protector. (9 expletive)

६ हे तपोदेव । ३ अग्ने ! ४ बाह्यान्तर-हव्यानां स्वामी । १ यः । अन्तर्यामी । ५ दूतम् । २ त्वाम् । ७ उपास्ते । ८ तस्य हविष्मतः । त्वम् १० रक्षिता । ११ भव । (६ 'स्म' इति पाद-पूरकः) ।

भावार्थः

भगवते समर्पणार्थं सिद्धानि देहप्राण-मनांसि, तेषां नानाविधा अवस्था व्यापाराश्चैवान्तर्यागस्य हवींषि, अर्पणीयद्रव्याणि । हे अग्ने ! दिव्यदूत ! एषां हविषां पतिर्यो यजमान इमानि सिद्धीकृत्य त्वामुपतिष्ठति एतत् सर्वस्वसमर्पणार्थं, तस्य त्वं रक्षको भवसि, भव चेति प्रार्थना ।

व्याकरणम्

४ हविः-पतिः । हविषां पतिरिति हविष्पतिः षष्ठीतत्पुरुषः । ६ स्म । स्मेति पादपूरणः ।

१० प्र-अविता । अवतीत्यविता रक्षकः । अव रक्षणादिषु इत्यस्मात् प्रपूर्वात् 'ण्वुल्तृचौ' (पा. ३.१.१३३) इति कर्तरि तृचि इडागमः । प्रथमैकवचनम् ।

यो अग्निं देववीतये हविष्मां आविवासति । तस्मै पावक मृळय ॥६॥

१ यः । २ अग्निम् । ३ देव-वीतये । ४ हवि-ष्मान् । ५ आ-विवासति । ६ तस्मै । ७ पावक । ८ मृळय ॥

He. 1 who. 4 with the offerings. 5 approaches. 2 the divine force. 3 for the birth of the Gods. 7 O purifier. 6 on him. 8 have grace.

७ हे पवित्रीकारक अग्ने ! १ यः । ४ हविषां स्वामी, प्रभूतहविरुपेतो यजमानः । ३ देवानां जन्मने । २ दिव्यतपःशक्ति त्वाम् । ५ उपगच्छति परिचरति च । ६ तस्मिन् । ८ अनुग्रहं कुरु ।

भावार्थः

योऽन्तर्याजिकः स्वात्मनि देवानामाविर्भावाय हव्यैः सह भागवतसंकल्पशक्तिमुपयात्युपास्ते च, हे परिशोधक अग्निदेव ! तस्मिन् कृपां कुरु, देवानां जन्म संसाध्य तं कृतार्थय ।

व्याकरणम्

३ देव-वीतये। वी गतिव्याप्तिप्रजनकान्त्यशन खादनेषु इत्यतः स्त्रियां भावे क्तिनि वीतिशब्दो निष्पद्यते । वीतिरर्थात् प्रजनः, जन्म प्रादुर्भावो वा । देवानां वीतिर्जन्म तस्यै ।

५ आ-विवासति । आवातुमागन्तुमुपगन्तुं वेच्छतीति आविवासति । आङ्पूर्वकाद् 'वा' गतिगन्धनयोरित्यस्माद् आदादिकादिच्छार्थे सनि लट्प्रथमपुरुषैकवचनम् ।

यद्वा, विवासति इति परिचरणकर्मसु पठितं निघण्टौ (३.५) । तस्माद् विवासते र्लटि रूपम् ।

अग्निं प्रति आगमनेच्छा समीपगमनेच्छा वा परिचर्याप्रयोजना । अतश्च 'विवासतिः परिचर्यायाम्' (निरु०११.३.१६) इत्यर्थः फलति ।

८ मृळय । मृड सुखने इत्यस्मात् लोण्मध्यम-पुरुषैकवचने छान्दसं रूपम् ।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैदिकसाहित्यस्य परिचयप्रसंगे—

ऋषयो मन्त्राणां द्रष्टारः कर्तारो वा ?

श्री प्रा० भद्रसेनः

वेदानां प्रत्येकस्य मन्त्रस्य सूक्तस्य वोपरि केषां शब्दानां संकेतो भवति, तेषु-एक ऋषिरपि। ऋषिशब्देन किं गृह्यतेऽत्र ? अस्मिन् विषये त्रयः पक्षाः प्राप्नुवन्ति। प्रथमः—ऋषयो द्रष्टारः, द्वितीयः—कर्तारः, तृतीयश्च पक्षो मन्त्रार्थपरिचायकं, सारबोधकं, गुणवाचकं, यौगिकं पदमिति—ऋषिः।

प्रथमः पक्षः—अति प्राचीने काले वेदाः कर्णपरम्परया श्रूयन्ते स्म, न तु पुस्तकैः पठ्यन्ते स्म, पुस्तकाभावात्। बुद्धीनां प्रखरत्वात् श्रवणपरम्परयैव स्मरणाध्ययने सम्पद्येते। अत एव श्रुतिः, अनुश्रवनामभ्यां वेदा निर्दिश्यन्ते। ऋषिभिरपि पूर्वजैः श्रुतम्, प्राथमिकैरग्निवायुप्रभृतिभिः परमेश्वरादेव स्वहृदयेषु श्रुतम्-प्राप्तम्। अत ऋषयो न मन्त्राणां कर्तार अपि तु केवलं मन्त्रार्थस्य द्रष्टारः।

समस्तस्य संस्कृतसाहित्यस्यावलोडनेनावगम्यते यद् वेदा ईश्वरीयं ज्ञानम् न तु ऋषीणाम्। ईश्वरो नित्यस्तस्य ज्ञानमपि नित्यम्। ऋषिभिस्तु केवलं प्रकाशनं कृतम्। अत एव स्थाने स्थाने परमेश्वरो निर्मातृत्वेन निर्दिष्टः। तद्यथा—

"तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे," यजुः ३१, ७। यस्मादृचो अपातक्षन्, यजुर्यस्मादपाकषन्, अथर्व १०, ७, २०। एवं वा अरेऽस्य महतो भूतस्य निःश्वसितम् ऋग्वेदो यजुर्वेदः, शतपथ १४,४,३,१०"

साहित्ये बहुत्र 'ऋषि द्रष्टा' इत्थं वर्णनमपि प्राप्नोति। ऋषिर्दर्शनात्, स्तोमान् ददर्शेत्यौपमन्यवः, तद्यदेनांस्तपस्यमानान् ब्रह्म स्वयम्भ्वभ्यानर्षत्, तत् ऋषयोऽभवंस्तदृषीणामृषित्वमिति ह विज्ञायते। निरुक्तम् २,११।

मनुष्या वा ऋषिषूत्क्रामत्सु देवानब्रुवन् को न ऋषिर्भविष्यतीति तेभ्य एतं तर्कं प्रायच्छन् मन्त्रार्थचिन्ताऽभ्यूहमभ्यूलहं, तस्माद्यदेवं किञ्चानूचानोऽभ्यूहत्यार्षं तद्भवति। नि. १३,१२।

एवमुच्चावचैरभिप्रायै ऋषीणां मन्त्रदृष्टयो भवन्ति, नि० ७,४। ऋषेर्दृष्टार्थस्य प्रीतिर्भवत्याख्यानसंयुक्ता नि० १०,१०।

न्यायदर्शनस्य भाष्यकर्तुः श्री वात्स्यायनस्य वचनेनापि प्रमाणी भवति, यत् ऋषयो द्रष्टारः—तद्यथा—य एव मन्त्रब्राह्मणस्य द्रष्टारः प्रवक्तारश्च ते खलु इतिहासपुराणस्य धर्मशास्त्रस्य चेति कर्तारः।

य एव आप्ता वेदार्थानां द्रष्टारः प्रवक्तारश्च त एव आयुर्वेदप्रभृतीनामिति न्या०भा० २, ६२, ६७, अत्र मन्त्रशब्देन सह द्रष्टृपदं सम्बद्धं वर्तते।

यत्र कुत्रापि मन्त्रकृत् शब्दः प्रयुक्तः, स न कर्तृत्वेन अपि तु कृञ् धातु अनेकार्थत्वेन वर्तते। तदैव श्रीसायणः प्राह-ऋषिरतीन्द्रियार्थद्रष्टा मन्त्रकृत् करोतिधातुस्तत्रदर्शनार्थः। अतो न कर्तृत्वे एव। यद्यपि अपौरुषेयवेदे कर्तारो नैव सन्ति, तथापि कल्पादौ विश्वेश्वरानुग्रहेण मन्त्राणां लब्धारो मन्त्रकृत् इत्युच्यन्ते तै० ब्रा० ४, १,१। एवमेव यजुर्वेदभाष्यकारः श्री उव्वटः ७, ४६ भाष्ये

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लिखति–ऋषयो मन्त्राणां व्याख्यातारः। बोधायनधर्मसूत्रस्य २,६,३६ भाष्ये गोविन्दस्वामी-ऋषिर्मन्त्रार्थज्ञः। मनुस्मृतेर्भाष्यकारो मेधातिथिः ऋषिर्वेदस्तदध्ययनेन तद् विज्ञानेन तदर्थानुष्ठानातिशययोगात्, पुरुषेऽपि ऋषिशब्दः।

ऋषिशब्दस्य अर्थो मन्त्राणां कर्ता इति स्वीकृते तु, इमा विसंगतयः समागच्छन्ति।

वेदमन्त्राश्च ऋषिभ्यः पूर्वतनाः सन्ति, कथं पुनः ऋषयस्तेषाम् कर्तारो भवितुमर्हन्ति। यथा तै. सं., मै. सं. ऐ. ब्रा. ग्रन्थेषु एका कथा मिलति––एकदा मनुमहोदयेन स्वकीया सर्वा सम्पत्तिः स्वपुत्रेषु विभक्ताः। कनिष्ठो नाभानेदिष्ठो गुरुकुलात्प्रतिनिवृत्य स्वं भागं ययाचे, तस्य पित्रा मनुनोक्तम्, यदिमे द्वे सूक्ते (१०, ६१-६२) स्तः, अनयोराङ्गिरसयज्ञे व्यवहारो विधेयः। तत्र प्राप्ता दक्षिणा तव भागो भविष्यति, अनयोः सूक्तयोः ऋषिर्नाभानेदिष्ठः परं कथातः पिता प्रदाता। अतः कथञ्चित् पिता तु अनयोः कर्ता स्यादपि परं नाभानेदिष्ठः कथं सेत्स्यति।

तान् वा एतान् सम्पातान् विश्वामित्रः प्रथममपश्यत् तान् विश्वामित्रेण दृष्टान् वामदेवोऽसृजत् गो० ब्रा० १, ६, (ऐ० ब्राह्मणेऽपि) एतत् कथनम् ऋ ४,१९ विषये वर्तते। ऋक्सर्वानुक्रमणिकायां वामदेव ऋषिः तर्हि विश्वामित्रेण पूर्वदृष्टस्य वामदेवः कथं कर्ता भवितुमर्हति।

कस्य नूनं ऋ१,२४ सूक्तस्य आजीगर्तो देवरात (शूनशेपः) ऐ. ब्राह्मणे (३३,३,४,) ऋषिर्निर्दिष्टः परं निरुक्तसमुच्चये अजीगर्तः स्मृतः। उभयत्र ऋषिनाम्नि भेदो वर्तते, तदा कर्तृदिशा कथं संगतिः स्यात्।

एकस्य सूक्तस्य अनेके कर्तारः कथं भवितुमर्हन्ति, तद्यथा ऋ :९, ६६ सूक्ते ३०मन्त्राः सन्ति तत्र ऋषिः–शतं वैखानसा निर्दिष्टाः।

अनेकमन्त्रसूक्तानामनेके ऋषयः प्राप्नुवन्ति, एकस्मिन् सूक्ते बहूनां मन्त्राणां यदा भिन्नो-भिन्न-ऋषिर्भवति, तदा तैः सह मन्त्रसंख्याया निर्देशः क्रियते। परन्नात्र ९,६६ निर्दिष्टम्। अतो विज्ञायते सर्वे ऋषयो द्रष्टारः। बहुत्र वा, च निपातयोः प्रयोगः क्रियते, स च दर्शने संगच्छते, न तु करणे।

ऋ १,१००, सूक्ते १९ मन्त्राः, तेषां पञ्च ऋषयः। सप्तदशमे मन्त्रे सर्वेषां नामानि सन्ति। यदि ते कर्तारः ? तर्हि भिन्नेषु भिन्नेषु मन्त्रेषु भवेयुः।

एकस्य मन्त्रस्य विविधेषु स्थलेषु समागते सति अपि तस्य ऋषयः प्रायः सर्वत्र भिन्नाः प्राप्नुवन्ति, तर्हि कर्तृदृष्ट्या कथमस्य समाधानम् ?

ऋषिर्मन्त्रनिर्माता, इति स्वीकृते मन्त्रस्थ कालवचनयोः का संगतिर्भविष्यति।

श्रौतगृह्यसूत्रेषु मन्त्रकृत् शब्दो बहुधा प्रयुज्यते, परं मन्त्रकालस्तु तेभ्यो बहुप्राचीनतमः। तर्हि कथमत्र अर्थसंगतिः सेत्स्यति।

यथा–दक्षिणत उदङ्मुखो मन्त्रकारः मा. गृ. १,८,२। यदि ऋषिभिर्निर्मितो वेदो भवेत्, तर्हि मन्त्रस्य ऋषेः पराशरस्य पुत्रः कथं वेदं नित्यं वदेत्। अतः पराशरस्तस्य मन्त्रस्य द्रष्टैव।

शाकल्य–जैमिनिसमकालिको भार्म्यश्वमुद्गलः ऋ १०,१०, २ मन्त्रस्य ऋषिः, यदि स तस्य कर्ता भवेत् तर्हि तत्समकालिको जैमिनिः कथं नित्यं स्वीकुर्यात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं बहुना समस्तवेदवेदाङ्गोपाङ्गानाञ्च सूक्ष्मदृष्ट्या अवलोकनेन विज्ञायते, यत् ऋषयो मन्त्राणां द्रष्टारो न तु कर्तारः । ऋषिर्दर्शनात्, साक्षात्कृतधर्माण ऋषयो बभूवुः । कर्ता तु परमेश्वर एव नान्यः कश्चित् ।

तर्हि मन्त्रकृत् शब्दस्य कोऽर्थः ?

यथा लोहकारः स्वर्णकारो वा न लोहस्वर्णयो र्निर्मातारौ परं रूपप्रदातारौ भवतः । तथैव मन्त्रकृत् न मन्त्रस्य कर्ता, अपि तु द्रष्टा, भावप्रकाशकः । आम् मालाकारो मालां निर्मिमीते, परं न तेनापि पुष्पाणि निर्मीयन्ते, मालारूपेण संयोजनं विधीयते ।

ते देवा अब्रूवन् इषाव (वाव) पिता यो मन्त्रकृदिति ता. ब्रा. १३, ३, २५ शिशुर्वाऽङ्गिरसो मन्त्रकृतां मन्त्रकृदासीत् । स पितॄन् पुत्रका इत्यामन्त्रयत् । अस्यैव समानपाठो मनुस्मृतौ प्राप्यते--

अध्यापयामास पितॄन् शिशुरङ्गिरसः कविः ।
पुत्रका इति होवाच ज्ञानेन परिगृह्य तान् ।।२,१५१।
अज्ञो भवति वै बालः पिता भवति मन्त्रदः । १५२।

आभ्यां प्रकरणाभ्यां सिध्यति यत् मन्त्रकृत्—मन्त्रदः समानार्थकौ । अत्र विद्यायाः ज्ञानस्य, विचारस्य वा प्रदाता एव मन्त्रकृत्, मन्त्रदो वा निर्दिष्टः । मन्त्रणां (परामर्शं) ददाति यः स मन्त्रदः=परामर्शदाता ।

यस्य वाक्यं स ऋषिः---

कात्यायनः, इत्यनेन प्रतीयते, यत् ऋषिर्मन्त्रकर्ता, परं तत्रैव कथितम् गृत्समदो द्वितीयं मण्डलमपश्यत् । अतः पूर्ववचनस्य दर्शनमेवाभिप्रायः । अत एवोच्यते—स (प्रजापतिः) एतामृचमपश्यत् ऐ. ब्रा. २,१६ एतत्कवषः सूक्तमपश्यत् ऐ. ब्रा. ३,१९ अत्र द्रष्टा स्पष्टं प्रतिपादितम् । तथा च दृष्टं साम पा. ४,२,७ सूक्ते, अग्निना दृष्टं साम आग्नेयम् । उशनसा दृष्टं साम औशनसम्, अत्रापि यो मन्त्रमपश्यत, तस्य तेन नाम्ना नामकरणं वर्तते । श्री पतञ्जलिः प्राह 'न हि छन्दांसि क्रियन्ते, नित्यानि हि छन्दांसि ४,३,१०१ ।

अतो मन्त्रस्य तदर्थस्य वा अध्यापको मन्त्रकृदिति, मन्त्रस्य विनियोगकर्ता, यज्ञे मन्त्राणां प्रयोजनवेदयिता, मन्त्रस्य द्रष्टा, साक्षात्कर्ता, तत्प्रचारकश्च वा मन्त्रकृत् । नूतनस्य भावस्य बोद्धा-ज्ञापयिता, वेत्ता मन्त्रकृदिति 'करोति अयमभूत प्रादुर्भावे दृष्टः–श्री पतञ्जलिः ६,१,६ ।

द्वितीयः पक्षः —

ऋषयो मन्त्राणां कर्तारः । ऋषयो मन्त्रकृतां स्तोमैः कश्यपोद् वर्धयन् गिरः ऋ० ९, ११४, २, विज्ञायते च ऋषेऋषेर्वा एता निर्मिता यत् सामिधेन्यः आप श्रौ. २४, ११, १० सुकर्मपापमन्त्रपुण्येषु कृञः पा. ३, २, ८, यस्य वाक्यं स ऋषिः का. सर्वानु० १,२४ । एभिः प्रमाणैः ऋषयो मन्त्रकर्तारः सिद्ध्यन्ति अत एव मन्त्रकृत्, मन्त्रकारः, मन्त्रकारः, मन्त्रवान्, मन्त्रपतिरिति, तेषां कृते प्रयुज्यन्ते । तथा शान्तरक्षितबौद्धस्तत्त्वसंग्रहे प्राह–महर्षयो वेदानां कर्तारो मन्त्राणां प्रवर्तयितारः । मज्झिमनिकाय २, ५, ६ स्थलेऽपि एष एव भावः प्राप्नोति । अर्थात् एभ्यः पूर्वमेषा धारणा आसीत्, अत एव एभिरित्थं प्रतिपादितम् ।

निरुक्ते बहुत्र इयं धारणा परिपुष्यति, यद् यास्कः ऋषिं मन्त्रकर्तृत्वेन गृह्णाति–एकः सुपर्णः तं पाकेन मनसा अपश्यमन्तितः, अत्र यास्कः प्राह ऋषे र्दृष्टार्थस्य प्रीतिर्भवति, आख्यानसंयुक्ता १०,४,३१ । मन्त्रस्थ-आख्यानस्य निर्देष्टा ऋषिरे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिध्यति। इन्दुशब्दस्य प्रसंगे १०,४,२७-अभ्यासे भूयांसमर्थं मन्यन्ते, यथाहो दर्शनीयाहो दर्शनीय इति तत् परुच्छेपस्य शीलं। परुच्छेपस्य इयं रचना, अत एव तस्य शीलं कथितं यदि कोऽपि वदेत्, अत्र नाम्नो निरुक्तिर्वर्तते, निरुक्तिस्तु नाम्नामद्यत्वेऽपि विधीयते।

यत्काम ऋषिर्यस्यां देवतायामर्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते। तद्-दैवतः स मन्त्रो भवति। अत्र स्तुतिकर्ता ऋषिर्निर्दिष्टः। नि. ६,५,१०७-जल्हवः शब्दनिर्वचनावसरे यास्कः प्राह–ऋषिरवोचत्। ६, १, ४–अक्षाः–ऋषेरक्षपरिद्यूनस्य एतदार्षं वेदयन्ते, हिरण्यस्तूपशब्दप्रसंगे-सूक्तं प्रोवाच, इति विन्यस्तम्।

तृतीयः पक्षः—

मन्त्रसम्बद्धा ऋषयो, न तु द्रष्टारो न च कर्तारः, अपितु मन्त्रार्थस्य परिचायकत्वेन साररूपेण बोधकाः शब्दा इति। अत स्तद्गुणवाचकं यौगिकं पदमिति।

१–ब्राह्मणकारा भाष्यकाराश्च ऋषिदेवताछन्दसां वेदार्थे महत्त्वं स्वीकुर्वन्ति। ऋषिर्यदि द्रष्टा कर्ता वा स्वीक्रियते तर्हि तस्य वेदार्थाय न किमपि महत्त्वम् भवति, केवलं स्मरणार्थमेव महत्त्वम्।

२–केषुचिन्मन्त्रेषु ऋषिनामानि प्राप्नुवन्ति। यथा–क–दशव्रजे ऋ ८, ५, ६। ख–कृत्व्ये धने ८, ४०, १०। ग–मेधेऽध्वरे दीर्घनीथे दमूनसि ८, ५०, १०। घ–बृहस्पतिं यज्ञमकृण्वत ऋषिम् १०, १३, ४। एते ऋषिनिर्देशकाः शब्दाः विशेष्यविशेषणरूपेण प्रतिभान्ति, न तु व्यक्तिवाचकत्वेन। यदि ऋषिर्द्रष्टा, कर्ता वा स्वीक्रियते, तर्हि मन्त्रस्थ पदस्य कथं समाधानं संगतिर्वा भविष्यति।

३–अङ्गिरऋषिरेव प्रथमद्रष्टा, इति स्वीकृते सति, किं तस्मात्पूर्वं मन्त्रार्थस्य प्रकाशो न बभूव? यथा एकस्य मन्त्रस्य, वैवस्वत मनुः ऋषिः, स सप्तमे मन्वन्तरे, अतोऽस्मात्पूर्वं किं मन्त्रार्थस्य प्रकाशो नासीत्।

४–एवं स्वीकृते सत्येव व्यक्तिवाचको विवादः शाम्यति। तथा च कपोत, मत्स्यादितिर्यक्प्राणिनाम् नामसमाधानं जायते। अन्यथा किं पक्षिणोऽपि मन्त्रार्थद्रष्टारः कर्तारो वा। अथवा एतादृशानि नामानि किं शोभन्ते?

५–यजु० १३, ५४-५८ एषु मन्त्रेषुऋषिशब्दानां सामान्यार्थाः सन्ति।

६–पदपाठे ऋषिनामानि-अवगृहीतानि सन्ति। यथा-मेध्याऽअतिथिः, प्रियऽमेधाः, यदि व्यक्तिवाचकं पदं, तर्हि कथमवग्रहो विहितः।

७–ऋ १०, १२६ अंहोमुक् ऋषिः, सूक्ते पापनिवारणविचारः। अतः ऋषिमन्त्रार्थयोः कश्चन सम्बन्धो वर्तते। व्यक्तिवाचकत्वे न कापि संगतिः।

८–१०, ७२ सूक्तस्य, देवता एव ऋषिः। तदा द्वयोः को भेदः, आमयं विचारणीयो विषयोऽस्मिन् पक्षे। अतः सिद्धं यत् ऋषिशब्देन मन्त्राणां द्रष्टा कर्ता वा न ग्राह्यः। अपि तु मन्त्रस्य सार एवाभिप्रायः। पुनरपि साहित्ये त्रयाणामेव पक्षाणां समर्थनं प्राप्नोति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतविख्यातः पं० श्री लेखरामः (आर्यपथिकः)

श्री हजारीलाल शास्त्री (विद्यालंकारः)

(१)

आर्ये समाजे बहुलब्धमानः
प्रचारकार्ये प्रथमः प्रधानः ।
प्रदाय प्राणान् बलिदान वेद्यां
दिवं गतः श्रीयुतलेखरामः ॥

(२)

श्रीमानसौ पञ्चनदीय जेह्लुम्
सुमण्डले सैदपुरेऽजनिष्ट ।
एकोनविंशे शतके तु पञ्च-
दशोत्तरे विक्रमवत्सरे च ॥

(३)

चैत्राष्टमीके सुदिने सुजन्म
लब्ध्वार्यवीरः सुमनो विभूतिः ।
सारस्वते ब्राह्मणपूतवंशे
परां प्रसिद्धिं समुपेत आर्यः ॥

(४)

उर्दूं सुभाषां प्रपठन् स्वबाल्ये
जातः प्रवीणः प्रियलेखरामः ।
तारुण्यमाप्ते नगरस्य रक्षा-
पदाधिकारीति पदे नियुक्तः ॥

(५)

षट्त्रिंशवर्षे समभूद् विवाहो
लक्ष्मीति नाम्न्या सह पण्डितस्य ।
स्वधर्मपत्न्या सह वीरआर्यः
सामाजिके कार्यविधौ प्रवृत्तः ॥

(६)

समस्तदेशे खलु भारतेऽसौ
धर्मप्रचारायार्यवरो भ्रमन् ।
ईशामशीयै र्यवनैश्च सार्धं
शास्त्रार्थवादं कुरुते स्म धीरः ॥

(७)

अस्थापयत् श्रीयुतलेखरामः
पेशावरे चार्यसमाजसंस्थाम् ।
शुद्धिप्रचारेण चकार हिन्दून्
चेशामशीयान् यवनाननेकान् ॥

(८)

शास्त्रार्थवादे प्रियपण्डितोऽसा-
वीशामशीयानथ पारसीयान् ।
ग्रन्थांश्चखण्डे निजतीव्रबुद्ध्या
निर्भीक आर्यः प्रियलेखरामः ॥

(९)

हा! हन्त! चान्ये यवना ह्यनार्या
आर्यं सुवीरं परिहन्तुकामाः ।
चेष्टाः प्रचक्रुर्विविधा मलीनाः
पिपीलिका पश्यति छिद्रमेव ॥

(१०)

हा हन्त ! चैकः कपटाभ्युपेत
आर्यं निहन्तुं यवनो निकृष्टः ।
उपासदत् शुद्धिमिषेण धूर्तः
श्री लेखरामं करुणानिधानम् ॥

(११)

संकेतितो मित्रवरै रनेकैः
श्री लेखरामश्छलिनि ह्यमुष्मिन् ।
विश्वस्य चासावुपदेशवाणीं
दातुं प्रवृत्तः खलु वामनाय ॥

(१२)

हा चैकदासौ धृतकौक्षिकेय
आर्यं निहन्तुं समुपस्थितोऽभूत् ।
नराधमो हा! छुरिकां विषाक्तां
श्री लेखरामोदरमध्यमाधात् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(१३)

हा! लेखरामोदरमध्यभागा-
च्छस्त्रेण छिन्नाद् रुधिरस्य धारा ।
हा! हा! लपन्तीं जनतां रुदन्तीं
विस्मापयन्तीं वहते स्म वेगात् ।।

(१४)

हा! हाऽऽततायी प्रियधर्मपत्नी-
मार्यां तदीयामपि संप्रहृत्य ।
विमोच्य चात्मानमहो! द्रुतं हा!
दुद्राव नीचः क्षुरिकां दधानः ।।

(१५)

कृतोपचारेऽपि न रक्तधारा
रुद्धाभवद् हन्त ! समाजसेवी ।
हा! हा! रुदन्तीं जनतां समस्तां
विहाय यातो दिवमार्यवीरः ।।

(१६)

आर्यैः समस्तैरवरोधनीयं
न लेखकार्यं सततं स्वकीयम् ।
इत्यार्यजातिं प्रति धर्मवीर-
स्यार्यस्य संदेश इयाननन्यः ।।

प्रशस्तिः (महाकविशतकात्)

प्रणेता--कवीशरामकैलाशपाण्डेयः, एम० ए०, शास्त्री, लब्धस्वर्णपदकः

साकेते जन्म लब्ध्वाऽतिविमल-
धिषणो ह्यश्वघोषो जगत्यां,
कीर्तिं स्वामाततान प्रमथित-
सुगतप्रोच्च सिद्धान्तवागर्थः ।
नन्दान्ते सौन्दराद्ये विलिखित-
मथवा चान्यकाव्येऽपि तेन,
यन्नूनं तन्न काव्यं परमथ
भणितं दर्शनस्य प्रसिद्धम् ।।

त्यक्त्वा वेदोक्तमार्गं धृत-
सुगतमतः स्फारयन्धर्मघोषम्,
बौद्धान्तः सम्प्रविष्टः कविकुल-
सुलभां कल्पनां संदधानः ।
शास्त्रे सम्प्राप्तमानो विदित-
बहुनयो नव्यरीतिं च तन्वन्,
जेजेत्यस्यां धरायां कविकुल-
नृवरैरादृतस्त्वश्वघोषः ।।

भुभर्तुः श्रीधरस्यारचितमनुपमं
राजधान्यां वलभ्या-
मापूर्णं शब्दविद्यामतपटु-
नियमैर्भट्टिकाव्यं निगूढम् ।
यद्भट्टेस्तन्नितान्तं बुधवर-
मनसां प्रीतये वर्ततेऽद्धा,
नैवानन्दं लभन्ते विरहित-
धिषणाः शब्दबोधाकरेऽस्मिन् ।।

श्रीकृष्णस्यानवद्यैः शशिकर-
विमलैः कर्मभिर्व्याप्तिपृष्ठम्,
प्रौढं वाग्जालजुष्टं मुखरित-
ममलं नारदस्योक्तियुक्त्या ।
लघ्वाख्यानेन युक्तं त्वपि ननु
नितरां विस्तृतं पूतवृत्तं,
दैवीवाक्काव्यहेम्नो दृढनिकष-
निभं माघकाव्यं चकास्ति ।।

औद्धत्यं शैशुपालं विदलितनृवरं संदिदीपे यदालं, यागे पाण्डोः सुतानां यदुकुलकमलाहस्कराह्वप्रसङ्गे ।
शक्तिः सौदर्शनी द्राक् प्रकुपितभगवत्प्रेरिता प्रोद्यताऽभूच्चैद्यं चावद्यशौर्यं विचलितकरणं माघकाव्ये जघान।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूस्वर्गः

श्री जगन्नाथ रिवू शास्त्री

अस्त्युत्तरस्यां दिशि भारतस्य–श्रीवासभूमिर्मुनिवाटिकायाम् ।
कश्मीरनाम्ना मुनिकश्यपेन–स्वर्निर्मिता-नन्दनवाटिकेव ॥१॥

या पर्वतैर्वन्यलताद्रुमैश्च–वनस्थलीभिश्च महौषधैश्च ।
सरित्तडागैर्जलजैः सरोभिः समावृता भूधरराजकुक्षौ ॥२॥

या सिद्धयोगेन्द्रमुनीन्द्रवर्यैः कवीन्द्रराजेन्द्र सुरेन्द्रवृन्दैः ।
संसेविता राजगणैश्च शासिता देवस्थली पर्वतराजकुक्षौ ॥३॥

गुञ्जन्ति कूजन्ति हसन्ति भृङ्गाः खगा जनाः पुष्पलताद्रुमेषु ।
सैषा वसन्ते सुखदा नराणां कश्मीरभूमिशिशिरात्ययेषु ॥४॥

रमन्ति गायन्ति हसन्ति बालाः कुञ्जेषु नौकासु लताद्रुमेषु ।
विचित्रवेषैः परिभूषितास्ते स्वानन्दमग्नाः परितो भ्रमन्तः ॥५॥

पुष्पैः फलैश्शाद्वलवेदिकाभिः सा राजते भारतमूर्ध्नि स्वर्गः ।
परागयुक्तं पवनं च घ्रात्वा दृश्यं च दृष्ट्वा लभते सुतृप्तिम् ॥६॥

जले स्थले वा विहरन्ति भूरिशो नराश्च नार्यो जलवाहनादिभिः ।
बसै रथैः सैकलमोटरैस्तथा प्रवृद्धहर्षागतसाध्वसक्लमाः ॥७॥

कुञ्जेषु कूजन्ति कुलाय संस्थिता विहायसा केचनगन्तुकामुकाः ।
वृक्षेषु केचित्तृणपुष्पछादिताः पिकाशुकाभृङ्गगणाः समन्ततः ॥८॥

संपूर्णसस्याभरिता फलैश्च योमामहेशस्य विहारभूमिः ।
कश्मीरनाम्ना प्रथिता धरायां सा राजते कश्यपनन्दिनीव ॥९॥

सा वाटिक श्रीनगरीसमाख्या स्थिता वितस्ता तटयोर्महच्छ्रीः ?
प्रासाददेवालयहर्म्यरम्या विराजते सा बहुराजमार्गाः ॥१०॥

डलाभिधाने विमले सरोवरे निशातशालामरपादमूलये ।
पश्यन्ति तस्मिन्वनितामुखाम्बुजं-प्रफुल्लपद्मैः सह बिम्बितं जले॥११॥

सरोवरेऽस्मिन्विमले विशाले प्रफुल्लपद्मैर्खलु शोभिते च ।
नराः प्रियाभि र्विहरन्ति साकं नौकाविहारैः स्मरतापशान्त्यै ॥१२॥

शालागृहं मारवरासनं यत्सरोवरस्योत्तरभूमिभागे ।
रहो जहांगीरनृपोऽत्र बाहू चकारकण्ठाभरणं स्वनूरीम् प्रियां स्वां।१३॥

सोऽयं जहांगीर नृपोऽत्र पूजामुमामहेशस्य चकार भक्त्या ।
फारसवाण्या सुमनोभिरामां पठन्ति गीतिं शबशाहिनाम्ना ॥१४॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्लेटो : सामान्यपरिचयः

डा० हरिदत्त पालीवालः 'निर्भयः'

'प्लेटो' इति नाम्ना प्रसिद्धस्याचार्यस्य मातापितृ कुले अतिप्रतिष्ठिते सम्भाविते चास्ताम्। प्लेटो विदुषो वास्तविकं नाम तु 'अरिष्टोकलस' इत्येवासीत्, विशालवक्षस्कतयासौ समयेन 'प्लतोन' इत्युपाख्यां ययौ।

प्लेटो सुकरातस्य शिष्य आसीत्। तदाश्रममेवावसता तेन गुरुमरणं यावत् (ई० ३९९ या०) अध्ययनमकारि। तस्येच्छा राजनीतिकक्षेत्रेऽवतरणस्यासीत् किन्तु सुकरातस्य मृत्युदण्डेनास्मिन्क्षेत्रे तस्यारुचिरभूत्। गुरुमरणान्ते च स सद्य एव 'एथेन्स' नगरं तत्याज। 'मेगारा' नगरे कियत्कालं न्युष्य प्लेटो ग्रीस, मिश्र, इटली, सिसली-देशेषु सविशेषं पर्यटनं चक्रे। तस्य स्वीयमिदं कथनम्—यदसौ चत्वारिंशवर्षायुषि इटली-सिसली-यात्रां निरवहत्। तस्य च मनसि तत्रत्यानां सातिशयविषयासक्तिमयजीवनादरुचिरुदभूत्। अन्ततः स एथेंसं प्रत्याययौ। ईशात् ३८७ वर्ष-पूर्वं स प्रसिद्धं विद्यापीठं समतिष्ठिपत्।

चित्रमिदम्, यत्काव्यस्य कलानां च कटुविरोधवतोऽपि प्लेटो आचार्यस्य निजकार्यस्योपक्रमः काव्यनाटकरचनयाऽभवत्। तस्य कविताः कलात्मकदशात्यन्तमुत्कर्षं वहन्ति। किंवदन्तीयम्—यत् प्लेटो 'त्रासदी' प्रभृतिस्वरचनात्मककृतीः सुकरातस्य प्रभावे निपत्य व्यनाशयत्। ततः स स्वात्मानं ग्रीसस्य पुनर्निर्माणाय दर्शनाध्ययनाय च समार्पिपत्। प्लेटोकृतस्यास्य निश्चयस्य त्रीण्यासन् कारणानि——(१) तस्य सामाजिकी स्थितिः, यत्र शासकवर्गसम्बद्धजने तथा सम्भावनाक्रियत, यत् स समाजसेवायै स्वं जीवनं समर्पयेत्। (२) सुकरातस्य मृत्युदण्डः, यः संकटस्य तात्कालिकतां प्रामाणयत् तस्य हृदयं च प्रसह्याऽपीडयत्। (३) तस्य जीवनानुभवाश्च।

प्लेटो स्वरचनासु विविधस्थलेषु स्वयमेतत्स्वीकृतवान्—यत् स राजनीतिक्षेत्रे सामाजिकजीवने च क्रियात्मकं विधातुं निरणैषीत् किन्तु तदानीं राजनीतिव्यपदेशेन त्रियमाणैरनाचारैः विशेषतश्च सुकरातेः दुर्व्यवहारेण तन्मनसि राजनीतौ वैतृष्ण्यमरुचिश्च पदं लेभाते। जीवने कृतानुभवैः स दर्शन-प्रशस्ति-गानं प्रत्याकृष्टो बभूव। तेन च तस्यैषा धारणा बद्धमूला जाता यद्दर्शनज्ञानमेव नगराणां च हितं साधयितुं प्रभवति। तावन्मानवता कल्मषविमुक्ता न भविष्यति यावद् राज्याधिकारो दार्शनिकानां करगतो न भविष्यति, अथवा राजनीतिज्ञा यावद् दार्शनिका न भवन्ति।

जीवनस्य कट्वनुभवा एव प्लेटो-विचारधारां दर्शनोन्मुखीं कर्तुं दायित्वमवक्ष्यन्, यत ऐतिहासिकी प्लेटो-पृष्ठभूमिरिदं नानुमोदते। देश-काल-समाज-परिस्थितयो दर्शनविषये तं नियोजयितुमनुकूला नासन्। एथेंसस्य प्रख्यातपरिवारे युद्धस्य स्थितौ जन्मवतो जनस्य बौद्धिकस्थितिर्मर्यादाश्च सर्वथा अन्यथाऽन्यथा भवन्ति स्म।

सुकरातस्य वधं प्लेटो प्रतीकार-पण बन्ध रूपं मेने। तस्य निधनेन प्लेटो एकाकी भूत्वा स्वं लक्ष्यमधिकविशदं प्रेक्षाञ्चक्रे। संभवीदम्——'प्लेटो अन्वभूत्—यत्कर्तुं सुकरातो नापारि तन्मया पूरयितव्यम्, इति। अर्थात् मानवाचरणीयास्ते शाश्वताः सिद्धान्ता अन्वेष्टव्याः, यैः समाजे स्थायित्वेन सुखस्य राज्यस्य चोपलब्धिः सम्भवति। स निरचैषीत्—अहं सुकरातस्य सिद्धान्तानां प्रयोगं निषेधात्मकरूपेण दम्भ-मिथ्याचारविप्रतीकारहेतोरेव न, अपितु तेषां माध्यस्थ्येन न्याय-मिताचरणयोः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ससाहसं वास्तविकस्वरूपं प्रकटयन् तदनुकूलं न्याय-संविधानसम्बन्धिनो नियमान् रचयिष्यामि, अन्ततश्च तादृशे राज्यनगरस्य निर्माणं करिष्यामि, यद् भूमि: सत्यविवेकात्मकदृढाधारतां दधाना स्यात्। यत्कृते सुकरातस्य (यद्यसौ जीवितोऽभविष्यत्) पूर्णमनुमोदनमलप्स्यत।

प्लेटो व्यमृशत्--यत् सुकरातस्य मृत्युरतदैव सार्थकतां यास्यति यदा तस्य सुहृद: शिष्याश्च तया घटनया प्रेरिता: सन्त: आत्मानं तदुद्देश्य-पूर्त्यर्थमेव समर्पयेयु:।

उक्तोद्देश्यं पुरोनिधाय प्लेटो ई० ३८७ लग्नभागं विद्यापीठविशेषस्य संस्थापनं व्यधात्। अस्मिन् विद्यापीठेऽध्ययनस्य विज्ञानानुसन्धानस्य चेत्युभयो: सुविधासीत्। अथ च तस्य निज-निर्देशेन न्याय-दर्शन-शास्त्र-गणित-प्राकृतिक-विज्ञानानां विधानस्य च शिक्षणं प्राचार्यत। सद्य: अस्य विद्यापीठस्य गौरवं न केवलं 'एथेन्सनगरे' सीमितम्, अपितु सर्वत्र यवन(यूनान)देशं व्याप्नोत्। ततश्च ५२९ ई० अब्दं यावदयं पीठो ज्ञानस्य विविधक्षेत्राणां नेतृत्वं कृतवान्। अस्मिन् विद्यापीठ एकत: शोधकार्याणां व्यवस्थासीत् अपरतश्च राजनीतिकवृत्ति संबन्धिप्रशिक्षणं सम्भावितकुलोत्पन्नानां नवयुवकानां कृतेऽदीयत।

एतानेवोद्देश्यान् दृष्टिसात्कुर्वन् प्लेटो प्रख्यातान् स्वसंवादग्रन्थान्व्यरचयत्, येषु 'विचार गोष्ठी' 'फीडो' (फीड्स) 'गणतन्त्रं, च, विशेषेण महत्त्वपूर्णं स्थानमलभन्त। वार्धके च न्याय-शास्त्रीय सिद्धान्तानपि प्रणीतवान्।

आत्मन: कृतिषु प्लेटो सुकराताय पर्याय-विशेषेण दर्शनशास्त्रस्यात्मने वाणीमुपददौ। तस्य संवादेषु सत्यस्य कठोरप्रतिकारिपूर्णाग्रहग्रहिल-संपोषणेन सह तर्कविवेकपुष्टं व्याख्यानं प्रकाशते। प्रायशोऽसौ गूढरहस्यं विवृणोति। नवसिद्धान्तान् व्याकृत्य दोषाननु संदधाति तत्र। ततश्च तादृशान् सिद्धान्तानन्वेष्टुं प्रवर्तते, ये विवेकेन निर्विरोध-मङ्गीकार्या: स्यु:। प्लेटो दार्शनिकचिन्तनरयोपयुक्तसाधनं संवादमेवामन्यत। यतस्तन्माध्यमेनैवैतत्साधयितुं शक्यमासीत्, यत्सत्यस्योपलब्धि: सहयोगेनैव संभवति।

प्लेटो तादृशीं सत्तामचिक्लृपत्, याऽक्षय्या शाश्वती भवति, तन्मतेनैषैवेश्वर:। जगदिदं विनाशि परिणामि नयाननुधावति। सृष्टिरियं तादृशस्यादर्शभूतमूलप्रतिमानस्य प्रतिरूपमस्ति यत्स्वयं चिरन्तनं भवति, सैषा चेश्वरस्यैव कृति:। अस्या: कृतेर्निर्माणस्यैकमात्रं कारणमीश्वरस्य सततप्रवृत्तउदार: पुरुषार्थोऽस्ति। प्लेटोऽमन्यत यत् केवलं शाश्वतं परमसत्तासंबद्धं ज्ञान-मेवान्तिमं निश्चितं भवितुमर्हति। सृष्टिसंबन्धीनि सर्वविधानि ज्ञानानि तेषामनिश्चिततत्वपरिवर्तनीयत्व-हेतो: प्रायोगिकानि निश्चयानवसायीन्येव च संभवन्ति। मानवस्य शाश्वतात्मन: प्रकाशं विवेक-सत्तानिर्माणं च स्वयं परमसत्ता (ईश्वर एव) कृतवती। शरीराणां नश्वराणामपरेषां च सावय-वानां नक्षत्रग्रहतारादीनां निर्माणं परमेश्वर-निर्मित दैवतैरीश्वरप्रेरितै: कृतम्।

इदं स्वाभाविकमासीत्--यत् प्लेटो समग्रं स्व-सिद्धान्तनिरूपणमूलभूतममुमेव विमर्शममानयत्, यन्मानवजीवनस्य चरमं लक्ष्यं जीवनभौतिकसुख-साधनमात्रपरिसीमितं न, अपितु नीतिसंमुखीन-तर्कबुद्धे:, प्रतिव्यवितविवेकशीलप्रवृत्तेर्विका-सोऽस्ति यत्सत्याभिज्ञाने सक्षमं भवेत्। प्लेटो सामान्यव्यवहारसंबन्धिनीं नैतिकतामन्याम्, दार्शनिक नैतिकतां च तदितरां समर्थितवान्। स प्रोवाच-यत् लोकप्रचलिता सामान्यव्यवहारो-चिता नैतिकता सिद्धान्ततो निर्भ्रान्ता प्रामाणिकी च न भवति। यतस्तदाधारेण चरमसत्यान्वेषिणी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निश्चितान्तर्दृष्टि र्न भवति। प्रत्युत दार्शनिकी नैतिकता पूर्वोक्तान्तर्दृष्टिसमाश्रिता पूर्णतयान्तर्विवेकपुष्टा च भवति। यतो हि राजपुरुषस्य दायित्वं राष्ट्रात्मनः सुरक्षा च निर्माणं च भवति। ततो हि दार्शनिकनीतिज्ञ एव राजपुरुषाधिकारक्षमतां बिभर्त्ति। वास्तविकराजनीतिज्ञताया राष्ट्रिय चरित्रनिर्माणमेवार्थः। अर्थात् ऐकान्तिकनीतिसिद्धान्तानां धरातलप्रसारी प्रयोग एव।

पूर्वोक्तमान्यतानामनुकूलं प्लेटो जीवनस्य समस्तप्रयासेषु हार्दिकीनामनुभूतीनां रागात्मकप्रवृत्तिप्रतिक्रियाणां च महत्त्वं मानयन्नपि विवेकज्ञानादिबौद्धिकशक्तीनां महत्त्वं सर्वोपर्यमानयत्। ज्ञानस्य सत्तास्माकं संवेदनेषु न, प्रत्युतास्माकं तत्संबद्धनिर्णयेषु भवेत्। इत्येवं प्लेटो स्वीचक्रे।

प्लेटो कृतसिद्धान्तनिरूपणे सततमालोचनाया निषेधस्य च स्वर एतावान् मुखरोऽस्ति यत् तेषां पाठको विवेचनस्य विधेयात्मकमंशं स्वभावत उपेक्षितुं न प्रवर्तते। तत्रैतिहासिको हेतुरयम्–प्लेटो कृतमान्यतानां विकासो विरोधाधृतोऽस्ति। सोऽन्वभवत्––होमर-होसिकद्-आदिकवीनां कृतिः सदसद्विवेकमकृत्वा यवन (यूनान) जनतान्धश्रद्धाभावैनागृह्यत्। अतः प्रकृत्या स कवीनामालोचनया स्वसिद्धान्तनिरूपणमुपक्रान्तवान्। प्लेटोकृतीनां पाठकस्तत्कृतविवेचने व्यर्थपाण्डित्यगन्धमनुभवेत्, यतोऽद्यास्मत्कृते होमरप्रभृतीनां ग्रीककवीनां तदेव महत्त्वं नास्ति, यत् प्लेटो दृष्टावासीत्। प्लेटो कवीनिमान् यावन (यूनानी) मस्तिष्कस्य संपोषकद्रव्यरूपेणामंस्त। स्वभावतस्तस्य लक्ष्यं कवीनां काव्यालोचनं तत्कृते नियमविधानं च निरपद्यत। अतएव तस्याधिकांशतो विवेचनं निषेधात्मकं प्रत्यफालीत्। एष एव अरस्तू–प्लेटो गतो दृष्टिभेदोऽस्ति। अरस्तुर्वर्ण्यस्यादर्शलक्ष्यं निरूपयति; प्लेटो च विवाददृशा तथ्यविवेचनं दोषनिरूपणं च करोति। प्लेटोकृतकाव्यसम्बन्धि दिक्सूत्रं दर्शनशास्त्रस्य काव्यानां पारस्परिकविरोधस्य चान्तर्निहितमास्ते। इदमेव काव्यनिषेधस्य मूलमप्यस्ति। काव्यदर्शनशास्त्रयोरयं प्रतीयमानो विरोधो न स्वाभाविकः। काव्यदर्शनयोरयं विरोधोऽविकसितावस्थायामेव संभवति। किन्तु विकस्वरोच्चधरातलारूढौ महाकविदार्शनिकौ जात्वपि विरोधिनौ न भवतः। स्वयं प्लेटोकाव्ये तत्कवित्वशक्तिस्तद्विवेचनप्रणाल्यां स्फुरतितराम्। ईशात्परं तृतीयशताब्द्यां प्लेटोसिद्धान्ता रोम-वास्तव्यस्य प्रथितविचारकस्य प्लोटिनसस्य चिन्तनधारां प्रभावितां चक्रुः। ततश्च ते प्लोटिनसस्यैव विमर्शनदिशाऽवालोक्यन्त। अनयैव दिशा सप्तदशशताब्द्यां लब्धप्रतिष्ठविचारकाणां तादृशैकसमुदायेन प्रेरणा प्राप्ता, ये 'केम्ब्रिज प्लेटो निष्ठाः' समबोध्यन्त। एषां विचकट, हैनरी, मूर-कडवर्थ, जानस्मिथ प्रभृतयो विशेषत उल्लेख्या सन्ति। ततः परम् ए० एन्० ह्वाइटहैड विचारकेण स्वरचनासु तथाविधस्य विज्ञानदर्शनस्यान्वेषणे प्रयासोऽकारि यस्य मूलं तन्मते प्लेटो रचनास्वन्तर्भूतमासीत्।

वस्तुतः सृष्टि के लिये कर्मवाद को ही पर्याप्त इस लिये नहीं माना जाता, क्योंकि कर्म जड़ होता हुआ, स्वयं चालित नहीं हो सकता, परन्तु यह भी तो एक पूर्वाग्रह ही है कि जड़ पदार्थ स्वयं चालित नहीं होते। चेतन ही क्यों स्वयं चालित हो? केवल विशुद्ध चेतन को स्वयं चालित हम कभी नहीं देखते। भौतिक वस्तुओं से युक्त तथा कथित चेतन को ही स्वयं चालित देखा जाता है। सूक्ष्म रूप से देखने पर शरीरयुक्त प्राणी भी स्वयं चालित नहीं है। उसमें भी जड़ इच्छाशक्ति का हाथ है। ईश्वरसिद्धि के लिये या ईश्वर स्वतन्त्रता के लिये हम जिन युक्तिओं का प्रयोग करते हैं, वे भी दोषपूर्ण हैं। ईश्वरवादियों के पक्ष में बलवती युक्ति एकमात्र श्रुति प्रमाण है। जो भी हो अद्वैतवेदान्त ईश्वरवाद को मानता हुआ भी विवर्तवाद द्वारा सृष्टि की व्याख्या देता है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋण और वह भी घी का !

श्री मञ्जुल मयङ्क पन्तुल, वेद व्याकरणाध्यापक, विश्वभारती, शान्ति निकेतन

माधवाचार्य के सर्वदर्शन संग्रह में चार्वाकों की सुप्रसिद्ध उक्ति "यावज्जीवेत् सुखं जीवेत्, ऋणं कृत्वा घृतं पिबेत्" का अभिप्राय यही लिया जाता रहा है कि "जब तक जियो मौज से जियो और कर्ज लेकर भी घी पियो"। चार्वाकों ने अर्थ व काम की जिस तरह वकालत की है, उससे "कर्ज काढ़कर घी पीने" वाले अर्थ की संगति सटीक बैठ जाती है। कर्ज काढ़ने वाले व्यक्ति को समाज अच्छी दृष्टि से यूंही नहीं देखता। फिर जो आदमी अपनी चादर न देख कर पांव फैलाने की कोशिश करे या दूसरे को ऐसा करने को उकसाये, उसकी बात सुनेगा ही कौन? लेकिन कर्ज लेने व देने की प्रथा मनुष्य के सभ्य होने के समय से लेकर आज तक बराबर चली आ रही है। विचारणीय यह है कि ऋण लेकर घी पीने की कोई प्रथा तत्कालीन समाज में प्रचलित थी या नहीं?

स्मृतियों के अनुशीलन से पता लगता है कि घृत भी ऋणादान की एक वस्तु रही है। कात्यायन-स्मृति१ में ऋण के रूप में लिये गये घी पर व्याज की दर आठगुना बताई गई है।

मजे की बात यह है कि इन स्मृतियों से यह बिलकुल पता नहीं लगता कि किन परिस्थितियों अथवा अवसरों पर किस उद्देश्य से कोई व्यक्ति घृत-ऋण लेता था। विचार करने से वह मद सामने उभर आता है, जिसमें घृत-व्यय की सम्भावना अधिक हो सकती थी और मनुष्य को घृत-ऋण लेने की आवश्यकता पड़ती थी। कहा जा सकता है कि वे परिस्थितियां थीं—ब्राह्मण-भोजन व यज्ञ। प्राचीन भारत में घी और दूध की नदियों वाली कहावत की निस्सारता भी इससे प्रमाणित हो जाती है। अगर रहीं भी हों जन-साधारण के लिये नहीं थीं। सम्पन्नता सार्वजनिक उपलब्धि की कसौटी नहीं हो सकती। घृत के ऋणविधान तथा वृद्धिविधान से यह बात भी स्पष्ट हो जाती है कि ऋण की प्रेरणा चार्वाकों की नहीं अपितु पूर्वसिद्ध है। अब रही घी पीने की बात। भारतीय समाज में, 'आयुर्घृतम्' कह कर घी को आयु का दूसरा पर्याय ही मान लिया गया। इसमें सन्देह नहीं कि अब्भक्षों और वायुभक्षों की भांति ही कुछ लोग घृत भक्ष भी रहे होंगे। ऋग्वेद की उर्वशी२ ऐसों में अन्यतम है। वेदपाठी के लिये तो पाठ आरम्भ करने के पहले घी पीने का विधान३ ही है। घृतपान की परम्परा का सबसे बड़ा उन्मेषक वह आशीर्वाद है जिसमें आज कल के "मौज करौ" की तरह "सर्पिः४ पिब" कहा जाता था। अब अगर घृत की ऋण-परम्परा को पान-क्रिया से सम्बद्ध कर दिया जाय तो कर्ज लेकर घी पीने वाला अर्थ भी सम्बद्ध मालूम पड़ता है। चूंकि

---

१. तैलानाञ्च सर्वेषां मद्यानामथ सर्पिषाम्
वृद्धिरष्टगुणा प्रोक्ता गुड़स्य लवणस्य च।
कात्यायन (विवादरत्नाकर)

२. घृतस्य स्तोकं सकृदह्न आश्नाम।
ऋ० वे० १०।९५।१६

३. पीत्वा धूमं घृतञ्चैव शुचिर्भूत्वा ततो वदत्।
नारदीय शिक्षा।

४. चतुर्भाणी—डा० मोतीचन्द्र व वासुदव शरण अग्रवाल।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

झगड़ा "ऋण" शब्द को लेकर है, इस लिये इस पर भी विचार करना आवश्यक है। पाणिनि ने अपने "ऋणमाधमर्ण्ये" सूत्र में ऋण को कर्ज में ही सीमित रखा है। किन्तु भट्टोजिदीक्षित ने मेदिनी कोष के आधार पर ऋण का अर्थ पानी भी बतलाया है। प्राचीन ग्रन्थों में ऋण का प्रयोग पानी के अर्थ में मिलता भी है। दैवज्ञ सूर्य विरचित कामतंत्र काव्य मंजरी ५ में "शीतलेन ऋणेन" कहकर ऋण शब्द की जलार्थकता चरितार्थ की है। कामतंत्र के इस ग्रन्थ में प्रयुक्त ऋण शब्द के आधार पर हम भी अर्थ काम–प्रधान चार्वाक तंत्र की "ऋणं कृत्वा घृतं पिबेत्" वाणी उक्ति में 'ऋण शब्द का प्रयोग पानी के अर्थ में मानते हैं और व्याख्या करते हैं कि "घृतं जलं कृत्वा अर्थात् घृतं जलं मत्वा पिबेत्। यत्र यत्र जलमुपयुज्यते तत्र तत्र सर्वत्र घृतस्य व्यवहारः जलवद् व्यवहारः। घृतस्य जलवत् वर्त्तितया सुखं जीवेत्।"

पानी की तरह घी का व्यवहार करना सुखातिशय का द्योतक है। चार्वाक की उक्ति से सुखातिशय व उसके उपभोग की प्रेरणा है न कि अवाञ्छित ऋण (कर्ज) की, जिसके एक बार ले लेने पर आजीवन मुक्ति नहीं। इस लिये कर्ज लेकर घी पीने वाला अर्थ सम्बन्धहीन व त्याज्य है।

----

५. प्रबुद्धस्तु ततः सोऽपि शरीरेण प्रपीडितः।
सर्वमग्नि शान्तयित्वा शीतलेन ऋणेन च।।२१।

(पृ० संख्या ४५६ का शेष)

गुरुकुल समाचार

आदरणीय कुलपति जी ने अपने अभिनन्दन के उत्तर में कहा कि "हमारा गुरुकुल एक बड़ा परिवार है, यहां न कोई छोटा है न बड़ा, सभी को गुरुकुल की उन्नति में सहयोग देना है। मैं गुरुकुल को शिक्षणालय के रूप में ही नहीं अपितु एक आन्दोलन के रूप में मानता हूं और मुझे जो यह अवसर मिला है मैं उसमें गुरुकुल की उन्नति की दिशा में कुछ भी कर सका तो यह मेरा सौभाग्य होगा। आप सब लोगों की वर्चस्विता से मैं आगे बढ़ सकूं यही मेरी अभिलाषा है।"

पत्रिका परिवार तथा कुलवासियों की ओर से हम डाक्टर साहब का पुनः अभिनन्दन करते हैं तथा आशा करते हैं कि उनके कुलपतित्व में गुरुकुल चहुंमुखी उन्नति करेगा तथा यहां व्याप्त शिथिलता का अन्त होकर कुल भूमि सुख-शान्ति और निरोगिता से फलती-फूलती रहेगी।

डा० वासुदेव 'चैतन्य' की स० मुख्याधिष्ठाता के पद पर नियुक्ति

यह सूचित करते हुए अत्यन्त हर्ष होता है कि डा० वासुदेव 'चैतन्य' की स० मुख्याधिष्ठाता के पद पर नियुक्ति की गई है। आशा है आपकी देख-रेख में गुरुकुल का प्रबन्धकीय कार्य सूचारुरूप से चलता रहेगा तथा गुरुकुल उन्नति करता रहेगा।

-o-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल समाचार

श्री महावीर 'नीर' विद्यालंकार

ऋतु रंग

समयोऽयं ज्येष्ठाषाढ़स्य गीयताम् सम्प्रति हि--
आरामाधिपतिर्विवेकविकलो नूनं रसा नीरसा ।
वात्याभिः परुषीकृताः दशदिशश्चण्डातपो दुःसहः ।।
एवं धन्वनि चम्पकस्य सकले संहारहेतावपि ।
त्वं सिञ्चन्नमृतेन तोयद कुतोऽप्याविष्कृतो वेधसा ।।
जगन्नाथ पण्डितराज

कुलभूमि का वातावरण अभी गर्मी की प्रचण्डता से व्याकुलता भरा है। यों तो जून मास के प्रथम सप्ताह से ही गुरुकुलीय गगनमण्डल पर आंधी तूफान के साथ मेघों का उत्पात प्रारम्भ हो गया। आंधी में अनेक वृक्षों की शाखाएं भग्न हो गयीं। पर्वतमालाओं के सामीप्य के कारण हरिद्वार क्षेत्र में वर्षा कुछ पहले ही बौछार कर जाती है। इससे वातावरण कभी कभी बड़ा सुहावना हो जाता है किन्तु दिन अभी अत्यन्त उष्णता लिए है। उत्ताप असह्य हो उठा है। प्रस्वेद और घाम का प्रकोप होने लगा है। आकाश पर चढ़ी धूल कुछ शांत होने लगी है। कुल के आम्र-फल पकने को उद्यत हैं। जामुनों पर बोर तो पहले ही आ चुका था अब फलों से डालियां लद गई हैं। नीम वृक्षों पर निबोलियां कानों की झुमकियों के समान सुशोभित हो उठी हैं। अमरूदों में नन्हे-नन्हे अमरूद आगए हैं। बया नाम की सुन्दर नन्हीं रंगविरंगी चिड़ियों ने यत्र तत्र अपने घोंसले लटका लिए हैं। कुल की अमृत वाटिका में विभिन्न फलों की बहार वायु के झोकों के साथ मन प्रफुल्लित कर जाती है। जून मास में शैक्षणिक विभागों का अवकाश होने से कुलीय वातावरण निस्तब्ध रहा, किन्तु अब अनेक कुलवासी तथा छात्रगण आने लगे हैं। सूनी सड़क पर तथा विद्यालय आश्रम व महाविद्यालय आश्रम में हलचल सी दिखाई देने लगी है। कुल में कुछ नये अधिकारियों के आने से नयी उमंगें तथा नयी आशाएं हिलोरें मार रही हैं। मच्छर, मक्खियों का प्रभाव काफी है। इस माह कुलभूमि में दर्शनार्थी यात्रियों की खूब चहल पहल रही।

विद्यालय विभाग

विद्यालय विभाग में ग्रीष्मावकाश ३० जून को समाप्त होकर १ जुलाई से ब्रह्मचारी घरों से आने लगे हैं। नयी आशाओं और नये उद्देश्यों के साथ नया सत्र प्रारम्भ होने वाला है। अष्टम श्रेणी तक के छात्रों की पुनः परीक्षा २७ जुलाई से होंगी। ग्रीष्मावकाश में ब्रह्मचारियों ने गंग-स्नान का खूब आनन्द प्राप्त किया। सभी शेष ब्रह्मचारी स्वस्थ तथा प्रसन्न रहे। अब अधिकारी वर्ग विद्यालय की उन्नति के लिए काफी सचेत और सतर्क हैं। आश्रम की टूट-फूट तथा मरम्मत एवं पुताई आदि से आश्रम का भव्य-भवन आलोकित हो उठा है। १ जुलाई से प्रवेश प्रारम्भ है। प्रवेशहेतु नियमावली आचार्य, गुरुकुल काँगड़ी से प्राप्त की जा सकती है।

परीक्षा परिणाम

इस वर्ष विद्यालय-विभाग की ९म व १०म श्रेणियों का परिणाम अत्युत्तम रहा। समस्त

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अध्यापक-गण तथा मुख्याध्यापक जी बधाई के पात्र हैं ।

ब्र० रवीन्द्र कुमार १०म श्रेणी ने प्रथम श्रेणी में उत्तीर्ण होकर वर्षों से खोई प्रतिष्ठा को गौरवान्वित किया। हम ब्रह्मचारी के उज्ज्वल भविष्य की कामना करते हैं। अन्य ब्रह्मचारियों का परीक्षा परिणाम इस प्रकार रहा--

१०म श्रेणी--ब्रह्मचारी रवीन्द्र कुमार प्रथम श्रेणी में उत्तीर्ण। तथा ब्र० दिनेश, ब्र० रामचन्द्र राय, ब्र० शशिभूषण व ब्र० सुधर्मा सभी उत्तीर्ण घोषित किये गए ।

९म श्रेणी--९म श्रेणी के निम्न ब्रह्मचारी उत्तीर्ण घोषित किए गए--ब्र० अशोक कुमार (हर प्रसाद जी), ब्र० अवधेश, ब्र० ओम प्रकाश, ब्र० प्रमोद कुमार। अभी किन्हीं कारणों से कुछ परिणाम अवरुद्ध हैं। हम सब उत्तीर्ण छात्रों को बधाई देते हैं।

विशेष-व्याख्यान

दिनांक २-६-७४ को आयुर्वेद महाविद्यालय में डा० राममूर्ति मिश्र (ब्रेन सर्जन) का ब्रेन विषय (मस्तिष्क) पर विशेष व्याख्यान हुआ। (एक्यू पंक्चर) सुईयां चुभाकर बेहोश करने की चीनी पद्धति पर डा० साहब ने विशेष प्रकाश डाला। हम डाक्टर साहब का हार्दिक धन्यवाद करते हैं।

इसी मास आर्यसमाज के साप्ताहिक अधिवेशन के अवसर पर श्री स्वामी कृष्णानन्द जी (हिमाचल निवासी) का अत्यन्त प्रभावशाली धार्मिक भावनाओं को उद्वेलित करने वाला व्याख्यान हुआ। उन्होंने कहा कि हमें अपने विचारों पर दृढ़ तो होना चाहिए किन्तु कट्टर नहीं। स्वामी जी काफी दिन गुरुकुल में स्वास्थ्यलाभ करते रहे। हम उनके आभारी हैं।

नयी उपलब्धि

आयुर्वेद महाविद्यालय के अध्यक्ष डाक्टर अनन्तानन्द जी आयुर्वेदालंकार के कठोर परिश्रम एवं प्रयास से श्रद्धानन्द चिकित्सालय गुरुकुल कांगड़ी में 'एम्बुलेंस गाड़ी' की व्यवस्था हो गई है। अनेक पारिवारिक एवं मानसिक उलझनों के होते हुए भी डा० जी ने जो आयुर्वेद महाविद्यालय की प्रगति के लिए सराहनीय कार्य किया है, उसके लिए समस्त कुलवासी उनके आभारी हैं। ज्ञात हुआ है कि गुरुकुल आयुर्वेद महाविद्यालय की वार्षिक परीक्षाएं १६ जुलाई से प्रारम्भ होंगी। हम समस्त छात्रों की सफलता की शुभ कामना करते हैं।

कुलसचिव डा० गंगाराम जी अनेक पदों पर

गत दो मास से श्री डा. गंगाराम जी कुल-सचिव, गुरुकुल कांगड़ी के सहायक-मुख्याधिष्ठाता पद पर अस्थायी रूप से कार्य करते रहे हैं। साथ ही उन्हें गुरुकुल कांगड़ी के मुद्रणालय (प्रिंटिंग प्रेस) के नियोजक के रूप में भी नियुक्त किया गया है। प्रेस मैनेजर श्री सुरेश चन्द्र जी पूर्ववत् अपना कार्य-भार सम्भाले रहेंगे। ज्ञात हो कि अब प्रेस का प्रबन्ध फार्मेसी के अधिकार में न होकर गुरुकुल विश्वविद्यालय के अधिकार में आ गया है। आशा है उक्त महानुभावों के संरक्षण में गुरुकुल और प्रेस उत्तरोत्तर उन्नति करते जायेंगे।

कुलभूमि में नयी लहर नया जोश

आजकल समस्त आर्य-जगत् के समान गुरुकुल में भी आर्य प्रतिनिधि सभा पंजाब के नवयुग के कारण नयी उमंग और नया जोश व्याप्त है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१ जुलाई से ४ जुलाई तक श्रद्धानन्द नगरी में एक उत्सव सा रहा । इन्हीं दिनों गुरुकुल की स्वामिनी सभा 'आर्य प्रतिनिधि सभा पंजाब' की 'अन्तरंग' वेद मन्दिर में सम्पन्न हुई । साथ ही विद्या सभा तथा सीनेट की कार्यवाही भी हुई। जिसमें कुछ नये महत्त्वपूर्ण निर्णय लिए गए । समस्त अधिकारियों के स्नेहयुक्त व्यवहार से कुल में आनन्दोत्सव सा रहा ।

डा० सत्यकेतु जी विद्यालंकार का कुलपति पद पर भव्य-अभिनन्दन

गुरुकुल कांगड़ी विश्वविद्यालय के पुराने व सुयोग्य स्नातक, हिन्दी साहित्य के उच्चकोटि के लेखक, प्रसिद्ध इतिहासज्ञ तथा शिक्षाशास्त्री मान्यवर डा० सत्यकेतु जी विद्यालंकर का २ जुलाई को वेदमन्दिर में गुरुकुल विश्वविद्यालय के कुलपति पद पर प्रतिष्ठित होने के उपलक्ष्य में बड़े ही हर्षोल्लासपूर्ण वातावरण में भव्य अभिनन्दन किया गया ।

डा० सत्यकेतु जी विद्यालंकार १९२४ में प्रथम श्रेणी में तीन स्वर्ण पदक लेकर गुरुकुल के सुयोग्य स्नातक बने । आपने अनेक छात्रोपयोगी इतिहास तथा समाजशास्त्र सम्बन्धी पुस्तकों, उपन्यासों व नाटकों की रचना की है । आपकी प्रायः सभी पुस्तकें विभिन्न विश्वविद्यालयों में पाठ्यक्रमों के लिए स्वीकृत हैं । आपने अब तक पेरिस, चीन, जापान आदि अनेक विदेशी राष्ट्रों का भ्रमण ही नहीं अपितु वहां के जनजीवन को भी समीप से देखा और परखा है । पेरिस से ही आपने अपनी योग्यता के बल पर डाक्टरेट की उपाधि प्राप्त की । गुरुकुल ने भी आपको १९५५ में अपनी उच्चतम उपाधि 'विद्यामार्तण्ड' से विभूषित किया । आपकी विद्वत्ता और सुजनता किसी स छिपी नहीं है । विद्वत्ता के कारण आपको राष्ट्र के अनेक संस्थाओं ने पुरस्कारों से सम्मानित किया है । आपके सुयोग्य हाथों में गुरुकुल की बागडोर देकर आपको ही नहीं बल्कि अपने आपको और समस्त विद्वत्समाज को अधिकारियों ने सम्मानित किया है ।

आपका अभिनन्दन करते हुए स्वामी सर्वानन्द जी, श्री रामगोपाल जी शाल वाले, श्री पृथ्वी सिंह जी आजाद, स्वामी अग्निवेश जी, श्री धर्मदेव जी विद्यामार्तण्ड, आचार्य डा० रामनाथ जी वेदालंकार, सभा प्रधान श्री स्वामी इन्द्रवेश जी, श्री निरूपण जी विद्यालंकार, श्री मनोहर जी विद्यालंकार, श्री वैद्य धर्मदत्त जी आयुर्वेदालंकार आदि महानुभावों ने आपके व्यक्तिगत गुणों और विद्वत्ता का वर्णन कर उज्ज्वल भविष्य की कामना की । विश्वविद्यालय के सभी विभागों की ओर से कुलपति जी को पुष्पहार पहनाए गए । अभिनन्दन समारोह का संचालन आर्य प्रतिनिधि सभा पंजाब के महामन्त्री श्री वीरेन्द्र जी ने किया ।

तदनन्तर ३ जुलाई को गुरुकुल विश्वविद्यालय के शिक्षकेतर कर्मचारियों तथा गुरुकुल फार्मेसी के कर्मचारियों ने भी मान्य कुलपति जी का कार्यालय के खुले आंगन में हार्दिक अभिनन्दन किया। समस्त कर्मचारियों ने गुरुकुल की चहुंमुखी उन्नति के लिए उन्हें अपना पूर्ण सहयोग और समर्थन देने का वचन दिया । हरिद्वार युवक कांग्रेस के कार्यकर्ताओं—श्री मुरली मनोहर व श्री अम्बरीष ने मान्य कुलपति जी का हरिद्वार क्षेत्र से अभिनन्दन किया । यूनियन प्रधान श्री काश्मीरसिंह 'राही' तथा मन्त्री श्री साधुराम जी ने कुल में व्यापक भेदभाव, असमानता, आर्थिक विषमता, जातिवाद प्रांतवाद आदि बुराइयों को दूर कर स्वामी श्रद्धानन्द जी के सपनों के गुरुकुल का पुनः निर्माण करने की मान्य कुलपति जी से अपील की।

(शेष पृ.सं. ४५३ पर)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वाध्याय के लिये चुनी हुई पुस्तकें

वैदिक साहित्य

वेदोद्यान के चुने हुए फूल (सजिल्द)	५.00
वेद का राष्ट्रीय गीत (सजिल्द)	५.00
मेरा धर्म (सजिल्द)	७.00
वरुण की नौका (दो भाग)	६.00
अग्निहोत्र (सजिल्द)	२.२५
आत्म-समर्पण	.५0
वैदिक स्वप्न विज्ञान	२.00
वैदिक अध्यात्म विद्या	.७५
वैदिक सूक्तियां	.७५
ब्राह्मण की गौ (सजिल्द)	.७५
वैदिक ब्रह्मचर्य गीत	२.००
वैदिक विनय (तीन भाग)	६.00
वेद गीतांजलि	२.००
सोम सरोवर (सजिल्द)	२.00
वैदिक कर्त्तव्य शास्त्र	.५०
सन्ध्या सुमन	.५०
स्वामी श्रद्धानन्द जी के उपदेश	३.७५
आत्म मीमांसा	२.००
वैदिक पशु यज्ञमीमांसा	२.00
सन्ध्या रहस्य	२.००
अथर्ववेदीय मन्त्रविद्या	३.५०
ईशोपनिषद्भाष्य (सजिल्द)	२.००
अध्यात्म रोगों की चिकित्सा	२.५०
ब्रह्मचर्य संदेश	४.५०
आर्य संस्कृति के मूल तत्त्व	४.००
स्त्रियों की स्थिति	४.००
एकादशोपनिषद्	२.००
विष्णु देवता	२.००
ऋषि रहस्य	२.००
हमारी कामधेनु	२ ००
	२.००

ऐतिहासिक तथा जीवन चरित्र

भारतवर्ष का इतिहास ३ य भाग	४-५०
बृहत्तर भारत	७.००
योगेश्वर कृष्ण	४.००
स्वामी श्रद्धानन्द जी महाराज	.२५
स्वामी दयानन्द का पत्र व्यवहार	.७५
गुरुकुल की आहुति	.५०
अपने देश की कथा	.३७
दी मिडिल ईस्ट (इङ्गलिश)	३.००
ऐशियण्ट फींडम	५.७०

स्वास्थ्य सम्बन्धी ग्रन्थ

स्तूप निर्माण कला (सजिल्द)	३.००
प्रमेह श्वास अर्शरोग	.२५
जल-चिकित्सा विज्ञान	.७५
होमियोपैथी के सिद्धान्त	२.५०
आसवारिष्ट	२ ५०
आहार	५.००

संस्कृत ग्रन्थ

संस्कृत प्रवेशिका प्रथम भाग	.६६
संस्कृत प्रवेशिका २य भाग	.८७
बालनीति कथामाला	.७५
साहित्य सुधा संग्रह	.२५
पाणिनीयाष्टकम् (दो भाग) प्रतिभाग	७.००
पंचतन्त्र पूर्वार्द्ध (सजिल्द)	२.५०
पंचतन्त्र उत्तरार्द्ध (सजिल्द)	२.००
सरल शब्द रूपावली	.२५
सरल धातु रूपावली	.६०
संस्कृत ट्रांसलेशन	.२५
पंचतंत्र (मित्र सम्प्राप्ति)	.७५
पंचतंत्र (मित्र भेद)	.५०
संक्षिप्त मनुस्मृति	.५०
रघुवंशीय सर्गत्रयम्	.२५

पुस्तकों का बड़ा सूचीपत्र मुफ्त मंगाइये । धार्मिक संस्थाओं के लिये विशेष रियायत का भी नियम है।

पुस्तक भण्डार, गुरुकुल कांगड़ी विश्वविद्यालय, हरिद्वार (जि० सहारनपुर)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादक : रामप्रसाद वेदालंकार ।
प्रकाशक : डॉ० गंगाराम, कुलसचिव : गुरुकुल कांगड़ी विश्वविद्यालय ।
मुद्रक : सुरेशचन्द्र बंसल, मैनेजर : गुरुकुल कांगड़ी प्रिन्टिंग प्रेस, हरिद्वार ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल-पत्रिका

गुरुकुल कांगड़ी विश्वविद्यालय हरिद्वार

DIGITIZED C-DAC
2005-2006
30 AUG 2005

जून १९७४, ज्येष्ठ २०३१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषय-सूची

सं० विषया:	लेखका:	पृष्ठांका:
१ श्रुति-सुधा		३७७
२ अथ प्रकाशाभ्युदयोनाम	डा० मंगलदेव शास्त्री	३७८
३ वसन्त-ऋतु:	काव्यतीर्थ: ज०व्यं० पल्लेवार: 'जयेश:'	३८०
४ अग्निमन्त्रमाला	श्री अरविन्द:, अनु० श्री जगन्नाथो वेदालंकार:	३८१
५ गुरु-दक्षिणा	श्री रत्नाकर जोशी	३८५
६ क्रान्तदर्शी लाला हरदयाल:	श्री विद्याभूषण: गणेशराम शर्मा	३८६
७ विनय:	आचार्यो धर्मदेवो विद्यामार्तण्ड:	३८८
८ चारुचरितामृतबिन्दु:	श्री हजारीलाल शर्मा (विद्यालंकार:)	३८९
९ मम मनोगतम्	श्री विश्वनाथ केशव छत्रे	३९१
१० साहित्य-समीक्षा	श्री पं० भगवद्दत्तो वेदालंकार:	३९२
११ सम्पादकीय टिप्पण्य:	" " "	३९४
१२ शोक समाचार		३९५
१३ कच्छवंशमहाकाव्य	डा० रामदत्त शर्मा, एम. ए., पीएच. डी	३९७
१४ सौर्य अणुतन्त्र एवं वैदिक देवता	श्री दीनदयालु गुप्त, एम. एस-सी, एल. एल-बी	४०२
१५ महर्षि दयानन्द की विश्वदर्शन को देन	श्री प्रो० जयदेव वेदालंकार	४०७
१६ सामवेद हिन्दी-पद्यानुवाद····	श्री विद्यानिधि शास्त्री	४११
१७ गुरुकुल-समाचार	श्री महावीर 'नीर' विद्यालंकार, एम०ए०	४१५

—★—

गुरुकुल-पत्रिका का वार्षिक मूल्य—

देश में - ४ रुपये, विदेश में - ७ रुपये, एक प्रति - ४० पैसे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओ३म्

गुरुकुल-पत्रिका

[गुरुकुलकांगड़ीविश्वविद्यालयस्य मासिक पत्रिका]

ज्येष्ठ : २०३१, जून १९७४, वर्षम्-२६, अङ्कः १०, पूर्णाङ्काः ३०६

श्रुति सुधा

ओ३म् ये त्वा देवोस्त्रिकं मन्यमानाः पापा भद्रमुपजीवन्ति पज्राः ।
न दूढ्ये अनुददासि वामं बृहस्पते चयस इत् पियारुम् ॥५॥

(देव) हे देव बृहस्पति ! (ये) जो (पापाः) पापी (पज्राः) बलवान् व्यक्ति (त्वा भद्रं) तुझ भद्रको (उस्त्रिकं मन्यमानाः) निर्बल तथा अल्पदुग्धा गौ मानकर (उपजीवन्ति) तेरे आश्रय में जीते हैं ऐसे (दूढ्ये) दुष्टबुद्धि पुरुष को (वामं) वाञ्छनीय ज्ञानरूपी धन (न अनुददासि) अनुदान रूप में न दो । और हे बृहस्पति ! तुम (इत्) निश्चय से (पियारुं) ज्ञानरस के पिपासु को (चयसे) चुनते हो अथवा (पियाहं) हिंसक व्यक्ति को (चयसे) विनष्ट करते हो ।

उस्त्रिकम्––उस्त्रियेति गो नाम । कुत्सितामल्पक्षीरोत्स्राविणीं गां जीर्णमनड्वाहं वा––सायणाचार्य । य उस्राभिः गोभिश्चरति तम्––स्वामी दयानन्द ।

पज्राः––बलवन्तः

दूढ्ये––दुर्धिये

चयसे––चि चये, चयसे चातयसि (निघ. ४।२५)

इस मन्त्र से यह ध्वनित होता है कि शिक्षणालयों में पापबुद्धि, धूर्त तथा दुराचारी विद्यार्थियों का विनम्र शासनप्रिय सरल प्रकृति के विद्यार्थियों पर शासन हो जाता है । मन्त्र कहता है कि आचार्य को इतना सबल होना चाहिये कि ऐसे दुष्ट व्यक्ति अन्यों पर हावी न होने पावें ।

— —

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ प्रकाशाभ्युदयो नाम

श्री डा० मंगलदेव शास्त्री

मम कार्यकालस्य समाप्तिः

उत्तरप्रदेशीयशासनेन प्रवर्तिताया विश्वविद्यालयीयनूतनव्यवस्थाया अनुसारेण सर्वेष्वेवोत्तरप्रदेशीयशासनाधीनविश्वविद्यालयेषु तस्मिन् वर्षेऽन्तरालकालस्य षण्मासपरिमितस्यावधिं यावदेव उपकुलपतीनां नियुक्तयः कृता अभूवन्। अतः अक्तूबरमासपर्यन्तमेव ममापि उपकुलपतित्वस्य काल आसीत्। तत्रत्यां खेदावहामवस्थां पश्यन्नहं नव पुनर्नियुक्त्यै सोत्साहो विशेषप्रयत्नवान्वासम्।

यदा चाक्तूबरमासान्ते पुनर्नियुक्तेः समय आगस्ततदा निहितस्वार्थैः संकीर्णबुद्धिभिः सत्यासत्यभावनाविरहितैः कूटोपायदक्षैरुच्चावचपदभाग्भिः, मम मिथ्याहस्ताक्षराद्याधारेण, सर्वं चक्रमेवं संचालितं यत्तत्र न्याय्यो निर्णयः सर्वथा असंभव एव संजातः।१

अवश्यं तत्सर्वं दृश्यमत्यन्तं निन्दास्पदं तेषां कृते लज्जाकरं चासीत्!

सर्वथा सत्यमेतत्

सङ्गः सतां शर्मशतानि सूते
सङ्गोऽसतां तद्विपरीतवृत्तिः।
यस्तेजसां यस्तमसां स्वभावो
भेदस्तयोः सर्वजगत्प्रसिद्धः ॥१॥

किञ्च,

बहूपकारैरुपसेवितोऽपि
कृतज्ञतां नैव खलो बिभर्ति।
सुवर्णकुम्भेन पयोनिषेका-
न्माधुर्यमाप्नोति न निम्बवृक्षः ॥२॥

किं बहुना यस्या हि

(१)

संस्थाया निर्माणे विद्याया संस्कृतेश्चासीत्।
लक्ष्यं विश्वस्य भव्यं संपत्त्या भारतस्यास्य ॥२

(२)

सोत्पथमार्गे पतिता स्वार्थेनान्धेन लोकानाम्।
कलहस्य चाप्यशान्तेर्नग्नं नृत्यं प्रदर्शयति ॥

परमन्तत आत्मनः साहित्यिककार्यस्य महत्त्वमवेक्ष्य, यदत्यन्तं मम प्रियमासीत्, निजसौभाग्यमेव तत्सर्वममन्ये। ततश्च ३१।१०।१९६१ दिनांके तस्य पदस्य भारं नियमानुसारं प्रस्तोत्रे समर्प्य पुनरहं स्वतन्त्रतां लब्धवान्।

वाराणसेयसंस्कृतविश्वविद्यालयस्य कार्यकारिण्याः परिषदः सदस्यत्वम्

(१९६५—१९६८)

२९।१।१९६५ दिनांकादारभ्य २८।१।१९६८ दिनाङ्कपर्यन्तमुक्तविश्वविद्यालयस्य कार्यकारिण्याः

---

१ सर्वमेतद्वृत्तं सप्रमाणमन्यत्र प्रपञ्चयिष्यतेऽस्माभिः।

२ यस्या हि संस्थाया निर्माणेऽस्य भारतस्य विद्यायाः संस्कृतेश्च संपत्त्या विश्वस्य भव्यं लक्ष्यमासीदित्यन्वयः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिषदो नामनिर्देशितः सदस्योऽहं कुलपतिना राज्यपालेन नियुक्तः। एतस्य कालस्यापि ममानुभवो विश्वविद्यालयसम्बन्धे नैवोत्साहकरः प्रसन्नताप्रदो वा वर्तते। तदधः **प्रत्यवमर्शे** किञ्चिद् वर्णयिष्यते।

गुरुकुलकांगड़ीविश्वविद्यालयस्य परिद्रष्टृ पदम्

(१९६५–१९६८)

भारतशासनेन स्वीकृतनियमानुसारमुक्तविश्वविद्यालयस्य 'सेनेट' (Senate) संस्थया साग्रहं१ प्रार्थितोऽहम् १।१।१९६५ दिनांके गुरुकुलकांगड़ीविश्वविद्यालयस्य परिद्रष्टृ (Visitor) पदं स्वीकृतवान्। तस्य विश्वविद्यालयोपकुलपतेर्नियुक्तिर्वस्तुतः परिद्रष्टुरधीना भवति। विश्वविद्यालयस्य समुन्नतिश्च नियतं योग्यतमस्योपकुलपतेर्नियुक्तिमपेक्षत इति दृष्ट्या, तस्याः सुप्रसिद्धसंस्थाया वास्तविकहितबुद्ध्यैव, तदुत्तरदायित्वपूर्णं पदं मया स्वीकृतमासीत्। मम निरीक्षकत्वे सा संस्था भारतवर्षीय संस्कृतसंस्थासु प्रमुखतमं पदमवाप्नुयादिति मदीयोऽभिलाष आसीत्।

---

१. तथा च २३।७।६५ दिनांके तत्रत्यनैकेन प्रमुखसज्जनेन मां प्रति लिखितमासीत्—
"अधिकारियों की हार्दिक इच्छा है कि यह पद आप स्वीकार करलें। गुरुकुल नया ही विश्वविद्यालय बना है। आप जैसे प्रतिष्ठित एवं अनुभवी व्यक्ति की छत्रछाया में उसका यथेष्ट विकास हो सकेगा। गुरुकुल का गौरव भी बढ़ेगा और आर्यसमाज तथा प्राचीन संस्कृति की परम्पराओं का भी पोषण रहेगा।"

परमद्यत्वेऽस्माकं भारतीयानां दौर्भाग्यं सर्वत्रोज्जृम्भते। तत्र विश्वविद्यालयेऽपि उपकुलपतेर्नियुक्तेः प्रश्नं **पुरस्कृत्य** महान् विवादः प्रादुरभवत्। अतएव **मदीयमुक्तं** पदं स्वकर्तव्यपालने नैकविधबाधाभिरापूर्णं सन्निरर्थकत्वेन केवलं नाममात्रेणैवातिष्ठत्। अतएवातीवसंतोषस्यायं विषयो यत् १।१।६८ दिनांके नियमानुसारं स्वतएव तत्पदं समाप्तिमगात्।

प्राच्यानुसंधानपरिषदः सभापतित्वम्, प्राच्यानुसंधानसंस्थानस्य च संचालकत्वम्

(१९५८)

राजकीयसंस्कृतमहाविद्यालयादवकाशग्रहणानन्तरं स्वकीयानुसंधानकार्यस्य, विशेषतो वैदिकविषयकस्य, निकेतनरूपेण **"वैदिक स्वाध्याय मंदिरम्"** इत्याख्यया संस्थानमेकं मया संस्थापितमासीद् वाराणस्यामेव।

नैकवर्षपर्यन्तं केवलं तन्नाम्नैव, अनुसंधानकार्ये संलग्ना मदीयाः शोधच्छात्रा आगरा-विश्वविद्यालयीय "पीएच.डी" (Ph. D.=डाक्टर आफ फिलासोफी) उपाधिकृते मन्निरीक्षणे तत्कार्यं कर्तुमनुमता आसन्। अद्यत्वेऽपि यदा कदाचित् ते तथैवानुमतिं लभन्ते।

परं १९५५ वर्षे **पेरिस विश्वविद्यालयात्** ससम्मानं "**डी. लिट्**" उपाधिं गृहीत्वा अस्मिन्मित्रे डाक्टर श्रीरामगोविन्दचन्द्रे भारतं प्रत्यागते नूतनाया अनुसंधानसंस्थायाः स्थापनस्य विचारः समुदपद्यत। अनेकमित्रैस्तस्य स्वागतं कृतम्। ततश्च विशेषतो रायमहोदयस्य प्रयत्नेन सोत्साहम् १९५८ वर्षे **प्राच्यानुसन्धानपरिषदः प्राच्यानुसंधानसंस्थानस्य** च स्थापना समजायत। यथा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कालं तस्मिन्नेव वर्षे तयोः पञ्जीबद्धतापि संजाता ।

संस्थापकानामाग्रहेण प्राच्यानुसंधानपरिषदः सभापतित्वं प्राच्यानुसन्धानसंस्थानस्य च संचालकत्वं मया स्वीकृतमासीत् ।

तयोः कार्यपद्धतिः

संक्षेपेण उक्तानुसंधानसंस्थयोः कार्यमधोनिर्दिष्टंप्रकारेण प्रचलति--

(१) Ph. D. तथा D. Litt. उपाध्योः कृते **आगरा-विश्वविद्यालयेना**नुमता योग्याश्छात्रास्तत्तदनुसंधानविषयेषु प्रायेण ममैव मार्गप्रदर्शने शोधकार्यं कुर्वन्ति । अद्य यावदनेकैः पीएच०डी० उपाधिः प्राप्तः ।१

(२) यथासंभवं प्रतिमासं कश्चिद्विशिष्टो विद्वान् परिषदो गोष्ठ्याः समक्षं स्वनिबन्धं पठितुं भाषणं वा कर्तुमामन्त्र्यते । अनन्तरं तत्तद्विषयमादाय गोष्ठ्यां विचारचर्चा प्रचलति ।

(३) तेषामन्येषां चानुसंधानात्मकनिबन्धानां यथासंभवं **प्रकाशनार्थमपि** अनुसन्धानपरिषदा प्रयत्नः क्रियते ।

१ क्रमशो द्वे अप्युक्तसंस्थे समुन्नते अत्युपयोगिकार्यकारिण्यौ भविष्यत इत्याशास्यते ।

वसंत-ऋतुः

कविः--काव्यतीर्थ ज. व्यं. पल्लेवारः, उपाख्यः, जयेशः

पुसद, जि० यवतमाल, महाराष्ट्र

अनङ्गमित्रः कुसुमाकरो यः
अनङ्गरंगे रसिको सदा यः
आनंदकारी ऋतुराज एषः
विभातु विश्वे सततं वसंतः ।।१।।

स्मरारिहन्ता विजयाभिमानी
सुस्वागतं यस्य सुभावपूर्णम्
कामातुराणां कमनीयहस्तैः
विभातु विश्वे सततं वसंतः ।।२।।

करोति कान्तामनुरागरक्ताम्
पलाश-पुष्पाय ददाति शान्तिम्
कंठीकरोति प्रियगुंजनं यः
विभातु विश्वे सततं वसंतः ।।३।।

विषादहारी विषयातुराणाम्
प्रमोदकारी प्रमदा जनानाम्
विनोदकारी प्रियसज्जनानाम्
विभातु विश्वे सततं वसंतः ।।४।।

पलाशपुष्पारुणरागरक्ता
रक्तांशुकालंकृतकामिनीव
यस्यागमाभूर्लसति प्रकामम्
विभातु विश्वे सततं वसंतः ।।५।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्निमन्त्रमाला

(श्री अरविन्दप्रणीत 'Hymns to the Mystic Fire' ग्रन्थस्य धारावाहिकोऽनुवादः, अनुवादकोपयज्ञेन भावार्थेन तदुपज्ञानानाविधटिप्पणीभिश्च संवलितः)

अनुवादकः श्री जगन्नाथो वेदालंकारः

अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः।
देवो देवेभिरागमत् ।।५।।

१ अग्निः । २ होता । ३ कवि-क्रतुः । ४ सत्यः । ५ चित्रश्रवः-तमः । ६ देवः । ७ देवेभिः । ८ आ । ९ गमत् ।।

1 The flame. 2 The summoner. 3 The seer-will. 4 True. and 5 most full of richly varied listenings. 8,9 may he come. 6 a God. 7 with the Gods.

२ आह्वाता, ३ द्रष्टृसंकल्पात्मकः । ४ सत्यमयः । ५ बहुविधान्तः-श्रवणैश्वर्यपरिपूर्णः । १, ६ अग्निदेवः । ७ अन्यैः देवैः सह । ८, ९ आगच्छतु ।

भावार्थः

सोऽग्निदेवो होता--आह्वानकर्ता हवनकर्ता च, आह्वानेनान्तर्यज्ञनिष्पादक इति भावः । स कविक्रतुः, अर्थात् सत्यदृष्टिसम्पन्ना सङ्कल्पशक्तिः, तस्य क्रतुः-संकल्पशक्तिः कर्मशक्तिश्च, सत्यदृष्टौ प्रतिष्ठिता । अपि च तस्य अन्तःश्रवणानि अन्तःप्रेरणा वा अद्भुताः वैचित्र्यवैविध्ययुक्ताश्च । एतादृशोऽसौ अन्तःश्रुतज्ञानैश्वर्यसुसमृद्धः सत्यस्वरूपोऽग्निदेवोऽन्यदेवैः सहागच्छतु नोऽन्तर्वेदौ ।

व्याकरणम्

३ कवि-क्रतुः । कविः क्रान्तदर्शी सत्यदर्शी वा क्रतुः ज्ञानमयसङ्कल्पः इति कविक्रतुः ।

५ चित्रश्रवः-तमः । चित्राणि श्रवांसि अन्तःश्रवणानि यस्य स चित्रश्रवाः । सर्वेषामतिशयेन चित्रश्रवा इति चित्रश्रवस्तमः ।

यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि ।
तवेत् तत् सत्यमङ्गिरः ।।६।।

१ यत् । २ अङ्ग । ३ दाशुषे । ४ त्वम् । ५ अग्ने । ६ भद्रम् । ७ करिष्यसि । ८ तव । ९ इत् । १० तत् । ११ सत्यम् । १२ अङ्गिरः ।

2,5 O Flame! 6 the happy good. 1 which. 4 thou. 7 shalt create. 3 for the giver. is 10 that. 11 Truth. and 9 verily. 8 thine. 12 O Angiras ?

२ हे । ५ अग्ने ! ४ त्वम् । ३ दत्तवते, आत्मदानकारिणे । १ यत् । ६ कल्याणम् । ७ करिष्यसि । तत्१,८ तव । ९ एव । १०प्रसिद्धम्। ११ सत्यम् । १२ हे दिव्यचिज्ज्वाल !

भावार्थः

हे अग्ने ! हे अङ्गिरः ! चैतन्यज्योतिषो जाज्वल्यमानशक्ते ! आत्मसमर्पणकारिणे अन्तर्यजमानाय त्वं यन्मङ्गलं करिष्यसि, तत् ननु तवैव, तव स्वीयं, स्वसम्पद्भूतं, प्रसिद्धं परमसत्यमेव । स्वकीयं सत्यम्, सत्यज्ञानैश्वर्यमेव त्वं तस्मै प्रदास्यसि, नान्यत् किमपि लघुतरं श्रेयस्तस्य विधास्यसि । सत्यः खल्वयं ते परम मङ्गलविधानस्वभावः सत्यस्वरूपत्वात् तव ।

टिप्पणी

१२ अङ्गिरः । प्रकृतमन्त्रेऽग्निः अङ्गिरोनाम्ना सम्बोधितः । 'अङ्गारेष्वङ्गिराः' (निरु० ३।१७) इति यास्ककृतनिर्वचनानुसारं चाङ्गिरसोऽङ्गाररूपत्वं, प्रज्ज्वलज्ज्योतिशिशखारूपत्वं बोध्यम् ।

---

१ यत्तदोर्नित्यसम्बन्धात् तत्पदमाक्षिप्यते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाम्नातं च तथा ऐतरेयब्राह्मणेऽपि='येऽङ्गारा आसँस्तेऽङ्गिरसोऽभवन्' (३।३४)।

आध्यात्मिकेऽर्थे दिव्यचेतनाया जाज्वल्यमानशक्तिः दिव्यज्योतिषो देदीप्यमानतेजो वाऽङ्गिरःपदेन द्योत्यते। तदेवं पदमिदमग्नेरेव गुणधर्मनिरूपकं नामान्तरम्। प्रज्वलंदङ्गारवदयमङ्गति, निजशक्तिज्वालात्मना ऊर्ध्वं प्रयाति, नयति च समिद्धाग्निं यजमानमप्यूर्ध्वमित्यतोऽयमङ्गिरा इति निगद्यते।

व्याकरणम्

२ अङ्ग। अङ्गेति सम्बोधनार्थको निपातः। लोकेऽङ्गतेर्गत्यर्थकादचि घञि वा व्युत्पादयितु शक्योऽप्ययं शब्दो वस्तुतो विभक्तिप्रतिरूपकमव्ययम्। यास्कस्त्वेनमञ्चतेरंकते र्वा निर्ब्रूते--'अङ्गेति क्षिप्रनामाञ्चितमेवांकितं भवति' इति (निरु० ५।३।१७) पठन्ति चैतं क्षिप्राद्यर्थेषु लौकिककोषकाराः--'क्षिप्रे च पुनरर्थे च सङ्गमासूययोस्तथा। हर्षे सम्बोधने चैव ह्यङ्गशब्दः प्रयुज्यते।'

३ दाशुषे। दाशृ दाने इत्यस्मात् क्वसौ चतुर्थ्येकवचने रूपम्। आत्मदानिनोऽर्थे 'दाश्वस्' पदप्रयोगः प्राचुर्येण लक्ष्यते वेदे पुराणे च।

१२ अङ्गिरः। अङ्गतीत्यङ्गिरास्तत्सम्बुद्धौ। अङ्गतेर्गतिकर्मणः 'अङ्गतेरसिरिरुडागमश्च' (उणा० ४।२३५) इति असिप्रत्ययः इरुडागमश्च।

उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम्। नमो भरन्त एमसि ॥७॥

१ उप। २ त्वा। ३ अग्ने। ४ दिवे-दिवे। ५ दोषा-वस्तः। ६ धिया। ७ वयम्। ८ नमः। ९ भरन्तः। १० आ। ११ इमसि॥

1 To. 2 thee. 3 O flame. 7 we 4 day by day. 5 in the night and in the light. 10,11 come. 9 carrying. 6 by our thought. 8 the obeisance.

३ हे अग्निदेव! ६ धारणावत्या बुद्ध्या, ८ प्रणतिं समर्पणं वा। ९ वहन्तः। ७ व... अन्तर्याजकाः। ४ अनुदिनम्। अहर्निशं, रात्रौ वहनि च। त्वाम्। १,१०,११ उपागच्छामः।

भावार्थः

हे अग्ने! निजधिया, धारणसमर्थया विचार... क्रिययाऽऽत्मसमर्पणोपहारं वहन्तो वयं साधक... दिनानुदिनम्, अन्धकारे प्रकाशे वा, सर्ववेला... चेतनायाः सर्वास्वप्यवस्थासु, प्रकाशितासु वा तमोवृत्तासु वा, त्वामुपगच्छामः शरणत्वेन।

व्याकरणम्

५ दोषा--वस्तः। दोषाशब्दो रात्रिवाचं वस्तर् इति दिनवाची। तयोर्द्वन्द्वः।

११ इमसि। इण् गतौ इत्यस्माल्लट उत्तम पुरुषबहुवचनम्। मसः इडागमः (पा०७।१।४६)

१,१०,११ उप, आ, इमसि। उपेत्युपसर्ग एमसीति पदेन सम्बध्यते। उपसर्गाणां व्यवहित प्रयोगश्छन्दसि प्रायिकः। तथा चाह पाणिनि 'व्यवहिताश्च' (१।४।८२) इति।

राजन्तमध्वराणां गोपामृतस्य दीदिविम्। वर्धमानं स्वे दमे ॥८॥

१ राजन्तम्। २ अध्वराणाम्। ३ गोपाम्। ४ ऋतस्य। ५ दीदिविम्। ६ वर्धमानम्। ७ स्वे। ८ दमे॥

To thee, 1 who reignest over. 1 our 2 pilgrim-sacrifices, 15 luminous 13 guardian 14 of the truth, 16 increasing, 17 in thy own 18 home.

२ देवपथगामियज्ञानां। १ शासकम् ४ सत्यस्य। ५ देदीप्यमानं। ३ संरक्षकम् ७,८ स्वगेहे। ६ वृद्धिमाप्नुवन्तम्। त्वा उ... एमसि इति पूर्वमन्त्रस्य पदैरन्वयो बोध्यः।

भावार्थः

हे अग्ने! त्वम् अस्माकमूर्ध्वलोकयात्रा...

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यज्ञानामीश:, देवोन्मुखप्रयासस्य नियामक:, सत्यस्य समुज्ज्वलसंरक्षक:, स्वकीये 'सत्यलोके, 'सत्यम् ऋतं बृहत्' इतिस्वरूपे स्वीये परे धाम्नि वर्धन-शीलश्च । ईदृशं त्वामग्निदेवं वयमुपयाम:, उपास्महे प्रपद्यामहे च ।

व्याकरणम्

५ दीदिविम् । दीप्त्यर्थकाद् 'दिव्' धातो: 'दिवो द्वे दीर्घश्चाभ्यासस्य' इत्युणादिसूत्रेण क्विन् । यद्वा 'किकिनावुत्सर्गश्छन्दसि...' (काशिका ३।२।१७१) इति वार्तिकेन कि: लिङ्वद्भावश्च ।

८ दमे । दम इति गृहनाम (निघ० ३।४)। दाम्यति दान्त उपशान्तो भवति अस्मिन् गृहस्थ: संयमाभ्यासेन इति दम: गृहम् । दमु उपशमे इत्यस्माद् आधारे घञ् । 'नोदात्तोपदेश०' इति वृद्धिनिषेध: ।

स न: पितेव सूनवेऽग्ने सूपायनो भव ।
सचस्वा न: स्वस्तये ॥९॥

१ स: । २ न: । ३ पिता-इव । ४ सूनवे ५ अग्ने । ६ सु-उपायन: । ७ भव । ८ सचस्व । ९ न: । १० स्वस्तये ।

1 Therefore. 7 be. 6 easy of access. 2 to us. 3 as a father. 4 unto his son. (5 O Flame) 8 cling. 9 to us. 10 for our happy state.

५ हे अग्निदेव ! १ तथाभूतस्त्वं । ४ पुत्राय । ३ पितेव । २ अस्माकं । ६ सुप्राप: । ७ भव । ९ अस्माकं । १० सुखमयस्थितये, मङ्गलमयास्तित्वाय । ९ अस्मान् । ८ स्थिरतया सेवस्व ।

भावार्थ:

ऋग्वेदस्यास्मिन् प्रथमसूक्ते अग्नेर्महान् महिमा वर्णितो मन्त्रवर्णै: । सूक्तस्यान्तिमेऽस्मिन् मन्त्रे स एव संप्रार्थ्यतेऽन्तर्याजकै:--'हे अग्ने ! यतस्त्वमस्माकं जीवनयज्ञस्य सत्यनेता, पितेव पाता । अत: पिता पुत्रायेव त्वमस्माकं सुखमुपगम्य: (सुलभ:) भव, अस्माकं श्रेयसे मङ्गलमयस्थितये चास्मान् सुदृढमालिङ्ग, स्थिरसङ्गीव नो दृढसक्तो भवास्मासु ।'

व्याकरणम्

६ सु-उपायन: । सु+उप+अयन:--सु सुखेन सुकरं वा उपायनं उपगमनं यस्य स: ।

८ सचस्व । 'षच' समवाये इत्यस्माल्लोण्मध्यमपुरुषैकवचनम् । तिङन्तस्यास्य 'सचस्व' इति पदस्य सांहितिको दीर्घश्छान्दस: ।

१० स्वस्तये । सु+अस्तये--सुभूतिरित्यर्थे 'स्वस्ति इति अनव्ययं विकारि नामपदं भूयसा प्रयुज्यते वेदे विविधविभक्त्यन्तम् ।

ऋ. १.१२

मेधातिथि: काण्व: । अग्नि: । गायत्री ।

अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् ।
अस्य यज्ञस्य सुक्रतुम् ॥१॥

१ अग्निम् । २ दूतम् । ३ वृणीमहे । ४ होतारम् । ५ विश्व-वेदसम् । ६ अस्य । ७ यज्ञस्य । ८ सु-क्रतुम् ॥

3 We choose. 1 Agni. 4 The summoner. 5 the all-knowing. 2 the messenger. 8 the will effective. 6 of this. 7 sacrifice.

४ आह्वातारम् । ५ सर्वज्ञम् । २ देवमानवयोर्मध्ये दूतकार्यनिर्वाहिकम् । ६ अस्य प्रवर्तमानस्य । ७ यज्ञस्य । ८ निष्पादकं संकल्पबलम् । १ अग्निदेवं । ३ वरयाम: । वयमन्तर्यजमाना इति शेष: ।

भावार्थ:

अग्निदेव: ऊर्ध्वलोकं प्रति आह्वयति मर्त्यस्यात्मानम् इति स होता (आह्वाता) उच्यते । सर्वज्ञानमयोऽसौ मर्त्यामर्त्ययोरन्तरा सम्पर्कसम्मिलनयोरादानप्रदानयोश्च माध्यमभूतो दूत:, अन्तर्यागस्य निष्पादने क्षमो दिव्यसंकल्प:, एकीभूतज्योतिश्शक्त्यो: पुञ्जितमन्तर्बलम् । एतादृशं -

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तमग्निं वयं वृणुमहे वरणीयत्वेन कार्यनिर्वाहक-दूतत्वेन वा इति भावः ।

व्याकरणम्

५ **विश्व-वेदसम्** । विद ज्ञाने इत्यस्मात् 'सर्वधातुभ्योऽसुन्' इत्यसुन्नौणादिकः । विश्वं सर्वं वेदो ज्ञानं यस्य तं सर्वज्ञानमयमित्यर्थः । यद्वा विश्वं वेत्तीति विश्ववेदास्तम् । कर्तरि असुन् छान्दसः ।

अग्निमग्निं हवीमभिः सदा हवन्त विश्पतिम्। हव्यवाहं पुरुप्रियम् ॥२॥

१ अग्निम्-अग्निम् । २ हवीम-भिः । ३ सदा । ४ हवन्त । ५ विश्पतिम् । ६ हव्य-वाहम् । ७ पुरु-प्रियम् ॥

5 To the lord of the creatures. 6 the bearer of our offerings. 7 the beloved of many. 1 to every flame. the sacrificers. 3 ever. 4 call. 2 with hymns that summon the Gods. 7 One in whom are many dear things.

अन्तर्याजिकाः ५ प्रजानां प्रभुम्, सर्वभूतेश्वरम् । देवान् प्रति ६ अस्मदाहुतिप्रापकम् । ७ बहूनां प्रीत्यास्पदम्, बहुतरप्रियपदार्थयुक्तम् वा । १ एकमपि देह-प्राण-मनोहृदयादिकेन्द्रगतत्वेन भिन्नमग्निम्, अग्नेः प्रत्येकं ज्वालाम् इति भावः । २ देवाह्वानकरैः सूक्तैः स्तोत्रैः वा । ३ नित्यम् । ४ आह्वयन्ति ।

भावार्थः

अग्निः प्रजानां पतिः पालकश्च, अस्मा माहुतीनां वाहकोऽर्थात् देवान् प्रति प्रापकः स बहूनां प्रियः, 'बहुत्वंप्रियो वा, 'एकः' सन्न 'बहु'--पदार्थपरिपूर्णः । तम् 'एकम्' अपि 'बहु प्रभूतप्रियपदार्थ-पूर्णम् अग्निम्, तस्य प्रत्ये ज्वालामन्तर्यज्ञस्य साधकाः देवाह्वायकैः स्तो राह्वयन्ति अहर्निशम् ।

आध्यात्मिकार्थे देह-प्राण-मनः-प्रभृतीनाम् समत्सत्ताया अङ्गानां सर्वा अवस्था वृत्तयश्चेष्टा श्चैवाहुतयः । एताः क्रमेण पूर्णतयाऽर्पणीय भवन्ति येनाऽस्मदीयसत्ता देवाधीना सती दिव्यत्व मापद्येत ।१

व्याकरणम्

१ अग्निम्-अग्निम् । वीप्सायां द्विर्भावः २ हवीम-भिः । 'ह्वेञ्' स्पर्द्धायां शब्दे च इत्य स्मात् करणे मनिन् छान्दसः । ईडागमादिकम छान्दसं बोध्यम् ।

४ हवन्त । 'ह्वेञो' लटि प्रथमपुरुषबहुवचने छान्दसं रूपम् ।

५ विश्पतिम् । विशां प्रजानां पतिः प्रभुस्तम्

६ हव्य-वाहम् । हव्यानि अस्मदाहुती र्वहति प्रापयति देवानिति तम् ।

७ पुरु-प्रियम् । 'पुरु' इति पदं बहुनामसु पठित निघण्टौ । पुरूणां बहूनां प्रियस्तम्, यद्वा पुरूणि बहूनि प्रियाणि प्रियवस्तूनि यस्मिन्स्त तथाभूतम् ।

---

१ विस्तरार्थमस्य ग्रन्थस्य मुखबन्धो द्रष्टव्यः ।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुदक्षिणा

श्री रत्नाकर जोशी,
वरिष्ठ हिन्दी-प्राध्यापक, पोस्टग्रेजुएट-कालेज, गुरुकुल महाविद्यालय, ज्वालापुर (हरिद्वार)

भारत-सचिव ! देहि गुरुमानम् ।
काशी-विद्यापीठ-निवासे, लब्धं यतो भवद्भिर्ज्ञानम् ।
भारत-सचिव ! देहि गुरु-दानम् ।।१।।

यमुनातीरे दिल्लीनगरे, महामात्य-रमणीवावासे ।
प्रभुजन-परिजन-पुरजन-पूरित, गायन-नृत्य-विलासे ।
जन्म-महोत्सवपावन-दिवसे, प्राप्तं बहु सम्मानम् ।
भारत-सचिव ! देहि गुरु-दानम् ।।२।।

राजर्षिः सम्पूर्णानन्दो, विविधराष्ट्रनेतारः ।
भारत-गौरव लोक-सभाया, राज्यनीतिवहु-वेत्तारः ।
संस्कृत-भाषा-परित्राणाय, याचितवन्तस्तदानुदानम् ।
भारत-सचिव ! देहि गुरु-मानम् ।।३।।

श्रुत्वा भक्त्या गुरुजन-वाचं, हर्षित हृदयोऽभूत्तैः साकम् ।
संस्कृतरक्षायै गुरु-भिक्षां, हर्षोल्लसितो जातो दातुम् ।
अंगीकृत्यानेकाः कोटी मुद्राणां कृतवान् गुरुदानम् ।
भारत-सचिव ! देहि गुरु-मानम् ।।४।।

हिन्दी में सारांश--

स्वर्गीय लालबहादुर शास्त्री जब भारत के प्रधानमन्त्री थे, तब दिल्ली में उनके निवास-स्थान में उनका जन्म-दिवस मनाया गया। राष्ट्र के अनेक विद्वान् तथा राजनीतिज्ञ एवं महात्मा पधारे थे। उनमें लालबहादुर शास्त्री के गुरुवर श्री सम्पूर्णानन्द जी भी पधारे थे, जिन्होंने काशी-विद्यापीठ में लालबहादुर शास्त्री को पढ़ाया था। अतः अपने शिष्य को प्रधानमन्त्री पद पर देखकर उन्होंने अपने कुर्ते का पल्ला फैलाकर कहा कि--हे शिष्य ! तुमने काशीविद्यापीठ में मुझसे विद्या प्राप्त की है, परन्तु तब तुम गुरुदक्षिणा देने योग्य न थे, अब तुम मेरी गुरुदक्षिणा चुकाओ। मैं गुरुदक्षिणा में यह चाहता हूं --"आज संस्कृत-भाषा राष्ट्र से शनैः-शनैः लुप्त हो रही है। इसी भाषा ने राष्ट्र को एकता के सूत्र में बांध रखा था। यदि राष्ट्र से इस भाषा का अस्तित्व मिट गया तो प्राचीन वैदिक संस्कृति तथा सभ्यता एवं नैतिकता लुप्त हो जायगी। अतः तुम इसे राज्याश्रित करो। कोषागार से धनराशि इसके प्रचार तथा प्रसारहेतु स्वीकृत करो। यही मेरी दक्षिणा है।" गुरुवर्य सम्पूर्णानन्द जी के आदेश को शिरोधार्य कर लालबहादुर शास्त्री ने राष्ट्रीय कोषागार से संस्कृत भाषा के उत्थान के लिए बहुत बड़ी राशि अनुदान के रूप में स्वीकार कराई। इसी गुरु-दक्षिणा का इस गीत में वर्णन है। --सम्पादक।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

क्रान्तदर्शी लाला हरदयालः

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रस्तोता--विद्याभूषणः श्री गणेशराम शर्मा, डूंगरपुरम्

लाला हरदयालोऽरविन्दघोषो बालगंगाधरस्तिलकस्तथा च लालालाजपतरायस्तेषु नेतृप्रवरेष्वासन् ये स्वात्मत्यागेन बलिदानैश्च देशस्य स्वाधीनतायुद्धं गतिशीलमकार्षुः । भारतरत्नेष्वेषु लालाहरदयालमहोदयस्य चरित्रे दिव्यैका दीप्तिप्रभासीत् । स खलु साधारणं जनं देशभक्तं, देशभक्तं च बलिदानायोद्यतं विधातुं सक्षमोऽभूत् । तस्य स्मृतिशक्तिः किलालोकचित्राणां चित्रसंग्रह इवासीत् । स खलु चतुर्दशसु भाषासु निष्णातोऽभूत् । तस्य तर्कशक्तिस्तावत्तीव्राभूद्यत् कोऽपि चैको जन स्तेन साकं बौद्धिकं सङ्घर्षं कर्तुं व्यथामनुभवति स्म । तेन सह विहितः स्वल्पोऽपि च वार्तालापो व्यक्तिविशेषाय ज्ञानं, देशभक्ति, बलिदानभावनां, कर्मयोगस्य नवनीतं च प्रदातुं समर्थो बभूव ।

स हि 'प्राड्विवाकानां षड्यन्त्रम्' इति शीर्षकामेकां रचनामलेखीद्यस्य।स्तद्धीनभावनानां स्रोतः सिद्धमकरोत् । तामिमां लेखरचनां प्रपठ्यांग्लभक्तः श्रीमनोहरलालो, यो हि केम्ब्रिजविश्वविद्यालयस्यार्थशास्त्रविषयस्य तेजस्वी छात्रोऽभूत्, तदुत्तरं प्रायच्छत् । तदानीं स 'महाराज कालेज, कपूरथला' इत्यस्य शिक्षासंस्थानस्य प्राचार्योऽभूत्तथा पश्चात् सङ्घसर्वकारस्य शिक्षाशास्त्री, वित्तमन्त्री च बभूव तथा च 'सर' इत्युपाधिना विभूषितश्चापि समभूत् । तस्योत्तरं लवपुरतः प्रकाशिते 'ट्रिब्यून' पत्रे मुद्रितं प्रचकाशे । लालाहरदयालमहोदयो मनोहरलालेन साकं शास्त्रार्थं कर्तुं तत्कालं कपूरथलानगरं प्राप, यत्र शास्त्रार्थविवादः केवलमर्धघण्टापर्यन्तमभूत् । श्रीमनोहरलालः स्वपराजयं स्वीचकार ।

संस्कृतस्य गुणगानम्

श्रीहरदयालो देशस्य शिक्षायामामूलचूलं परिवर्तनमियेष । ब्रिटिशशिक्षयाऽराष्ट्रियता तथा च हीनभावना वृद्धिं गच्छन्ती समभूत् । शिक्षितो जनो राष्ट्रियप्रगतावपबाधकः संसिद्ध्यमानोऽभूत् । विषयेऽस्मिन् स एकदा स्वलेखे प्रोक्तवानभूत् 'शिक्षा नाम प्रशिक्षणस्य, विकाशस्य च निधिरास्ते येन व्यक्तीनां, देशानां च सहनशक्तिर्बलं लभते । ते लोकाः स्वदेशस्य विगतैरनुभवैर्बुद्धिवैभवेन च लाभान्विता भूत्वा वर्तमानं समुपयोगितं विधातुं शक्नुवन्ति । संस्कृतं राष्ट्रभाषायाः पदमधिकर्तुं शक्नोति । आंग्लानामन्धानुकरणं बताहितकरं भवेन्नाम । कस्यापि देशस्येतिहासे दशकमेकं वर्षाणां दशकद्वयं वा क्षणतुल्यं भवति । अस्माकं राष्ट्रियात्मोपलब्धेर्मूल्यवत्ताब्रह्ममाययोरावरणान्तः प्रच्छन्नास्ते । संस्कृतभाषा राष्ट्रे नवीनां जाग्रतिमुद्भावयितुं समर्थास्ते सैषा भाषा विज्ञानस्य, वैदुष्यस्य च नीतिसरणिस्तस्थौ यद्धि संस्कृतज्ञानेन शून्यः कोऽपि च भारतीयः स्वात्मानं सभ्यं वक्तुं न पारयते । केषां चिल्लोकानामेतत्कथनमास्ते यत् संस्कृतं मृतभाषेति । नैतत्कथनं सत्यनिष्ठं वर्तते । भाषा मृता न भवन्ति । जातयो म्रियन्ते, जीवन्ति च । भाषा गतिशीलाः सन्तिष्ठन्ते । तदेतत् सत्यं भवितुमर्हति यदांग्लनौकरशासनेन साकमिदानीं पत्राचारः संस्कृतभाषाया माध्यमेन भवितुं नार्हतीति परन्तु ये जना राष्ट्रियां प्रगतिं वाञ्छन्ति तैर्भाषायाः अस्याः-संस्कृतस्य--विकाशाय निष्ठापूर्वकं प्रयासो विधेयः । तस्यासौ भविष्यवाणी किलाद्यत्वे सत्या समसिद्ध्यत् । भारतसर्वकारस्य शिक्षामन्त्रालयेन संचालितेन वैज्ञानिक्याः शिल्पगतायाः शब्दावल्या आयोगद्वारा यत्किमपि कार्यं प्रचलद्वर्तते, तस्याधारः संस्कृतभाषाया धातवस्तथा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतस्य सुविशालं तथागाधं वाङ्मयमेवास्ते ।

संस्कृतभाषाया एकस्मिन् सुभाषिते प्रोक्तमस्ति 'स्वदेशे पूज्यते राजा, विद्वान् सर्वत्र पूज्यते ।' इति । अस्य जीवज्जाग्रदुदाहरणं स्वयं लालाहरदयालोऽभूत् । अमरीकाया विद्वत्समाजस्तं साधुपुरुषं सम्बोध्य सम्मेने । तत्रामरीकायां भारतीयदर्शनशास्त्रविषये तस्य यानि व्याख्यानानि बभूवुस्तानि श्रावं श्रावं तत्रत्या जनता गद्गदभावं जग्मुः । तत्रैवैकदा कश्चन श्रोता भावमुग्धः संस्तमुवाच-'कियदिवशोभनमभविष्यद्यदि च भवान् 'टाई' ग्रन्थिं बध्वा 'कालर' गलवन्धनं चासज्य भाषणमकरिष्यत् ?' तत्कालमेव श्रीहरदयाल उदतरत्–'अपि नाम मम व्याख्यानमस्मादेव हेतोरप्रभावजुष्टमास्ते यदहं 'टाई'–बन्धनं नासज्जयम् ? तस्य तामिमां व्याख्यानमालां श्रोतुं जैकलंडननामोपन्यासकारोऽपि चागच्छति स्म । स हि स्वकीये खल्वेकस्मिन्नुपन्यासे श्री हरदयालमहोदयमेकमादर्शवादिनं दार्शनिकं क्रान्तदर्शिनं च नेतृरूपं चित्रितवान् । तद्गुणैराकृष्टः केलिफोर्नियादेशस्य राज्यपालस्तद्दर्शनार्थमागच्छति स्म तं च हिन्दुस्थानस्य फ्रांसिलसन्तमुक्त्वाद्रियते स्म । स खलु रात्रौ भूशय्यामधिशेते स्म । स केवलं दुग्धाहारेण डबलरोटिकया च जीवनयापनम् कुरुते स्म ।

शस्त्रं शास्त्रं च

तस्मिन् समये क्रान्तिदूतस्य श्री हरदयालमहोदयस्यानुयायी युवकवर्गस्तत्सङ्केतमात्रेण स्वात्मबलिदानमर्पयितुं सन्नद्धस्तस्थौ । प्रथमविश्वयुद्धस्य समये तस्य नेतृत्वे परस्सहस्त्रसंख्याका जनाः स्वबलिदानमर्पयामासुः । २३, दिसम्बर सन् १९१२ दिवसे देहल्यां 'चन्द्रिकाचत्वरे लार्डहार्डिङ्गगौराङ्गे बमास्त्रविस्फोटोऽक्रियत तदा श्रीदयालमहोदयो 'युगान्तर' इत्याख्ये पत्रे तं बमविस्फोटं चेतनायाः प्रतीकमुक्तवान् । तस्य शिष्याणां सविधे गीता च छुरिका चेति द्वयं शास्त्रशस्त्रस्वरूपमवधियते स्म ।

तस्य शिष्येष्वमृतसरसश्छात्र एको ढींगराख्यस्तत्समये लण्डननगरेऽधीयानोऽभूद्यो हि सरविलियमकर्जनइत्याख्यं गौराङ्गाधिकारिणं स्वनलिकास्त्रस्य गुटिकाया लक्ष्यं विधाय संजघान । तत्काण्डस्य कारणं सर विलियमकर्जनस्य तत्प्रतिवेदनमभूद्धि वीरात्मानं विनायकदामोदरसावरकरं महाक्रान्तिकारिणं जीवनपर्यन्तं स्वदेशतो निर्वासनदण्डेनादण्डयत्तथा चानेकान् देशभक्तान् शूलारोपणदण्डेनापजघान । ढींगरामहाशयः शूलारोहणात् पूर्वं न्यायालये यद्वक्तव्यं प्रादात्तन्महाभारतस्य पर्वापेक्षयाल्पमहत्तात्मकं नासीत् । तस्य वक्तव्यस्य तस्य कश्चनांशो नन्वित्थंविधोऽभूत्–'अहं स्वीकुर्वे यत् सरविलियमकर्जनमहं स्वास्त्रगुटिकाया लक्ष्यमकार्षम् यतस्तस्य प्रतिवेदनस्य सूचनाभिः स्वदेशस्य मे भारतस्य क्रान्तिवीराः शूलारोपणदण्डेन प्राणापहारमदण्ड्यन्त तथा स्वदेशान्निर्वासनेन चापदण्डिताः । अहं हि स्वस्य बलिदानेन प्रसन्नोऽस्मि । अहं परमेश्वरं प्रार्थये यदहं तस्या एव जनन्याः कुक्षौ पुनर्जन्म लभेयं, या मां पूर्वमसूत । अहं कामये, यदहं स्वात्मनः पवित्रादर्शार्थं पुनरपि प्राणोत्सर्गं कर्तुं प्रभवेयम् । मम शवसंस्कारो हिन्दुशास्त्रानुसारं भवेत् । गीताया स्तदिदं पद्यमवश्यमेव हि पापठ्येत––

"हतो वा प्राप्स्यसि स्वर्गं हत्वा वा भोक्ष्यसे महीम् ।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ।। "

यदा वक्तव्यमेतत् समाचारपत्रेषु मुद्रणमाप्य प्रससार तदा ढींगरामहाशयस्य प्रशंसकेषु लायडजार्जस्तथा च विंस्टनचर्चिलोऽभूत् । तौ च तदानीमकथयताम् यत्तानीमानि वाक्यानि प्यूटर्चस्यामरशब्दानामपेक्षया न्यूनमहत्त्वपूर्णानि न सन्तीति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्यधिकं मेधावित्वात् प्रतिभाशालित्वाच्च भारतसर्वकारो लालाहरदयालाय च्छात्रवृत्तिं प्रदायोच्चशिक्षार्थमिंगलैंडदेशं प्राहिणोद्यत्र सः संस्कृते, दर्शनशास्त्रे चान्ये द्वे वृत्ती चापि प्राप्तवान् ।

द्रोहाग्निः

लण्डननगरे तस्य समागमः श्यामजीकृष्णवर्मणा, वीरवरेण विनायक-दामोदरसावरकरेण तथा च भाई परमानन्देन च साकं बभूव । यदा लालालाजपतरायोऽजीतसिंहश्च ब्रह्मदेशस्य माण्डलेकारागारं प्राहीयेताम् तदा तस्य ब्रिटिशराज्ये श्रद्धाभावोऽत्रुट्यत । स हिच्छात्रवृत्तिं परित्यज्य भारतं प्रतिनिववृते । सहि पञ्चांबुभाषायाः पत्रस्य सम्पादको बभूव । तस्य तदिदं समाचारपत्रं द्रोहाग्निमुज्जगार । वायसराजस्य परिषदो भारतीयः सदस्य एको लालालाजपतरायमवादीद्यच्छ्रीहरदयालस्य माण्डले कारागारं प्रति प्रेषणस्य घनघ आकाशउड्डयितुमारभन्तेति । स हि विदे प्रेष्यताम् । लालालाजपतरायः कथमपि प्रबो तं पैरिसनगरं प्रेषयामास । स खलु विदे भ्रामं भ्रामं क्रान्तेः प्रचारं चक्रे । भगवतो बु देवस्य जीवनं तस्यादर्शोऽभूत् । बुद्धचरितं, भग द्गीता च तस्य कण्ठस्थेऽभूताम् ।

अथ च सेयमितिहासस्य विडम्बनास्ते य हल्याः परमसुपुत्रस्य, महाप्रतिभाशालिनः, क्रान्ति दूतस्यास्य लालाहरदयालस्य देहलीनगरे किम स्मारकं न विद्यते । कूचाविपणि-पाठशाला-विद्या लयैर्येन येन च तस्य मुक्तिदूतस्य सम्बन्धोऽभूत्त तत्स्मृतेः किमपि प्रतीकं न वर्तते । तस्य स्मारक विशेषस्यावश्यकतास्ते यस्मान्मातृभूमेः सेवा जनताः प्रेरणां गृहीतुं प्रभवेयुरिति ।

विनयः

(आचार्यो धर्मदेवो विद्यामार्तण्डः, आनन्दकुटीरम्, ज्वालापुरम्)

(१)

दयाया यः सिन्धुर्निखिलजगतो दिव्यजनको
महिम्नो यस्यान्तं विदुरपि न देवा धृतधियः ।
तमः कृत्स्नं हार्दं, हरति महसा यः प्रभुरजीः
जगन्नाथो देवो वसतु सततं मे हृदि विभुः ॥

(२)

अनाद्यन्तो धाता, सकलसुखदाता प्रशमनः
प्रदत्तो येनायं, परमकृपया ज्ञानजलधिः ।
पितामाताभ्राता, सुहृदपि वरेण्यः स विदुषां
जगन्नाथो देवो वसतु सततं में हृदि विभुः ॥

(३)

रविश्चन्द्रस्तारा:, पवनजलधी वन्हिसरितः
यदीयं माहात्म्यं, दिशि दिशि दिशन्तीह मुदिताः ।
न यत्तुल्यः कश्चिज्जगति खलु भूतो न भविता
जगन्नाथो देवो वसतु सततं मे हृदि विभुः ॥

(४)

यदीयं सद्ध्यानं, शमसुखमनन्तं वितनु
यदीयं सज्ज्ञानं, हरति विततं दुःखमखिलम्
वदन्त्येकं विप्रा यमिह बहुधा सद्गुणनि
जगन्नाथो देवो वसतु सततं मे हृदि विभुः

(५)

स मे श्रद्धां मेधां, वितरतु दयासिन्धुरनघो
बलं वीर्य्यं तेजो वितरतु स चानन्तमहिमा ।
समस्तान् मे दोषान्, निजकरुणया सावपहरत्
जगन्नाथो देवो वसतु सततं मे हृदि विभुः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(क्रमानुगतम्)

चारुचरितामृतबिन्दुः

(हुतात्मनां द्वादशार्यवीराणां संस्कृतपद्यनिबद्धं जीवनचरित्रम्)

निबद्धा—श्री हजारीलाल शर्मा (विद्यालंकारः)

दर्शनीयमूर्तिस्तर्कवाचस्पतिः श्री स्वामी दर्शनानन्दः (५)

परमगुणविभूतिस्तर्कमूर्तिर्यतीन्द्रः
प्रचुरगुणनिधानो दर्शनानन्दआर्यः ।
विबुधजनप्रशस्ते श्रीप्रतापार्यगेहे
ह्यजनि "जगरावां" ग्राममध्ये सुधीन्द्रः ॥१॥

एकोनविंशे शतके तु चाष्टा-
धिके महापञ्चनदप्रदेशम् ।
स्वजन्मनालङ्कुरुते स्म विद्वान्
श्रीदर्शनानन्दमहाविभूतिः ॥२॥

बाल्ये त्वसौ पारसदेशभाषा-
मुर्दूं सुभाषां पठति स्म धीरः ।
सानन्दमानन्दमये स्वगेहे
बाल्यं स्वकालं व्यनयद् विनीतः ॥३॥

श्रीरामनास्य पिता प्रतापी
ह्यकिञ्चनेभ्योऽति बुभुक्षितेभ्यः ।
धनं च धान्यं च सुवस्त्रजातं
ददौ मुदा दीनदयार्द्रदृष्टिः ॥४॥

धनी पितामुष्य च वाराणस्यां
समागतायार्थिजनाय नित्यं ।
अन्नप्रबन्धं त्वकरोत् सुचारु
तुष्यन्ति येनातिथयोऽन्नपानैः ॥५॥

क्षेत्रस्य चान्नस्य निरीक्षणार्थं
काशीसुपुर्यां गतवान् सुधीन्द्रः ।
बहुत्वकृत्वो मनसीति जाता
गीर्वाणवाणीं पठितुं शुभेच्छा ॥६॥

तत्रत्य विद्वत् परमेश्वरीत
आचार्यवर्याद् हरिदत्ततश्च ।
शब्दादिशास्त्राणि पठन् द्विजेन्द्रः
स्वल्पैरहोभिर्बहुविश्रुतोऽभूत् ॥७॥

सकलगुणनिधानो दुर्जयो दुर्जनैश्च
कृतविविधविवादोऽनार्षशास्त्रेष्वनार्यैः ।
ऋषिरचितसुशास्त्रं श्रद्धया मन्यमानः
स जयति गुणिगण्यो दर्शनानन्द आर्यः ॥८॥

शास्त्रार्थवादरसिकः सुमनो मृगेन्द्रो
न्याये रतो गुणनिधिः सदसद्विवेकी ।
पाखण्डखण्डनरतो यवनैरनेकैः
सार्धं सदा विवदते स्म मुदा मुनीन्द्रः ॥०

विद्यालया बहुविधाः सुविशालरूपाः
संस्थापिता गुणिवरेण विशालरूपाः ।
निःशुल्कशिक्षणविधेः सुविधिश्च यत्र
सर्वत्र तत्र खलु मुद्रणयन्त्रमास्ते ॥१०॥

ग्रन्था मुनित्रयकृता विदुषा समस्ता
आर्षा सुभाष्यसहिताः श्रुतिशास्त्ररूपाः ।
वाराणसेयनिजमुद्रणयन्त्रमध्ये
प्राकाशिता जनहिताय सुखाय लोके ॥११

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मत्वा गृहं तृणसमं धनधान्यपूर्णं
त्यक्त्वा च सर्वनिजसंपद आर्यवीरः ।
सन्यासमाप्य स मुदो हि चुकूर्द सद्यः
क्षेत्रे समाजविहिते मतिमान् वरेण्यः ।।१२

भ्रमन्नार्यवीरो मुदा भारतेऽसौ
विहारेऽथ पंचापसंयुक्तमध्य-
प्रदेशेषु नैजं स्वकार्यस्य केन्द्रं
चकारार्यवर्यः सदा दर्शनीयम् ।।१३।।

समागत्य चेशामशीयस्य भक्तः
पदारीति नामा विधर्मी कुतश्चित् ।
जनान् वेदविद्याविरुद्धान् प्रकुर्वन्
सभायां प्रचारैः कुचेष्टां प्रचक्रे ।।१४।।

समाकर्ण्य विद्वान् तदीयां कुचेष्टां
सभामध्यमायो जगर्जार्यनादैः ।
सुतर्कैरनेकैस्तदीयान् कुतर्कान्
चखण्डे जनान् हर्षवन्तश्च चक्रे ।।१४।।

शास्त्रार्थवादे भयशोकभीतान्
कृताभियोगान् कुजनान् विजित्य ।
न्यायालयेषु परमां प्रसिद्धि
चाणक्यनीत्याप जयं सुधीन्द्रः ।।१६।।

शास्त्रार्थवादे न कदापि भीतो
यो वामनैर्धूर्तजनैः सचेष्टः ।
कुचेष्टमानैरनिशं न यातो
वशे मुनीन्द्रो जयतात् स वीरः ।।१७।।

एकोन विंशे शतके सुधीन्द्र-
श्चेशामशीये त्रिदशाधिकेऽसौ ।
मई सुमासैकदशे दिने हा !
विहाय हा ! हन्त ! ! गतो दिवं नः ।।१८

सकललोकहिते निरतः सुधी-
र्जनहिताय समर्प्य सुजीवनम् ।
यतिवरोऽद्य गतः सुरधाम हा !
अहह ! ! ! कष्टमपारमहो ! विधे ! ।।१९

हिमाचलप्रदेशस्य साहित्यिकसांस्कृतिकक्षेत्रेषु संस्कृतजीविनां मतैक्यं प्रतिनिधित्वं तथा तेषां समयानुसारी एकता मञ्चीकरणाय प्रकाशनाय च हिमालयसंस्कृति-संस्थानस्य आगामी कार्यक्रमस्य रूपरेखानिर्धारणम्

मान्यवर ! हिमालयप्रदेशे तथाकथितसंगठानां निरन्तरावर्धमाना संख्या दरीदृश्यते । भौगोलिकविवशतान्तर्मुखतोपयुक्तवातावरणस्याभावेन चास्माकं बुद्धिजीविनामधिका संख्याऽपरिचिता एव सञ्जाता । हिमाचले रचनात्मककार्यैः एकस्थाने मञ्चीकरणव्यग्रता मित्रैः बन्धुभिश्च प्रकटीकृता परमद्यावधिपर्यन्तं कारणविशेषैः भावनेयं क्रियान्विता न सञ्जाता शून्या एव चाऽस्ति ।

श्रीमन् ! प्रसन्नतायाः विषयोऽस्ति यत् वयमद्य एतादृशं दायित्वं वोढुं समर्थाः स्मः यस्य समुचितं निर्वाहं यथाशक्ति करिष्यामः । संस्कृतजीविनां शिष्टविधिना स्पष्टमेव हि. सं. संस्थानस्यागामि कार्यक्रमस्य मूलभूतमुद्देश्यं विद्यते ।

आशां कुर्मः यत् भवानस्माकमनुरोधस्य संगतिं विलोक्य स्वविचारं सहयोगञ्च विज्ञापयिष्यति । हि. सं. संस्थानम् संस्कृते प्राणभूतानां विचाराणामादानप्रदानं स्वीकरोति, संवर्धयति ।

उत्तरापेक्षी
विद्याधर शर्मा गुलेरी
कृते आदरीसंचालकः हिमालय संस्कृत संस्थानम्

राजकीय उच्चतरमाध्यमिक विद्यालय, सुन्ही
(कन्डीपथम्) कांगडाप्रान्तम् (हि. प्र.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

प्र त आश्विनीः पवमान धेनवो दिव्या असृग्रन् पयसा धरीमणि । प्रान्तरिक्षात् स्थाविरीस्ते असृक्षत ये त्वा मृजन्त्यृषिषाण वेधसः ॥

पवमान ! धेनु तेरी ये आशुगामिनी हैं ।
धरती पवित्र करती पय से भरी घनी हैं ॥
जो अन्तरिक्ष से भी स्थिर दिव्य सृष्ट होतीं ।
ब्रह्मादि देवगण से ऋषिसेव्य ! मृष्ट होतीं ॥

(८८७)

उभयतः पवमानस्य रश्मयो ध्रुवस्य सतः परियन्ति केतवः । यदी पवित्रे अधिमृज्यते हरिः सत्ता नि योनौ फलशेषु सीदति ॥

द्यौ भूमि में उभयतः कर नष्ट दृष्टि मैली ।
ध्रुव शुद्ध देव की ये किरणें पवित्र फैलीं ॥
मार्जित हरा भरा जो जग को करे स्ववश में ।
सत्ता स्वतन्त्र उसकी चमके हृदय-कलश में ॥

(८८८)

विश्वा धामानि विश्वचक्ष ऋभ्वसः प्रभोष्टे सतः परियन्ति केतवः । व्यानशी पवसे सोम धर्मणा पति विश्वस्य भुवनस्य राजसि ॥

हे विश्वचक्षु भगवन् ! प्रभु आपकी प्रभायें ।
परिपूर्ण सब जगह हैं सबको सदा सुहायें ॥
प्रिय सोम ! धर्म से तुम पति विश्व के बने हो ।
व्यापक पवित्र राजा सुन्दर बड़े सुने हो ॥

(८८९)

पवमानो अजीजनद् दिवश्चित्रं न तन्यतुम् । ज्योतिर्वैश्वानरं बृहत् ॥

पवमान देव ने ही यह सब जगत् बनाया ।
द्यौ में विचित्र विद्युत्-सम है वही समाया ॥
भारी प्रकाश ऊंचा सुखहेतु विश्व नर के ।
सब में भरा उसी ने निज भव्य सृष्टि करके ॥

(८९०)

पवमान रसस्तव यदो राजन्नदुच्छुनः । विबारमव्यमर्षति ॥

पवमान ! रस तुम्हारा राजन् ! बड़ा मधुर है ।
मादक विशुद्ध उत्तम देता नशा प्रचुर है ॥
दुःस्वप्न दुःख चिन्ता तुम देव ! दूर करते ।
अव्यय विमुक्ति सुख भी तुम हो सदैव झरते ॥

(८९१)

पवमानस्य ते रसो दक्षो विराजति द्युमान् । ज्योतिर्विश्वं स्वर्दृशे ॥

बलयुक्त शुद्ध रस है पवमान ! देव ! तेरा ।
द्युतिमान् बड़ा सुशोभित जग का हरे अंधेरा ॥
ज्योतिःस्वरूप अपना स्वधाम तुम दिखाओ ।
राजा बने विराजो क्रतुदक्षता सिखाओ ॥

(८९२)

प्र यद् गावो न भूर्णयस्त्वेषा अयासो अक्रमुः । घ्नन्तः कृष्णामप त्वचम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पवमान ! रस तुम्हारे विक्रम दिखा रहे हैं ।
वृषसम बलिष्ट उज्ज्वल गतियां सिखा रहे हैं ।।
देहादि आवरण की काली त्वचा मिटाते ।
चिति शक्ति को प्रकाशित कर दोष हैं हटाते ।।

(८९३)

सुवितस्य वनामहेऽति सेतुं दुराय्यम् ।
साह्याम दस्युमव्रतम् ।।

सौभाग्य हम मनावें, दुरदृष्ट सेतु लांघें ।
शुभ धर्म कर्म का ही वरदान पुण्य मांगें ।।
निज शक्ति से दबा दें व्रतहीन दस्युजन को ।
प्रभुभक्ति में लगादें निर्मल पवित्र मन को ।।

(८९४)

शृण्वे वृष्टेरिव स्वनः पवमानस्य शुष्मिणः ।
चरन्ति विद्युतो दिवि ।।

पवमान जिस बली ने यह सृष्टि है बनाई ।
स्थिर वृष्टितुल्य उसकी ध्वनि दे रही सुनाई ।।
द्यौ में प्रकाश करती विद्युत् विचर रही है ।
सर्वत्र दीप्त रस का संचार कर रही हैं ।।

(८९५)

आ पवस्व महीमिषं गोमदिन्दो हिरण्यवत् ।
अश्ववत् सोम वीरवत् ।।

हे इन्दु सोम ! सुन्दर रसनिर्झरी बहा दो ।
भरपूर अन्न धन यश सुख में हमें न्हला दो ।।
गौ अश्व धान्य सोना चांदी सभी विपुल दो ।
सन्तान वीर होवे ऐसा विशिष्ट बल दो ।।

(८९६)

पवस्व विश्वचर्षण आ मही रोदसी पृण ।
उषाः सूर्यो न रश्मिभिः ।।

हे विश्व के नियन्ता ! जीवन पवित्र कर दो ।
अपने प्रदीप्त रस से द्यौ भूमि लोक भर दो ।।
जैसे सुबह उषा में रवि है स्वरश्मि देता ।
वैसे प्रभो ! तुम्हारा रस है प्रकाश देता ।।

(८९७)

परिणः शर्मयन्त्या धारया सोम विश्वतः ।
सरा रसेव विष्टपम् ।।

सुख शान्तिधाम रस की धारा प्रभो ! तुम्हारी ।
जो दिव्य है उसी से विपदा हरो हमारी ।।
ज्यों भूमि सब तरफ से संसार को बसाती ।
त्यों आपकी दया भी सब पाप है नसाती ।।

(८९८)

आशुरर्ष बृहन्मते परि प्रियेण धाम्ना ।
यत्रा देवा इति ब्रुवन् ।।

भगवन् ! विशालबुद्धे ! जल्दी स्वरस बहाओ ।
प्रिय धाम काम से तुम शुभ सोम नाम पाओ ।।
तुम को जहां जहां भी सब देवता पुकारें ।
वे सब वहां वहां ही तुम को सदा निहारें ।।

(८९९)

परिष्कृण्वन्ननिष्कृतं जनाय यातयन्निषः ।
वृष्टिं दिवः परिस्रव ।।

करते तुम्हीं परिष्कृत जग में बहिष्कृतों को ।
धरते सरल जनों के हित अन्न सद्व्रतों को ।
झरते द्युलोक से हो अतिमिष्ट वृष्टि जल को ।।
हरते प्रभो ! सदा हो सब कष्ट पाप मल को ।।

(९००)

अयं स यो दिवस्परि रघुयामा पवित्र आ ।
सिन्धोरूर्मा व्यक्षरत् ।।

जो देव दिव्य गुण से संयुक्त शुद्ध दिल में ।
बैठा क्षरित करे रस भवसिन्धु के सलिल में ।।
उठती तरङ्ग में भी वह ही सदा विराजे ।
अति शीघ्र यानकारी सब भव्य साज साजे ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(९०१)

सुत एति पवित्र आ त्विषिं दधान ओजसा ।
विचक्षाणो विरोचयत् ॥

अभिषुत हुआ भुवन को वह देव ही सुधारे ।
आता पवित्र दिल में शुचि तेज दीप्ति धारे ॥
द्रष्टा बना विचक्षण सब में विराजता है ।
अपनी चमक दिखाता प्रिय साज साजता है ॥

(९०२)

आ विवासन् परावतो अथो अर्वावतः सुतः ।
इन्द्राय सिच्यते मधु ॥

प्रिय सेवनीय मधु यह तैयार सोमरस है ।
अति दूर या निकट से अभिषुत हुआ सरस है ॥
ऐश्वर्य हेतु इसका सेचन करें हृदय में ।
जो भव्य दिव्यगुण है देता सभी समय में ॥

(९०३)

समीचीना अनूषत हरिं हिन्वन्त्यद्रिभिः ।
इन्दुमिन्द्राय पीतये ॥

पावे मजा अनूठा सम्यक् समाधि वाले ।
आदरसहित गुणों से हरि को भजें निराले ॥
जो इन्दु इन्द्र के हित पानार्थ ही बना है ।
उसका मिठास अनुपम सब से घना सुना है ॥

(९०४)

हिन्वन्ति सूरमुस्रयः स्वसारो जामयस्पतिम् ।
महामिन्दुं महीयुवः ॥

पति को सपत्नियां ज्यों बन कर बहिन परस्पर ।
वशवर्तिनी रिझावें, पावें महत्त्व घर पर ॥
अन्तःप्रवृत्तियां त्यों चाञ्चल्ययुक्त मन की ।
स्थिर शान्ति सौख्य पावें मिल इन्दु से सुजन की ॥

अथवा

आह्लाद शौर्यवाला प्रेरक महान् निराला ।
जो दीप्त सोमरस है दिल में करे उजाला ॥
उसको बहिन बनी ये दश इन्द्रियां मिलावें ।
होकर सरस सुगन्धित ईप्सित महत्त्व पावें ॥

(९०५)

पवमान रुचारुचा देव देवेभ्यः सुतः ।
विश्वा वसून्याविश ॥

पवमान देव ! सुत हो तुम भव्य दिव्यताहित ।
निजदीप्त दीप्तियों से संसार का करो हित ॥
सम्पूर्ण विश्व का धन हम में निविष्ट कर दो ।
अपना प्रकाश निर्मल दिल में अभीष्ट भर दो ॥

(९०६)

आ पवमान सुष्टुतिं वृष्टिं देवेभ्यो दुवः ।
इषे पवस्व संयतम् ॥

भगवन् ! झरो नियम से स्तुतियोग्य वृष्टिजल को ।
अन्नार्थ देवजनहित कर आई भूमितल को ॥
संतत विशुद्ध मन से मांगें दुवा तुम्हारी ।
पवमान देव ! तुम ही मेटो व्यथा हमारी ॥

(९०७)

जनस्य गोपा अजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे । घृतप्रतीको बृहता दिविस्पृशा द्युमद्विभाति भरतेभ्यः शुचिः ॥

जन का सुदक्ष रक्षक यह अग्नि जागरित है ।
स्तोतव्य सत्क्रियाहित शुभ जन्म ले प्रथित है ॥
द्यौस्पर्शिनी किरण से भारी करे उजाला ।
शुचि मर्त्यहेतु चमके घृत के प्रतीक वाला ॥

(९०८)

त्वामग्ने अङ्गिरसो गुहा हितमन्वविन्दञ्छिश्रियाणं वने वने । स जायसे मथ्यमानः सहो महत् त्वामाहुः सहसस्पुत्रमङ्गिरः ॥

तुम हो हृदयगुहा में प्रभु ! आपको विमल मन ।
ढूंढें वनों वनों में स्थित भक्त अङ्गिरा जन ॥
भारी विचार मन्थन करके प्रकाश पाते ।
हे अग्नि अङ्गिरः! तुम बलपुत्र हो कहाते ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(९०९)

यज्ञस्य केतुं प्रथमं पुरोहितमग्निं नरस्त्रिषधस्थे समिन्धते । इन्द्रेण देवैः सरथं स बर्हिषि सीदन् नि होता यज्ञथाय सुक्रतुः ।।

तुम केतु यज्ञ के हो प्रभु जी ! प्रथम पुरोहित ।
पूजें त्रिकाल तुम को नर,आप भी करो हित ।।
इस बर्हि पर विराजो बन यज्ञहेतु होता ।
देवों सहित यहां पर है इन्द्र साथ होता ।।

(९१०)

अयं वां मित्रावरुणा सुतः सोम ऋतावृधा । ममेदिह श्रुतं हवम् ।।

ऋत सत्य के प्रवर्धक ! हे मित्र ! या वरुण हे ।
मेरे वचन सुनो तुम सन्देहलेश न रहे ।।
तैयार यह तुम्हारे हित सोमरस बना है ।
पीओ इसे मुदित हो सुन्दर मधुर घना है ।।

(९११)

राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे । सहस्रस्थूण आशाते ।।

हो द्रोहहीन तुम तो निर्वैर मन वचन में ।
राजा बने विराजो ध्रुव उच्चतम सदन में ।।
स्थूणा जहां हजारों शोभित रहें भवन में ।
आनन्दहेतु दीखे कोई कमी न धन में ।।

(९१२)

ता सम्राजा घृतासुती आदित्या दानुनस्पती । सचेते अनवह्वरम् ।।

घृत से निषिक्त वे दो आदित्यपुत्र साथी ।
सम्राट् बने विराजें दुर्भाव के प्रमाथी ।।
अकुटिल सरल सुपथ में संलग्न हो रहे है ।
पति दानशील जन के सुखबीज बो रहे है ।।

(९१३)

इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः । जघान नवतीर्नव ।।

अत्युग्र वीर अकुतोभय इन्द्र ने पछाड़े ।
दुर्वृत्त वृत्ररूपी सब दैत्य चीर फाड़े ।।
ध्यानी महर्षियों की ले शक्तियां उखाड़े ।
दुर्दान्त आठ सौ दस आवरण के अखाड़े ।।

(९१४)

इच्छन्नश्वस्य यच्छिरः पर्वतेष्वपश्रितम् । तद्विदच्छर्यणावति ।।

तनरूप पर्वतों में चिति रूप अश्व का सिर ।
जो था छिपा, किया वह उपलब्ध इन्द्र ने फिर ।।
अति शुद्ध सोमरस के उन्मुक्त मुक्तिसर में ।
इच्छुक हुआ गया वह अटका न खण्डहर में ।।

(९१५)

अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम् । इत्था चन्द्रमसो गृहे ।।

रवि की किरण सुषुम्णा घुसती हिमांशु घर में
अन्तर्निहित पड़ी वह आती नहीं नजर में ।।
ज्योतिष विचार वाले यह सत्य तत्त्व मानें ।
प्रभुदेव की विलक्षण महिमा सभी न जानें ।।

(९१६)

इयं वामस्य मन्मन इन्द्राग्नी पूर्व्यस्तुतिः । अभ्राद् वृष्टिरिवाजनि ।।

हे इन्द्र अग्नि देवो ? स्तुति आपकी पुरानी ।
मैंने मनन सहित यह अनुभूत है बखानी ।।
हो वृष्टि मेघ से ज्यों धाराप्रवाह भारी ।
त्यों यह हुई प्रवाहित विपदा हरे हमारी ।।

(९१७)

शृणुतं जरितुर्हवमिन्द्राग्नी वनतं गिरः । ईशाना पिप्यतं धियः ।।

निज भक्त की पुकारें हे इन्द्र अग्नि ! सुनलो ।
सेवन करो गिरायें मुझको स्वभक्त चुन लो ।।
तुम हो समर्थ ईश्वर शुचि पुष्ट बुद्धि कर दो ।
कर्तव्य कर्म में स्थिर सदसद्विवेक भर दो ।।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल-समाचार

महावीर 'नीर' विद्यालंकार

ऋतु-रङ्ग

ग्रीष्मसमयमधिकृत्य गीयताम् सम्प्रति हि--
सुभगसलिलवगाहाः पाटलसंसर्गिसुरभिवनवाताः।
प्रच्छायसुलभनिद्रा दिवसाः परिणामरमणीयाः॥
अभि० शाकु० १।३॥

आजकल सभी शैक्षणिक विभागों में अवकाश होने के कारण गुरुकुलीय वातावरण कुछ निस्तब्ध सा लग रहा है। ज्येष्ठ अब अपने पूरे यौवन पर है। ग्रीष्मकालीन सूर्य की प्रखर किरणों से हरितिमा से युक्त गुरुकुलीय मैदान झुलस से गये हैं। पश्चिमीय वायु के गरम-गरम झोंके रेत और धूल का गुब्बार उड़ाते ही रहते हैं। कभी २ धूलभरी आंधियों के साथ गुरुकुलीय आकाश पर मेघों की गड़-गड़ाहट सुनकर मन-मयूर नाच उठता है किन्तु वर्षा के अभाव में तपन बहुत है। वातावरण क्षुब्ध सा है। जामुनों की टहनियां मोर से लद गई हैं। कुल में अमलतास की डालियों पर अंगूरों के गुच्छों के समान लगे पीले-पीले पुष्प-गुच्छ अपनी छटा तथा सुगंध से वातावरण को रमणीय और सुगन्धमय कर रहे हैं, उधर आम्र-शाखाओं पर झूलते हुए आम्र-फल अपनी ओर प्रत्येक आगन्तुक की दृष्टि को आकृष्ट कर अपना रसाल नाम सार्थक कर रहे हैं। कुलवासी ग्रीष्म के कठोर प्रभाव को प्रातः सायं गंगनहर में स्नान करके दूर कर सुख का अनुभव करते हैं। संध्या और रजनी अब दोनों ही सुख कर लगने लगी है। भ्रमणेच्छु प्रातः ५ बजे ही नहर के किनारे-किनारे घूम कर स्वास्थ्य लाभ करते हैं। कुल में मच्छर-मक्खी तथा चोरों का भय व्याप्त है। स्वास्थ्य सबका उत्तम है। इस माह रेलवे हड़ताल के कारण कुल-भूमि में यात्रियों का आना-जाना बहुत कम रहा।

विद्यालय-विभाग

गुरुकुल विद्यालय-विभाग में परीक्षाएं समाप्त होकर १५ मई से ग्रीष्मावकाश प्रारम्भ हो गया है। विद्यालय-अध्यापकों के परिश्रम से इस बार परीक्षा-परिणाम उत्तम रहा। १ जुलाई से विद्यालय का नया सत्र प्रारम्भ हो जाएगा। जो महानुभाव अपने बालकों को धार्मिक एवं अनुशासनबद्ध शिक्षा दिलाना चाहते हों वे नियमावली, आचार्य–गुरुकुल कांगड़ी के पते से प्राप्त कर सकते हैं। अब लगभग सभी ब्रह्मचारी ग्रीष्मावकाश में अपने घरों को चले गए हैं। शेष ब्रह्मचारी श्री पं. चन्द्रकेतु जी के अधिष्ठातृत्व में तैराकी आदि सीख रहे हैं। आचार्य श्री रामनाथ जी वेदालंकार अवकाश के इन दिनों में भी आश्रम और भण्डार आदि का निरीक्षण कर विद्यालय की उन्नति की दिशा में प्रगतिशील हैं। आशा है पूज्य पण्डित जी के धीर-गम्भीर एवं कुशल संरक्षकत्व में विद्यालय दिनोदिन बहुमुखी उन्नति करता जाएगा।

नव निर्वाचन

आर्य-समाज गुरुकुल कांगड़ी का वार्षिक निर्वाचन २७ अप्रैल १९७४ को श्री सुरेशचन्द्र जी त्यागी की अध्यक्षता में सर्वसम्मति से इस प्रकार सम्पन्न हुआ--

१ प्रधान--श्री भगवद्दत्त जी वेदालंकार।
२ उपप्रधान--श्री डा० हरगोपालसिंह जी व श्री श्रीचन्द जी।
३ मन्त्री--श्री महावीर 'नीर' विद्यालंकार।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४ उपमन्त्री--श्री डा० ताराचन्द्र जी व श्री आनन्द जी भारद्वाज ।
५ कोषाध्यक्ष--श्री जयसिंह जी ।
६ कार्यालयाध्यक्ष--श्री भैरवदत्त जी शास्त्री ।
७ पुस्तकालयाध्यक्ष--श्री सूरतसिंह जी ।
८ आय-व्यय-निरीक्षक--श्री शेखरानन्द जी ।

अन्तरंग-सभा के सदस्य निम्न मनोनीत हुए--

१ श्री डा० रामनाथ जी वेदालंकार ।
२ श्री डा० गंगाराम जी ।
३ श्री डा० निगम जी ।
४ श्री सुरेशचन्द्र जी त्यागी ।
५ श्री डा० राजेन्द्रकुमार जी ।
६ श्री ठाकुरसिंह जी भण्डारी ।
७ श्री प्रो० श्यामनारायणसिंह जी ।
८ श्री गुप्तेश्वर जी ।
९ श्री प्रतापसिंह जी ।
१० श्री सुदर्शन कुमार जी मल्होत्रा ।
११ श्री शिवचरण जी विद्यालंकार ।
१२ श्री सूर्यप्रकाश जी ।
१३ श्री वाचस्पति जी ।
१४ श्री सोमदत्त जी (बिजली विभाग) ।
१५ श्री प्रमोदकुमार जी ।
१६ श्री ताजवर सिंह जी ।
१७ श्री केवलराम जी ।
१८ श्री हरिभजन जी ।
१९ श्री जगमोहन जी ।
२० श्री रामचन्द्र जी ।

प्रेरणादायी प्रवचन

आर्यसमाज गुरुकुल कांगड़ी के साप्ताहिक अधिवेशन के शुभावसर पर २५-५-७४ को आर्य-प्रतिनिधि सभा, पंजाब के वरिष्ठ उपप्रधान तथा तपे हुए आर्यनेता श्री लाला रामगोपाल जी शाल वाले का 'आर्यसमाज और गुरुकुल' विषय पर अत्यन्त सारगभित तथा प्रेरणादायी भाषण हुआ । श्री लाला जी ने अपने व्याख्यान में अनेक रहस्यमय बातों का उद्घाटन कर समस्त श्रोताओं को चकित कर दिया । उन्होंने बताया कि सुप्रसिद्ध क्रान्तिकारी सरदार भगतसिंह आर्य-समाजी थे । उन्होंने अपना यज्ञोपवीत-संस्कार भी आर्यसमाज में करवाया था । और उनके भोजन करने की थाली व गिलास आज भी कलकत्ता आर्यसमाज में रखे हैं । गिलास और थाली वाली बात वातावरण को काफी मार्मिक बना दिया । अपने आपको आर्यसमाज का एक पहरेदार बताते हुए उन्होंने गुरुकुल के समस्त निवासियों से आर्य-समाज और गुरुकुल की उन्नति में अपना पूर्ण सहयोग देने की अपील की । सभा में श्री रामलाल जी वैद्य तथा सुप्रसिद्ध इतिहासवेत्ता डा० सत्यकेतु जी विद्यालंकार भी विद्यमान थे । कुलवासी तथा आर्यसमाज इन सब महानुभावों का धन्यवाद करता है ।

भावभीनी विदाई

२२ मई को गुरुकुल कांगड़ी की सेवा छोड़कर जाने वाले सहायक मुख्याधिष्ठाता श्री सुखवीरसिंह जी राणा तथा कार्यालयाध्यक्ष श्री बलवानसिंह जी को कार्यालय आदि के समस्त सदस्यों की ओर से भावभीनी विदाई दी गई । श्री राणा जी ने अपने विदाई संदेश में कुल के सभी विभागों के प्रति सेवाकाल में जो प्यार, सम्मान एवं सहयोग दिया उसके लिए आभार प्रदर्शित किया तथा कहा कि आपकी यह जनप्रिय संस्था, आपका विभाग, आप और आपके सहयोगी बंधुओं का भविष्य सदैव उज्ज्वल हो ।

पत्रिका परिवार एवं कुलवासी आप दोनों महानुभावों का धन्यवाद करते हैं और आशा करते हैं कि कुल के प्रति आपका प्रेम पूर्ववत् बना रहेगा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वाध्याय के लिये चुनी हुई पुस्तकें

वैदिक साहित्य

वेदोद्यान के चुने हुए फूल (सजिल्द)	५.००
वेद का राष्ट्रीय गीत (सजिल्द)	५.००
मेरा धर्म (सजिल्द)	७.००
वरुण की नौका (दो भाग)	६.००
अग्निहोत्र (सजिल्द)	२.२५
आत्म-समर्पण	.५०
वैदिक स्वप्न विज्ञान	२.००
वैदिक अध्यात्म विद्या	.७५
वैदिक सूक्तियां	.७५
ब्राह्मण की गौ (सजिल्द)	.७५
वैदिक ब्रह्मचर्य गीत	२.००
वैदिक विनय (तीन भाग)	६.००
वेद गीतांजलि	२.००
सोम सरोवर (सजिल्द)	२.००
वैदिक कर्त्तव्य शास्त्र	.५०
सन्ध्या सुमन	.५०
स्वामी श्रद्धानन्द जी के उपदेश	३.७५
आत्म मीमांसा	२.००
वैदिक पशु यज्ञमीमांसा	२.००
सन्ध्या रहस्य	२.००
अथर्ववेदीय मन्त्रविद्या	३.५०
ईशोपनिषद्भाष्य (सजिल्द)	२.००
अध्यात्म रोगों की चिकित्सा	२.५०
ब्रह्मचर्य संदेश	४.५०
आर्य संस्कृति के मूल तत्त्व	४.००
स्त्रियों की स्थिति	४.००
एकादशोपनिषद्	२.००
विष्णु देवता	२.००
ऋषि रहस्य	२.[illegible]०
हमारी कामधेनु	२.००

ऐतिहासिक तथा जीवन चरित्र

भारतवर्ष का इतिहास ३ य भाग	४-५०
बृहत्तर भारत	७.००
योगेश्वर कृष्ण	४.००
स्वामी श्रद्धानन्द जी महाराज	.२५
स्वामी दयानन्द का पत्र व्यवहार	.७५
गुरुकुल की आहुति	.५०
अपने देश की कथा	.३७
दी मिडिल ईस्ट (इङ्गलिश)	३.००
ऐशियण्ट फींडम	५.७०

स्वास्थ्य सम्बन्धी ग्रन्थ

स्तूप निर्माण कला (सजिल्द)	३.००
प्रमेह श्वास अर्शरोग	.२५
जल-चिकित्सा विज्ञान	.७५
होमियोपैथी के सिद्धान्त	२.५०
आसवारिष्ट	२.५०
आहार	५.००

संस्कृत ग्रन्थ

संस्कृत प्रवेशिका प्रथम भाग	.६६
संस्कृत प्रवेशिका २य भाग	.८७
बालनीति कथामाला	.७५
साहित्य सुधा संग्रह	.२५
पाणिनीयाष्टकम् (दो भाग)	प्रतिभाग ७.००
पंचतन्त्र पूर्वार्द्ध (सजिल्द)	२.५०
पंचतन्त्र उत्तरार्द्ध (सजिल्द)	२.००
सरल शब्द रूपावली	.२५
सरल धातु रूपावली	.६०
संस्कृत ट्रांसलेशन	.२५
पंचतंत्र (मित्र सम्प्राप्ति)	.७५
पंचतंत्र (मित्र भेद)	.५०
संक्षिप्त मनुस्मृति	.५०
रघुवंशीय सर्गत्रयम्	.२५

पुस्तकों का बड़ा सूचीपत्र मुफ्त मंगाइये । धार्मिक संस्थाओं के लिये विशेष रियायत का भी नियम है ।

पुस्तक भण्डार, गुरुकुल कांगड़ी विश्वविद्यालय, हरिद्वार (जि० सहारनपुर) ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादक : भगवद्दत्त वेदालंकार ।
प्रकाशक : डॉ० गंगाराम, कुलसचिव : गुरुकुल कांगड़ी विश्वविद्यालय ।
मुद्रक : सुरेशचन्द्र वैष्णव, मैनेजर : गुरुकुल कांगड़ी प्रिन्टिङ्ग प्रेस, हरिद्वार ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल-पत्रिका

गुरुकुल कांगड़ी विश्वविद्यालय, हरिद्वार

DIGITIZED C-DAC
2005-2006
30 AUG 2006

मई १९७४, बैशाख २०३१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषय-सूची

सं० विषया:	लेखका:	पृष्ठांका:
१ श्रुति-सुधा		३३७
२ कवि: श्री रामकृष्ण:	श्री अचिन्त्यकुमारसेनगुप्त:, अनु०श्रीकृष्णसेन:	३३८
३ क्रान्तिकारी मदनलाल:	श्री शिवपूजन शास्त्री	३४२
४ चक्रवर्तिनो राजगोपालाचार्यस्य स्वर्गवास:	श्री विद्याभूषण: गणेशराम शर्मा	३४३
५ दिवङ्गतां प्रति	डा० राजमणि पाण्डेय:	३४५
६ अथ प्रकाशाभ्युदयोनाम	डा० मंगलदेव शास्त्री	३४६
७ ऋगादिवेदचतुष्टयाधारेणार्यसभ्यताया ...	पं०जयदत्तशास्त्री,व्याकरणदर्शनाचार्य,एम.ए.	३५१
८ सम्पादकीय टिप्पण्य:	श्री पं० भगवद्दत्तो वेदालंकार:	३५६
९ साहित्य-समीक्षा	" " "	३५७
१० युवक के प्रति भारत को असन्तोष	श्री विष्णुदेव प्रसाद	३५८
११ मैं हूं पान्थ	श्री अभेदानन्द	३५८
१२ सौर्य अणुतन्त्र एवं वैदिक देवता	श्री दीनदयाल गुप्त,एम.एस-सी,एल.एल-बी	३५९
१३ कच्छवंशमहाकाव्य	डा० रामदत्त शर्मा, एम. ए., पीएच डी	३६५
१४ दहेज की वर्तमान कुप्रथा से लाखों ...	श्री ओमप्रकाश त्यागी, सदस्य राज्यसभा	३६९
१५ हम तो चाह रहे हैं दाने	श्री सालिकराम शर्मा 'विमल' बी ए.	३७१
१६ सोम राजा का आतिथ्य और अग्निमंथन	श्री पं० भगवद्दत्त वेदालंकार	३७२

—★—

गुरुकुल-पत्रिका का वार्षिक मूल्य—

देश में ४ रुपये. विदेश में – ७ रुपये. एक प्रति - ४० पैसे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओ३म्

गुरुकुल-पत्रिका

[गुरुकुलकांगड़ीविश्वविद्यालयस्य मासिक पत्रिका]

वैशाख : २०३१, मई १९७४, वर्षम्-२६, अङ्कः ९, पूर्णाङ्कः ३०५

श्रुति सुधा

अस्य श्लोको दिवीयते पृथिव्यामत्यो न यंसद् यक्षभृद् विचेताः ।
मृगाणां न हेतयो यन्ति चेमा बृहस्पतेरहिमायां अभिद्यून् ॥

(अस्य) इस बृहस्पति का (श्लोकः) यश (दिविपृथिव्यां) द्युलोक और पृथिवी लोक में (ईयते) फैलता है। वह बृहस्पति (यक्षभृत्) शिष्य के मनरूपी यक्ष का भरणपोषण करने वाला (विचेताः) विशेष रूप में चिताने वाला (अत्यो न यंसत्) शिष्य को गतिशील घोड़े के समान नियन्त्रित करता है, सधाता है। (मृगाणां हेतयो न) मृगों का हनन करने वाले अस्त्रों के समान (बृहस्पते इमाः) बृहस्पति के ये अस्त्र हैं जो कि (द्यून्) शिष्य के मस्तिष्करूपी द्युलोक में उत्पन्न (अहिमायान् अभि) अहिमायाओं की ओर उन्हें छिन्न-भिन्न करने के लिये (यन्ति) जाते है।

अहिमायान्–अहेर्मेघस्य माया इव माया प्रज्ञा येषामसुराणां तान् । यद्वा अहेः मायाः कुटिलगतयः, ज्ञानावरणानि वा ।

जिस प्रकार सूर्यप्रकाश को रोकने वाले मेघ के आवरणों को सूर्यकिरणें छिन्नभिन्न कर देती है, उसी प्रकार शिष्य के मस्तिष्करूपी द्युलोक में आसुरी कुटिल गतियों व अज्ञानावरणों को बृहस्पति की दिव्यशक्तियां छिन्नभिन्न कर देती हैं।

यक्षभृत्–यक्षं विभर्ति यः। यक्ष मन को भी कहते है। शिवसंकल्प वाले मन्त्र में मन को यक्ष कहा गया है।

अत्यः–अत् सातत्यगमने–शिष्य को भी घोड़े के समान निरन्तर गतिशील व सक्रिय रहना चाहिये। आलसी व सुस्त नहीं होना चाहिये। जिसप्रकार वेगवान् घोड़े को सधाया जाता है उसी प्रकार एक युवा व्यक्ति को भी नियन्त्रित रखना चाहिये तथा उसे सुघड़ बनाना चाहिये।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कविः श्रीरामकृष्णः

लेखकः—श्रीमान् अचिन्त्यकुमार-सेनगुप्तः
अनुवादकः—श्रीकृष्णसेनः, श्रीअरविन्दाश्रमः, पाण्डिचेरी

"अम्ब, कुरु माम् रसिकं दमयुक्तं च, न केवलं नीरस-संन्यासिमात्रम् ।"

इयमासीत् प्रार्थना शारदा-पादाम्भोजे कवेः रामकृष्णस्य । इयम् खलु नित्यकालस्य प्रार्थना कवीनाम् ।

आम्, रस इष्यते, पुनः तेन सह दमोऽपि काङ्क्ष्यते । अन्तर्वेगः प्रयोजनीयः तेन सह इष्यते बन्धनं, संयमनं शृङ्खलं च । भावेन सह रूपं, परिमितिः, सौष्ठवं; निबिडतासहिता परिमितिश्च ।

रोधस्वती खलु नामान्तरं नद्याः । वेगवती सा वेगेन सहैव रोधसी स्तः तस्याः तत एव रोधस्वती, तटौ च स्तः तत एव तटिनी सा । यदि तस्याः किमपि तटबन्धनम् नाभविष्यत् साऽभविष्यत् प्लावनी, प्रवाहवती, प्रलयंकरी, भयंकरी; न कदापि शुभङ्करी । भूयश्च यदि सा सतरङ्ग—रङ्ग—विभङ्गा नाभविष्यत् अभविष्यत् सा पल्वलबद्धा । तथैव यदि रसः दम-रहितः, दमः च रसवर्जितः भवति एतौ समान-फलम् सुवाते । यथार्थतः—साधारण-फलम्; अस्यार्थः—स्वयमेव प्रतिपादयतः तौ परस्परम् द्वयोर्मध्ये न कोऽपि कविता वा । यदि तैल—स्निग्ध—वर्तिकायाम् अग्निः बद्धुं शक्यते तदा सोऽग्निः भवति मसृण—दीपशिखा एका; इतरथा, सः स्फुलिङ्गः केवलम्, न कदापि दावानलः, कवितानाम दीपशिखा ।

रसेन गाढः दमेन दृढः श्रीरामकृष्णः कविः । रसेन सिक्तः दमेन समर्थः कविः रामकृष्णः ।

उदारार्थे का नाम कविता ?

संक्षेपतः, कविता अस्ति अनिवर्चनीयानन्दस्य प्रस्फुटनम् प्रकाशनं वा, मानस-भावस्य रसे पक्त्वा प्रतीकसाहाय्येन प्रकाशनम् । छन्दः उत वा यमकः विरामः झणत्कारः वा—इमे काव्याङ्ग-भूषणमात्रम्, न कदापि काव्यस्य प्राणवस्तुनी; वृक्षस्य पल्लव-वल्कल-सदृशे, न तस्य पुष्पकोरक-समाने । प्राणनाम दीप्तिः चर्मणि नहि दृश्यते; सा दीप्तिः नेत्रेषु । ततः पश्य—कियत् पश्यन्ति नेत्राणि, हृदयगुहायां सुगहनाऽन्धकारं वा कियत् द्रष्टुं शक्नुवन्ति तानि । आलोकय, सा दृष्टिः एकेन चकितनेत्रपातेन किम् अतल-अज्ञान-अन्धकारं उद्भासयति ।

रामकृष्णस्य गद्यमय आधारः कवितायाः । नाधुना कुत्रापि अस्मिन् विषये कोऽपि सन्देह-लेशः यत् कविता भवति गद्येऽपि । पुनश्च तत् गद्यं न गद्यमात्रम् । सूर्य-करैः तीक्ष्णद्युति-निशित-खड्ग-धारावत् भासुरं तत् कवितायाम्; तीरवत् अनन्य-लक्ष्यं दूरवेधि च । व्यक्तमतिक्रम्य आक्रामति अव्यक्तम् प्रति उत्तीर्य गोचर-सीमां गभीरं विशति तत् शनैः शनैः । निर्दिशति पुनः सुस्पष्टस्य कायस्य ऊर्द्ध्वे छाया-मयम् रहस्य-राज्यम् एकम्; निर्देशः पुनः विदितम् अतीत्य अविदितं प्रत्येव, मृन्मयरूपमपि चिन्मयस्वरूपं तत् ।

कणः स्यात् संभवतः शिशिरस्य, परन्तु उत्सोऽस्य आकाशः, बिन्दुः अयम् अश्रुणः, परन्तु वेदना तस्य भुवनप्लाविनी ।

एकाक्षरा अभिधा मा (माता) किन्तु सुदूर-विस्तृता अनुकम्पा तस्याः । अति क्षुद्रः खलु अंकुरः, परं प्रसुप्तः तस्याभ्यन्तरे दीर्घजटवट-वृक्षस्य जन्म-स्वप्नः । वाक्यं तु लघु, तस्य भावस्य गुरुविस्फोरण-सम्भावना वर्तते सदैव । निश्चित-मेव शुष्कं सौम्यं काष्ठखण्डम्, किन्तु अग्निमन्थम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्वेत-शान्तः च शङ्खः तस्य हृदये अपि समौनमस्ति महार्णवस्य आह्वानगीतम् । एवमेव काव्यस्य प्रकाशेऽपि । स्वल्पे हि अतिशयस्य संवादः, प्रत्यक्षे एव परोक्षस्य परिचयः, नैकट्ये खलु सुदूरस्य उपस्थितिः, निरर्थकस्य मध्येऽपि बहु-मूल्यस्य आविष्कारश्च ।

यावत् 'अहम्' अस्ति तावत् गद्यम् । यदा 'त्वम्' आगतः तदा संजाता कविता । यावत् 'अहम्' तावत् बन्धनम् यदा 'त्वम्' आविर्भूतः तदैव नादितम् छन्दः । 'अहम्' त्वत्सहितः भवामि ।

ततः सत्य-साहित्यं हि नित्य-कालस्य कवेः एव ।

साहित्यार्थः कः ? साहित्यं खलु सहितत्वम्, यत् किञ्चित् तत्त्वम् साहित्यस्य तद् एव तत्त्वम् सहितस्यापि । पुनः अस्यार्थः—मिलनस्य तत्त्वम् । परन्तु, केन सह मिलनम् ? केन सह संयोजनम् ?

अस्य उत्तरं न हि विशेष-कठिनम् । अयम् संयोगः, इदम् मिलनम् समग्रजीवजगत्या सह, अखिलसंसार-स्रष्ट्रा सह, सह च प्रकृति-परिवेशेन पुनः समग्रेन्द्रियबोधेन,—येन केनापि ज्ञेय–दृश्य–स्पृश्य–ग्राह्य–भोग्याऽऽस्वाद्येन सर्वैः एव,–गम्येन, गोचरेण प्रत्यक्षेण समम् । न केवलं वस्तुभिः स्वसंवेद्यैः, न च केवलम् आत्मसुखेन, आत्मक्रीडया आत्मरत्या वा सह इयम् अन्तरङ्गता परम् संवेद्य–वस्तुभिः सहापि । अस्यार्थः–अयम् संयोगः मम प्रतिवेशिनाम् मनुष्याणाम् सुख-दुःखेन, आशा–निराशा–वञ्चना–विक्षोभैः सह । संयोगोऽयम् प्रत्येक-धूलि-कणेन प्रत्येक मुहूर्तकणेन च, अयं संसर्गः प्रत्येक केन कणेन सह, संसार-समुद्रस्य घटना-तरङ्गाणाम् किमपि वस्तु यथा न उपेक्षितम् परित्यक्तम् वा विश्वसृष्टाम्, तथा साहित्येऽपि समग्राय, समुदायस्य च कृते उदार-नियन्त्रणमस्ति चिरप्रसृतम् । तत् समानमेव छायाच्छन्नम् कल्याणा-ऽकल्याणाय, पाप-पुण्याय, मेध्याऽमेध्याय च, सर्वस्मै, सर्वेभ्यः । अस्ति अभिजाताऽपजाताय कुलीनाऽकुलीनाय, पांक्तेयाऽपाङ्क्तेयाय—निरपेक्ष-गणतन्त्रम् एकम् साहित्ये । यथा सृष्ट्याम् तथा साहित्येऽपि पङ्केन सह पङ्कजम्, कामेन सह प्रेम, वासनया सह वैराग्यम् । समासतः जीवनवीणा-याम् यति रागाः, ध्वनयः उत्तिष्ठन्ति, उच्चे, कोमले, धैवते, गान्धारे च स्वरे—समग्र-रागाणाम् सम्पूर्णता अस्मिन् साहित्ये एव, साहित्यं न वर्जयति किमपि, न किमपि अस्वीकरोति, परि-हरति, प्रत्याख्याति वा कदाचित्–न च अव्यापक–व्यक्तौ न चापि समाजे । खण्ड-कालस्य अखिल-खण्डताः समग्रः–क्रमवाहिताः च तत् निरीक्षते सोत्साहम् । चलति तत् मात्राम् संरक्ष्य घटनया सह, भवति च सक्रिय–सचेतनं सामाजिक-व्यापारे, ऐतिहासिक-सम्बन्धे भवति तत् जाग्रद्दृष्टिः, उद्यत-मुष्टि च । न केवलं लिखति तत् लेखन्या तां मषीमध्ये निमज्ज्य, लिखति तत् तया लेखन्या या निमज्जिता स्वेदे, क्लेदे, शोणिते अपि । सैनिकाः खलु ते ये लेखकाः, अमोघा च सा लेखनी तेषाम् हस्तेषु—अव्यर्थाऽऽयुधम् एव, शोणित–सायकः वा ।

किम् परिणतिः समाप्तिर्वा अत्र एव साहि-त्यस्य ? एतन्मात्रः साहित्य-परिधिः ?

नहि । अस्ति अतःपरमपि । सैनिकस्य पश्चात् अस्ति संन्यासिनः परिच्छेदः, इन्द्रियाणाम् ऊर्द्ध्वे तु एकम् इन्द्रजालम्, वस्तुवादस्य ऊर्द्ध्वे अध्यात्म-चेतनायाः संवादः । इदानीन्तनस्य पारे वा चिरन्तनस्य इङ्गितम् । खण्डकालस्योपरि नित्य-कालस्य अस्तित्वम् । सीमान्वितायाः पृथिव्याः पारे निरन्त नीलाम्बरम् ।

ततः इष्यते सहितत्वम् इन्द्रियातीतेन, चिरन्तनेन, सनातनेन समम्; नित्यध्रुव–निर्वि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पेन सह। सुखम् नास्ति केवलम् भूमिम् आश्रित्य, **भूमैव सुखम्**, भूमाऽपि आश्रयितव्यः। केवलं गम्यं वा ग्राह्यम् वा न सन्तुष्टिदायकम्, प्रविश भूयः निलीनस्य गभीरगह्वरम् "**चरैवेति**" "**गुहाहितश्च**" "**गह्वरेष्ठम्**"। संकुली कुरु, इदानीन्तनेन सह चिरन्तनम्, यत्किञ्च इदानीन्तनम् तत् सर्वम् संवादमात्रम्, पुनः यद् एव चिरन्तनम् तत् सत्यम्। न भूयः साहित्यं केवलं संवादः, न च सत्यमात्रम्, साहित्यं तु सत्य-संवाद-संमिश्रणम्। सत्यस्य संवादं यः परिवेषयति सुन्दरस्य स्थालिकायाम् साधुः सः कविः।

भूयः किञ्चित् परिस्फुटी-कुर्याम्। क्रन्दनातुरा पृथिवी इयम्——अयम् अस्ति संवादः, परन्तु सर्वम् क्रन्दनम् संप्लाव्य एव हास्य-शब्दः श्रवणीयः— तत् एव सत्यम्, ततः नाऽवसीयते तत् केवलं क्रन्दने, किन्तु आनयति तत् साहित्यम् हास्य-संकेतम् च। यस्मात् आनन्दमयात् हास्यम् उत्सारितं तस्मात् एव आनयति साहित्यं तस्य आनन्दमयस्य स्पर्शम्। एतावान् मृत्युः मर्त्यलोके इयम् खलु वार्ता; किन्तु, सर्वान् पूतिगन्धान् अतिक्रम्य घ्राणे अस्माकम् आगच्छति एकम् प्रगाढं पुष्पसौरभम्——सत्यम् हि एतत्। तथैव, न केवलं पूतिगन्धे निमग्नं साहित्यम् आनयति पवित्रगात्रस्य सुगन्धमयस्य सान्निध्यमपि तत्। सन्ति अस्याम् पृथिव्याम् बहुविधाः क्षुधाः वञ्चनाश्च, तथापि क्षुधायाः वञ्चनायाश्च, ऊर्ध्वे एव दृश्यमयी अतलस्पर्शि–तृप्तिः। ततः साहित्यं न केवलं क्षुधायाः वञ्चनायाश्च हाहाकार एव, अपितु तत् प्रसन्नतामनिवर्चनीयां प्रदर्शयति, प्रदर्शयति पुनः अनायास-लभ्यम् एकम् दुर्लभाविर्भावम्। क्षणकालस्य भित्तौ दण्डायमानं तद् उद्घाटयति नित्यकालस्य सिंह-सदन-द्वारम्। न केवलं तद् आह्वयति मनुष्यान् एकवेलायाः भोजार्थम् अकिञ्चनानां कृते एव, परन्तु, आमन्त्रयति तान् अनन्तकालस्य अमृतभोजार्थमपि।

संवाद-पत्रे मनुष्याणाम् आकारः प्रवञ्चितानाम् पराभूतानाम् एव परिलक्ष्यते। साहित्ये जनाश्चिर-जयिनः आदित्यवर्णामृतपुत्राश्च। साहित्यं हि मनुष्याणाम् सम्यक्-परिचयः, अविकृत-कुलकीर्तिः। ततः न भवेत् साहित्यं व्यर्थवाक्यानाम् अलंकारमात्रम् तद् भवत् पूजा-मन्त्रः सुन्दरस्य पूजायाम् आनन्द-मन्त्रः। अन्ततः आनन्दमयेन सहयोग एव अस्यार्थः।

"सम्प्राप्तः साम्प्रतं सङ्गस्तव हे सर्वसुन्दर"

समग्र-विश्व-सृष्टिः ईश-हस्त-लिखितम् प्रेम-पत्रम् मनुष्येभ्यः, साहित्यं पुनः तस्य पत्रस्य मनुष्य-विरचितम् प्रत्युत्तरम्, इयम् विश्व-सृष्टिः ईश्वरस्य सुस्वर-सम्भाषणम्; तथैव साहित्यं तस्य प्रतिध्वनिरेव। इयम् सृष्टिः ईश-कान्ति-गौरवम्, साहित्यं पुनः तस्य प्रतिच्छाया।

यथाऽहं स्व-लेखस्य स्रष्टा, न तथा किं कोऽपि अस्याः विश्वरचनायाः कर्ता? अहम् अस्मि, किन्तु, अस्ति किं सः? अपि नास्ति कुत्रापि?

आम्; सोऽस्ति।

"कविर्मनीषी परिभूः स्वयम्भूः"

कविरसौ यो वेदवित्, विद्वान्, कोविदः, विपश्चित्। क्रान्तदर्शी सः यः पश्यति परिशेष-पर्यन्तम्; सीमामतिक्रम्याऽपि पश्यति सः। सविता इति च अन्यः अर्थः कवेः, सविता, जनयिता, रचयिता। सविता–यस्मात् एव सर्वे जाताः, सर्वे जायन्ते, यो हि यात्रा सर्वेषाम् समस्तस्य च भूमिका।

सुतराम् आदिकविः खलु ईश्वरः स्वयम्।

आलोकय चतुर्दिशम्, पश्य——नक्षत्रमण्डिताकाशम्, गहन-भयालय अरण्यम्, कानन-कुन्तल-भूमिखण्डम्, उदार-उद्वेल-उदधिम्। अवलोकय कीदृशः विराट् त्वाम् आवेष्टयति। एकतः तुषार-किरीटः पर्वतः, अन्यतः च कल्लोलिनी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वल्लभः समुद्रः । ईक्षस्व हरित-शस्याढ्यम् प्रान्तरम्; पुनः पश्य दलिताञ्जनघननील-मेघपुञ्जम् । किं न पश्यसि एकम् विचित्र-विस्तारम् एकाम् निपुण-घटन-सज्जाम् ? कति वृक्षाः, कतिच्छायाः, कति पुष्पाणि, कति वर्णाः, कति विहगाः, कति कूजनानि, कति आपः, कति स्वराः, पारयसि प्रेक्षितुं तत्र अनुबद्धमेकं छन्दः; अविच्युत-शृङ्खलाम् एकाम् ? अपि पश्यसि ऋतूनां पदपाते बिन्दु-मात्रम् यतिपातम् ? चतुर्दिक्षु प्राप्नोषि किं प्रेम-प्रसन्नरसप्रकाशनम् ? तव मनसि न जायते किम् कश्चित् गभीरार्थबोधः ?

तस्मिन्नेव अर्थे श्रीरामकृष्णोऽपि कविः,

यत् सत्यतमम् तदेव सः कविः सुबोधतमं कृत्वा प्रदर्शयति; प्रदर्शयति सुन्दरेण प्रकारेण, रसात्मकेन वाक्येन सुषमान्वितेन विन्यासेन अक्षुण्णया अर्थद्योतनया च ।

प्रारम्भे एव श्रीरामकृष्णेन उक्तम्—'अन्न-चिन्ता चमत्कारः ।" यावत् उदरे अन्नं नास्ति तावत् संसारे रसः नास्ति, पुनः यावत् रसः नास्ति तावत् ईश्वरोऽपि नास्ति । यावत् मनुष्यः रसहीनः तावत् स जडपिण्डः एव, तावत् सः यन्त्रायितः । यावत् तस्य उदरे रोटिका नास्ति तावत् मनुष्यःचन्द्रमपि शूलाकृत-रोटिकां कल्पयति । यावत् तस्य क्षेत्रे धान्यादिकं किमपि न भवति तावत् चन्द्र-कला केवलं शस्य-कर्तनी । परन्तु न कदापि चिरकालिकी समस्या सा—अजन्मनः अभावस्य वा । अभावस्य अन्तः अस्ति, नास्ति कुत्रापि भावस्य सीमा । शेषः तु क्षणस्थायी, किन्तु रसः अनन्तः अविनाश्यः च । क्षुधा शाम्यति, परम् चन्द्रः न कदापि अन्तं गच्छति ।

क्षुधार्तोऽहम्, वञ्चित-पीडित-पराभूतश्च अहम् । अथ किम् ? किन्तु, किम् केवलम् अयमेव मम परिचयः ? अहम् अस्मि ईर्षी, घृणी, असन्तुष्टः वा, परम्, अपि अयम् एव आत्मनिर्णयः मम अहमस्मि दैन्यदीर्णः, संकीर्णः, लघुः अशान्तः, उद्धतश्च—परम् कुत्रास्ति तृप्तिर्मम ? किं कदापि न प्राप्स्यामि निजान्तरे एव बृहत्सत्तायाः स्पर्शः बोधम् आयतनस्य अवधिहीनस्य, कस्मिंश्चित् दिनेऽपि न मंस्ये आत्मानम् रमणीयतमम् ?

ततः दैन्यदुःखदुरितानां नहि खलु एकाधिकारः, क्षुधा तृप्यति एकस्मिन् दिवसे, यद्यपि तस्मिन् दिवसे मन्ये न तृप्यति तृष्णा । प्राप्तान्नस्य अन्या क्षुधा जायते, जायते परमान्नस्य लोभः । मन्ये तस्य प्रसादस्य पात्रमेव इयम् समग्र-सृष्टिः तारकाणां इव धूलिकणाः । मन्ये, अस्मिन् अमृते जन्मगतः अधिकारोऽस्माकम् । नाहम् केवलं अन्नाधीनः, अहम् तु परमान्नभोजी ।

ततः "अन्नचिन्ता-चमत्कारस्य" पश्चात् एव अन्यचिन्ता परात्परा । तदा, तस्मिन् दिने चन्द्रः शिशोः हास्यवत्, प्रियायाः मुखवत् मातुः स्नेह-धारा इव प्रतीयते । निशा प्रतीयते श्री-सौन्दर्य-सुधा-नदीवत् । न केवल रोटिका रुचिरपि इष्यते, अस्यायमर्थः यद् अपेक्ष्यते दीप्तिः, द्युतिः, कान्तिः, प्रीतिः, लालित्यं लावण्यम् च । ततः इत्थम् खलु उच्चरितुम् इच्छामः—

"स्थीयतां मत्पुरो येन मुखचन्द्रं निभालये ।
न तृप्तिर्भोजनान्मेऽस्ति न च शाम्यति मे क्षुधा ॥"

सत्यमेतत्, यावत् "अन्नचिन्ता-चमत्कारः"—रामकृष्णेन युक्तम् उक्तं—तावत् कालिदासोऽपि हतप्रतिभः । भुक्तान्न-कालिदासः बुद्धिं पुनः प्राप्स्यति, ततः सः चमत्कृतोऽपि भविष्यति । तदा बुद्धि-सीमां त्यक्त्वा प्राप्स्यति असीमताम् अनुभवस्य, प्रमितिं परित्यज्य लभते सा अपरि-मितिम्, निर्गच्छति सा युक्ति-धूलि-जालात्, आगच्छति धीरम् विश्वास-श्यामलाऽऽश्रयम् । सन्धानम् समाप्यते, सिद्धान्तः स्वयमेव आग-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मिष्यति । गच्छति सा प्रमाभूमिकायाः प्रेमभूमिकाम् ।

यदा प्रेम्णः प्रकाशः आगतः तदा बुद्धेः सिक्थवर्तिः निर्वापणीया फूत्कारेण ।

ततः रामकृष्णः यथैव पश्यति तथैव पश्यामः "मातुलः चन्द्रः सर्वेषां मातुलः एव" इति ।

ईश्वरः हि सर्वेषाम् ईश्वरः—सर्वेषां स्वकीयः, सर्वेषाम् आत्मभूतः, सर्वेषाम् एकान्तः, निभृतनिधिः। आगमिष्यति ज्योत्स्ना तस्य स्पर्शानुभवस्य यदैव अल्पबुद्धेः दीपः निर्वापितः । सा चन्द्रिका प्रकोष्टम् समग्रं प्रपूरयति, संसार-अङ्गन-सीमां परिप्लावयति सम्यग् । तस्याः धारास्नाने दिग्देश-मण्डलं भवति शुचि स्निग्धं च ।

रसो वै सः । सः एव सर्वव्यापी परमानन्दः, सर्वत्रैव प्रसृता तस्य प्रसन्नता ।

श्रीरामकृष्णः आगतः तेनैव आनन्द-सन्देशेन सह; आहरन् अस्मत्कृते अस्मद्-विजय-वीरत्वस्य अमरत्वस्य प्रतिश्रुतिम् ।

ततः कः किल कविः नहि यदि श्रीरामकृष्णः कविः ?

क्रान्तिकारी मदनलालः

श्री शिवपूजन शास्त्री महाविद्यालय, किरठल

(१)
क्रान्तिकारिषु नाम नैजं, लेखितं बहुभिर्भटैः।
तेषु धन्यः स्वाभिमानी, मदनलालो धींगरा ।।

(२)
अध्यतिष्ठल्लन्दनं सः, यः सहस्रमनोबली।
नगरमध्ये हतस्तत्र, तेन कर्जन वायली ।।

(३)
सावदद् गर्जन् तदा, गौराङ्गनरन्यायालये ।
आकर्ण्य यच्चकिताः जनाः, बहुतर्कयुग्रोमाञ्चकम्।।

(४)
नाधिपत्यं रोचते वः, जर्मनानां लन्दने ।
किम्पुनः यूयं निषण्णाः, अस्मदीये भारते ।।

(५)
पूर्णतो न्यायोचितोऽयं मेऽधिकारः सर्वथा ।
यद्यहं युष्मान्प्रहण्याम्, लुण्ठकानपकारिणः ।।

(६)
उत्सवाः विहितास्तदानीम्, धींगरार्थं भारते।
लन्दने निन्दां विधातुं, तूत्थिता प्रस्तावना॥

(७)
सावरकरो वीरो युवा, ब्रूते स्म तत्रोपस्थितः।
प्रस्तावईदृग् नोचितः, शेषोऽभियोगस्तस्य यत्॥

(८)
तं द्रुतं हत्वा समुष्ट्या, कश्चिदाङ्ग्लो व्याहरत्।
मुष्टिरेषा लन्दनस्था, स्वादमस्याः पश्य त्वम्॥

(९)
तत्क्षणं त्वरितं युवैकः, तच्छिरोभङ्क्त्वा वदत्।
यष्टिरेषा भारतीया, स्वादमस्यास्त्वमपि पश्य?॥

(१०)
शूलमारोहणममीषाम्, केवलं क्रीडाभवत्।
क्रीडितुं शूले यतोऽमी, मातृकुक्षा वापतन्॥

(११)
मेलाः लगिष्यन्ति चितासु तेषाम्,
ये मातृभूम्यै निधनं प्रयाताः।
स्वमातृभूम्यै वलिदानदानाम्,
स्मृतिः सदा स्थास्यति नूनमेषा ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चक्रवर्तिनो राजगोपालाचार्यस्य स्वर्गवासः

ले० विद्याभूषणः श्री गणेशराम शर्मा, डूंगरपुरम् (राजस्थानम्)

विश्वविख्यातः स्वनामधन्यो विष्णुगुप्तश्चाणक्य इव कूटनीतिज्ञाचार्याणां गुरुर्गरीयान् गभीरमौलिकचिन्तको बृहस्पतिकल्पो वरिष्ठो विद्वत्तल्लजो भारतवर्षदेशस्यास्य राजनीतिक्षितिजेऽर्धशताब्दीपर्यन्तमतीव तेजोभास्वरं तातप्यमानो वयोवृद्धो नेता, स्वतन्त्रतासेनानायकः कुशलः प्रशासको दार्शनिको महान् साहित्यसेवापरायणो नैष्ठिको महालेखको राजनेता श्रीमांश्चक्रवर्ती राजगोपालाचार्यवर्यो विगते २५ दिसम्बर ७२ दिने सायं ५ वादनानन्तरं ४४ मिनटात्मके समये प्राणोत्क्रान्तिं कृत्वा स्वर्गलोकं जगामेति महानेव शोकसम्वादः। मद्रासनगरे तन्निधनमभूत्, ९४वर्षवयाश्च सोऽभूत्।

वयमत्र प्रसङ्गे हार्दिकीं दुःखानुभूतिमनुभवामस्तत्पुत्रपुत्रीप्रभृतीन् कौटुम्बिकान् सम्बन्धिनः स्नेहिजनान् परिचितान् समस्तान् देशबन्धून् प्रति च स्वात्मीयां समवेदनां निवेदयन्तोऽत्र तज्जीवनवृत्तसम्बन्धे किमपि वक्तुं प्रयतामहै पाठकमहाभागानां पुरतः––

चक्रवर्तिनो राजगोपालमहाभागस्य जन्म मद्रासप्रान्तस्य सलेम-मण्डलान्तर्गतस्य हासुरक्षेत्रस्य निकटवर्तिनि खल्वेकस्मिन् ग्रामे, ८दिसम्बर सन् १८७८ ई० दिने बभूव। तस्य शिक्षादीक्षादिकमादौ 'बंगलौर सेण्ट्रलकालेज' इति विद्यालये ततो 'मद्रास प्रेसीडेंसी कालेजे' तथा च 'ला कालेज' इति विद्यालयत्रये सम्पेदे। अथ सन् १९०० ई० वर्षे स एष राजगोपालाचार्यवर्यो वाक्कीलत्वव्यवसायमारेभे। सन् १९१९ ई० वर्षे स सत्याग्रहान्दोलने भागं जग्राह। सन् १९२१वर्षे सः स्वस्य वाक्कीलताव्यवसायं परित्यज्य ब्रिटिशशासनाद्विरुद्धं गान्धिमहात्मना प्रवर्तितेऽसहयोगान्दोलने सक्रियं भागमग्रहीत्। तदानीं समये यदा गान्धिर्महात्मा कारागारे निरुद्धोऽभूत्तदा सोऽयं राजगोपालाचार्यवर्यो गान्धेः 'यंग इण्डिया' इत्याख्यां पत्रिकां सम्पादयामास।

अथ सन् १९२१–२२ वर्षे स एषः श्रीमांश्चक्रवर्ती राजगोपालाचार्यवर्यः 'इण्डियन नेशनल कांग्रेस' इत्यस्याः सुविख्याताया भारतीय राष्ट्रियमहासभाया महामन्त्री तथा च कार्यसमितेः सदस्यस्तस्थौ। स खलु सन् १९२२ वर्षतः १९४२ ई० वर्षपर्यन्तं कांग्रेसमहासभायाः कार्यसमितेः सदस्यस्तस्थौ। पुनश्च स सन् १९४६–४७ वर्षे कार्यसमितेः सदस्यो निरवाच्यत। कांग्रेससभया प्रवर्तिते सत्याग्रहान्दोलनक्रमे स एषश्चक्रवर्तिराजगोपालाचार्यमहोदयः पञ्चवारान् कारागृहं जगाम।

'दक्षिण–भारत–हिन्दी–प्रचार–सभाया' उपाध्यक्षत्वसम्बन्धादसौ राजगोपालाचार्यमहाभागो दक्षिणभारते राष्ट्रभाषाया हिन्द्या महान्तं प्रचारं चकार।

अथ सन् १९३७ ई० वर्षे यदा स्वदेशस्यास्य भारतवर्षस्य विभिन्नेषु प्रान्तेषु कांग्रेसमहासभाया मन्त्रिमण्डलं बभूव, तदासौ राजगोपालाचार्यवर्यो मद्रासप्रान्तस्य मुख्यमन्त्री समभूत्तथा च सन् १९३८ ई० वर्षस्य-आक्टूबरमासपर्यन्तम् पदमेतदधितष्ठौ। आक्टूबरमासे सहि कांग्रेससभाया अन्यैर्मुख्यमन्त्रिभिः साकं त्यागपत्रं प्रददौ।

अथ सन् १९४२ ई० वर्षे स एषः श्रीमान् राजगोपालाचार्यवर्यो भारतविभाजनप्रश्ने कांग्रेस-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सभायाः शीर्षस्थैर्नेतृभिः सह मतभेदे विजृम्भिते सति स्वकीयं त्यागपत्रं ददौ । तदानीं राजगोपालाचार्यवर्यो मुस्लीमलीगसंस्थायाः पाकिस्ताननिर्माणस्य याचनां स्वीकर्तुमन्वशंसद्यस्य कांग्रेसमहासभायां देशे च सर्वत्र तत्समये विरोधो महान् बभूव । सन् १९४४ ई. वर्षे गांधि-जिन्नावार्तायां सोऽयं चक्रवर्ती राजगोपालाचार्यवर्यो महात्मनो गान्धेर्महनीं सहायतामकार्षीत् । सन् १९४६ ई. वर्षे चक्रवर्ती राजगोपालाचार्यो वायसराजस्य परिषदः (गवर्नरजनरलकौंसिल) सदस्यो निर्वाचितः । कञ्चित्कालं स बंगप्रदेशस्य राज्यपालश्चाप्यभूत् ।

२१ जून १९४८ दिने स एष राजगोपालाचार्यवर्यः स्वतन्त्रभारतस्य प्रथमो वायसराजः (गवरनर जनरल) नियुक्तोऽभूत्तथा च २५ जनवरी १९५० पर्यन्तं पदमेतदधितष्ठौ । श्रीजवाहरलालनेहरोर्नेतृत्वे केन्द्रे राष्ट्रिय सर्वकारस्य स्थापनायां संजातायां सोऽयं श्री राजगोपालाचार्यमहोदयो निर्विभागीयो मन्त्री विनियुक्तस्तथा दिसम्बर १९५० पर्यन्तं पदमेतदारूढ़स्तस्थौ । सन् १९५१ वर्षे जनवरीतो नवम्बरमासपर्यन्तं स गृहमन्त्री समभूत् । सन् १९५२तः १९५४पर्यन्तं राजगोपालाचार्यवर्यो मद्रास प्रदेशस्य मुख्यमन्त्री तस्थौ ।

स एषः श्रीचक्रवर्ती राजगोपालाचार्यमहोदयः सन् १९६२ वर्षे 'गांधिशांतिप्रतिष्ठानस्य' प्रतिनिधित्वेनाणविकशस्त्रास्त्रेषु प्रतिबन्धस्य पक्षसमर्थनाय विदेशाञ्जगाम, सहि भारतीयस्य प्रतिनिधिमण्डलस्य नेतृत्वं चकार । तदिदम् प्रतिनिधिमण्डलं नीत्वा सोऽमरीकां, इङ्गलैण्डं, इटालीं चागात् ।

भारतीयाया राजनीतेर्भीष्मपितामहो राजगोपालाचार्यवर्योऽसौ कुशलः खल्वेकः साहित्यकारः कथाकारश्चासीत् । तमिलभाषासाहित्ये तस्य शुकरातः, भगवद्गीता, महाभारतम्, रामायणम्, उपनिषदश्चेत्यादीनि पुस्तकानि वर्तन्ते । आंग्लभाषायामपि स महाभारत–रामायण – भगवद्गीतोपनिषदामनुवादं चक्रे । आंग्लभाषायां राजगोपालाचार्यस्य गल्पसाहित्यं तथा च लघुकथाश्चापि प्रसिद्धाः सन्ति । अतोऽतिरिक्तं वायस आफ दि अनइवाल्वड, कम्बरामायणम् (अयोध्याकाण्डम्), हिन्दुइज्म, डाक्टरिन एण्ड वे आफ लाइफ इत्यादीनि पुस्तकान्यपि स आंग्लभाषायां लिलेख । सन् १९५५ ई. वर्षे श्री राजगोपालाचार्यवर्यो 'भारतरत्नम्' इति सर्वश्रेष्ठेनोपाधिना सम्मानितोऽभूत् । सोऽयं श्री चक्रवर्ती राजगोपालाचार्यवर्यः दि. १ अगस्त सन् १९५९दिवसे मोहमय्यां नगर्यां 'स्वतन्त्रदलस्य' स्थापनामकरोत् ।

श्री चक्रवर्ती राजगोपालाचार्यवर्यो महात्मा बालगंगाधर तिलक इवाद्वितीयो वेदादिशास्त्रज्ञो विद्वान्मनीषी देशभक्तो महान् मेधावी, गान्धिरिव सत्याग्रहवीरो, वल्लभभाईपटेल इव कूटनीत्या क्रियात्मक क्रान्तिकरः, सुभाषचन्द्रवसुरिव स्वावलम्बनैकनिर्भरो निर्भयश्च, मोतीलाल नेहरूरिव विधिविधाननयनीतिविद्यापटीयान् क्रान्तदर्शी प्रतिभाप्रभाभास्वरशेमुषीको, लालालाजपतराय इव निर्भीकचेता अकुतोभयो, गोपालकृष्ण गोखले सदृशोऽनन्यो देशभक्तो, राजाराममोहनराय केशवचन्द्र सेनमहोदयवद्ब्राह्मं तेजो दधानः समाजसुधारको, भक्तसिहरामप्रसादचन्द्रशेखरराजाद इव मृत्युञ्जयः क्रान्तिवीरो दुर्धर्षः प्रतिपक्षहृदयभेत्ता नेता चाद्वितीयोऽखिलभारतीयप्रजाजना-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नामासीत् । तस्मादेवासौ शतसंवत्सरं सुदीर्घं परिपूर्ण-प्रायं भुक्त्वा पुरुषायुर्दिवंगतो देशस्यास्यास्माकं राष्ट्रपतिभिर्महामहिमशालिभिर्महामान्यैरुपराष्ट्र-पतिभिः प्रधानमन्त्रिभिः प्रभृतिभिरन्यान्यैः सर्वै रपि वरिष्ठैर्नेतृप्रवरैः सर्वदलीयैर्नेतृभिर्जनसाधारणैश्चापि लोकप्रियपरमादरणीयविभूतिस्वरूपो भारतराष्ट्रस्य युगपुरुष इव स्वकीयैः श्रद्धासुमनोऽञ्जलिभिः सादरं सस्नेहं च समभिनन्दिनो वन्दितः प्रशंसि-तश्च । वयमपि चात्रेदं विनिवेद्य तद्गुणानाम-नन्तत्वात्स्वात्मनश्च तच्छ्लाघानुरूपामशक्ततां मन्य-माना विरमामहे ।

'महिमानं यदुत्कीर्त्य तव संह्रियते वचः ।
श्रमेण तदशक्त्यावा न गुणानामियत्तया ॥१॥'

" दिवङ्गतां प्रति"

(मुक्तं वृत्तम्)

डा० राजमणि पाण्डेयः, कुरुक्षेत्रविश्वविद्यालयः

अयं देवो मातरिश्वा नाधुना प्राणायते ।
अद्य प्राणत्वेऽपि प्राणत्वं न बाले! वर्तते ॥१॥

इयं धात्री भस्मभूता सर्वदिक्षु विकीर्यते ।
अद्य आधारेऽपि आधारो न बाले! वर्तते ॥२॥

अयं स मार्तण्डदेवः किमिति निर्वाणायते ।
अद्य आलोकेऽपि आलोको न बाले! वर्तते ॥३॥

नास्ति सहृदयता नराणां मर्त्यलोके साम्प्रतम् ।
अद्य कारुण्येऽपि कारुण्यं न बाले! वर्तते ॥४॥

क्वाधुना गच्छामि ? शरणं यामि कं? जानामि नो ।
अद्य विश्वासेऽपि विश्वासो न बाले! वर्तते ॥५॥

निश्चलं विश्वं विशालं सर्वतो ग्रावायते ।
अद्य संसारेऽपि संसारो न बाले! वर्तते ॥६॥

प्रस्तरीभूतोऽयमाकाशोऽप्यनवकाशः प्रिये! ।
अद्य आकाशेऽपि आकाशो न बाले! वर्तते ॥७॥

दुःखदुःखं वस्तु वस्तु अपि सुखं दुःखायते ।
अद्य सौभाग्येऽपि सौभाग्यं न बाले! वर्तते ॥८॥

अमृतभावं गतो मृत्युस्त्वयि जने मृत्युं गते ।
अद्य मृत्युत्वेऽपि मृत्युत्वं न बाले! वर्तते ॥९॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ प्रकाशाभ्युदयो नाम

श्री डा० मंगलदेव शास्त्री

आर्य (=हिन्दु) जातिसंघटनात्मकं साहित्यिकमनुसंधानात्मकं च कार्यम्

(१) आर्यजातेः संघटनात्मकं कार्यम्

शिरसातिगुरुभारवाही भारापनयन यथा सुखमनुभवति, तथैव राजकीयोत्तरदायित्वपूर्ण-कार्यभारस्यापगमे किञ्चिदवर्णनीयं सुखमन्वभावि मया।

परं प्रारम्भत एव मम स्वाभाविकी प्रवृत्तिरासीदार्यजातेः पुनरभ्युत्थाने संघटने च। एवं साहित्यिककार्येनुसंधानात्मककार्ये च।

१९४६–१९४७ **वर्षयोर्नाआखाली** प्रभृतिस्थानेषु हिन्दूजातीयानामुपरि अवर्णनीयानां क्रूरतापूर्णहृदयविदारकघटनानां समाचारा यावद्भारतं व्याप्ता आसन्। तत्प्रतीकारार्थमार्यजातेः संघटनात्मकं कार्यं मयापि किञ्चित् कर्तव्यमित्यन्तःप्रेरणया मयापि प्रयत्नः प्रारब्धः।

१९४६वर्षस्य दिसम्बरमासे कार्यान्तरप्रसङ्गेन जयपुरं गतेन मया तत्रत्य विदुषां म० म० श्रीगिरिधरशर्मचतुर्वेदप्रमुखानां पुरस्तात्, तदनन्तरं च वाराणसीं प्रत्यागत्य तत्रत्य प्रधानविदुषां पुरस्तात्, संघटनविषयकाः स्वकीयविचारा उपस्थापिताः। सर्वेभ्यस्तेऽरोचन्त।

ततश्च वाराणस्यां **सार्वभौमहिन्दूधर्मरक्षासंघस्य, काशीस्थ विद्वन्मण्डलस्य** च मित्राणां सहयोगेन स्थापना समजायत। अस्मिन् प्रसङ्गे **काशीस्थविद्वन्मण्डलेन कृता महत्त्वपूर्णा घोषणा** अति प्रसिद्धाः। सहस्रशस्ताः प्रकाशिता आसन्, काशीस्थसुप्रसिद्धविद्वद्भिर्हस्ताक्षरिताः।१

राजर्षिपुरुषोत्तमदासटण्डनप्रयत्नेन **अखिलभारतवर्षीय संस्कृतिसंमेलनेनापि** १९४८वर्षे **प्रयागस्थकुम्भाधिवेशने** सोत्साहं ताः स्वीकृता अभूवन्। **तासां घोषणानामैतिहासिकं महत्त्वम्, विशेषतश्च सनातनधर्मानुयायिनां संस्कृतपण्डितानां दृष्ट्या।**

राजकीयपदादवकाशग्रहणानन्तरमेतादृशेषुकार्येषु निरन्तरं मम कार्योन्मुखी प्रवृत्तिरन्ववर्त्तत। अलं तस्या विस्तरेणात्र।

---

१. काशीस्थविद्वन्मण्डलस्य प्रधानमन्त्रिणा (स्व०) श्रीकेदारनाथशर्मसारस्वतेन दानवीरश्रेष्ठिश्रीयुगलकिशोरविरलामहोदयस्य तथा श्री १०८ विश्वनाथयति (महन्त हथियाराममठ, गाजीपुर) महोदयस्य अर्थसाहाय्येन संवत् २००४,२००६ वर्षयोः **"सार्वभौम हिन्दूधर्म के संबन्ध में काशीविद्वन्मण्डल की महत्वपूर्ण घोषणाएं"** इत्यभिख्यया काशीस्थसुप्रसिद्धविद्वद्भिर्हस्ताक्षरितास्ता घोषणाः सहस्रशः प्रकाशिता आसन्।

ममापि **"भारतीय आर्यधर्म की प्रगतिशीलता"** (इंडियन प्रेस, प्रयाग १९५०) इत्याख्ये पुस्तके ताः प्रकाशिता विद्यन्ते। सनातनहिन्दूधर्मस्य दृष्ट्या तासामत्यन्तं महत्त्वम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(२) साहित्यिकमनुसन्धानात्मकं च कार्यम्

तत्तद्विषयदृष्ट्यास्य कार्यस्याधोनिर्दिष्टा विभागाः कर्तुं शक्यन्ते—

(१) प्राचीनग्रन्थानामालोचनात्मकं संपादनम्, (२) सामान्यभाषाविज्ञानम्, (३) दीक्षान्तादिभाषणानि अनुसन्धानात्मकलेखाश्च, (४) सरस्वती भवनस्थप्राचीनहस्तलिखितग्रन्थानां प्रामाणिक सूचीपत्राणि, (५) संस्कृते इंग्लिशभाषायां चानुसंधानपत्रिकयोः संपादनम्, (६) संस्कृतविश्वविद्यालयीय विधेयकयोजनायाः प्रस्तुतीकरणम्, (७) तत्तद्राजकीयसमितीनां प्रतिवेदनानां प्रस्तुतीकरणम्, (८) भारतीयसंविधानस्य संस्कृतभाषान्तरम्, (९) भारतीयसंस्कृतेर्विकासदृष्ट्या विभिन्नवैदिकधारादीनां तत्तद्ग्रन्थरूपेण व्याख्यानम्, (१०) तत्तद्विशिष्टप्राचीनग्रन्थानां विशेषतो वैदिकग्रन्थानां संबन्धे 'ऐतरेय ब्राह्मणपर्यालोचन' सदृशानां पर्यालोचनग्रन्थानां प्रकाशनम्, (११) आध्यात्मिकचिन्तनमूलकानां 'रश्मिमाला' प्रभृतिग्रन्थानां प्रकाशनम्, (१२) असाम्प्रदायिक दृष्ट्या विश्वमानवीयदृष्ट्या च जीवनदर्शनस्य प्रतिपादनम्, (१३) विशिष्टग्रन्थानां समीक्षाः । इत्यादि इत्यादि ।

अत्र तत्तद्ग्रन्थानां नाम्नोल्लेखस्तु स्थानाभावादनावश्यकः । तद्विषये विशिष्टे प्रविदुषां शुभाशंसनानि सम्मत्यादयश्चात्र न प्रकाश्यन्ते । तथापि अत्र प्रसङ्गे एतत्तावदवबोध्यं यत् संस्कृतगद्यपद्यात्मकेषु मदीयग्रन्थेषु साधारणतया प्रचलितगद्यपद्यशैल्या सह ब्राह्मणग्रन्थशैली, वैदिकमन्त्रशैली सूत्रशैली चापि यत्रतत्र समाश्रिताः सन्तीति किञ्चिद् वैशिष्ट्यमावहति । संस्कृतगद्यमपि मदीयं किञ्चित्प्रातिस्विकं वैशिष्ट्यमावहतीति-कतिपयमित्राणां संमतिः । तदत्र विद्वांस एव प्रमाणम् ।

तदेतत् साहित्यिकमनुसन्धानात्मकं च कार्यम्, मम विदेशप्रवासाद् १९२२ ई० वर्षे भारते प्रत्यागमनस्य कालादेव प्रारब्धम् । मम राजकीय महाविद्यालयेन सह संबन्धे स्थापितेऽपि, तत्र च तत्तत्कालेषु कार्यान्तरेषु व्यस्ततायाः सद्भावेऽपि, प्रायेणानवरतरूपेण प्राचलत् । प्रधानाचार्यपदेनापि मया तदावश्यकरूपेण कर्तव्यमासीत् ।

१९५१ ई० वर्षानन्तरं तु, यदाहं तत्तदागन्तुकराज्यकार्येभ्यो निवृत्त आसम्, तत्कार्यमत्यधिकसंलग्नतया प्राचलत् ।

वाराणसेय संस्कृतविश्वविद्यालयोपकुलपतित्वकाले (१९६१ वर्षे) कार्यान्तरबाहुल्येन कश्चिदन्तरायोऽवश्यमनुभूतो मया । परं सोऽल्पकालिक एवासीत् । अन्यथा तत्कार्यमद्यावधि सौभाग्येन सातत्येन निर्बाधगतिना च प्रवर्तते ।

श्वासप्रश्वासयोरन्तिमकालपर्यन्तमेवैव स्थितिः प्रचलतु इति मदीयः परमोऽभिलाषः ! "**स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्**" (तैत्तिरीयोपनिषद् १।११।१) इत्येष वै श्रुतेरादेशः ।

उक्तप्रवृत्तीनां विकासक्रमः

साहित्यिकानुसंधानात्मककार्यप्रसङ्गेन उक्तकार्यस्य नैकप्रवृत्तय उपवर्णिताः ! तासां विकासक्रममुपलक्ष्यापि किञ्चित्कथनं पाठकानां रुचिकरं भवेदिति स एवात्र संक्षेपेण प्रदर्श्यते ।

वेदारम्भसंस्कारस्यावसरे, १९०३ ई० वर्षस्य प्रारम्भे, मन्त्रस्यास्य पाठो मया कृत आसीदग्नेः पुरस्तात्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"ओं यथा त्वमग्ने देवानां यज्ञस्य निधिपा असि । ओम् एवमहं मनुष्याणां वेदस्य निधिपो भूयासम् ।" इति ।

तत आरभ्यैव **वैदिकस्वाध्यायस्य रुचिरुद**पद्यत । सा च प्रवर्धमानाद्यापि तथैव विद्यते । यावज्जीवनं च नूनं सा मम जीवनसङ्गिनी स्थास्यति । अतो वैदिकविषयानवलम्ब्यैव मम साहित्यिकमनुसन्धानात्मकं च कार्यं प्रारब्धमासीत् ।

तदनन्तरं कालक्रमेण राजकीयमहाविद्यालयेन सह संपर्के स्थापिते सति, तत्र च नानासंकीर्णसांप्रदायिकदृष्टीनां संघर्षस्य वातावरणे **समन्वयात्मकभारतीयसंस्कृतेर्भावनाया उदयस्तत्प्रतिक्रिया**रूपेण समजायत । मन्ये **'भारतीयसंस्कृतिः'** इत्यस्य नूतनस्य पारिभाषिकस्य शब्दस्य व्यवहार इदम्प्रथमत्वेन १९३४ ई० वर्षे सभायामेकस्यां सभापतित्वं कुर्वता मयैवारब्ध इति । तत आरभ्यैव एष विषयो मम भाषणानां लेखानां स्वाध्यायस्य चाभवत् ।

एतदाधारेणैव **'भारतीयसंस्कृतेर्विकासः'** इति विषयमादाय वैदिकधारादीनां विषये क्रमशो ग्रन्थमाला प्रकाशयितुमारब्धा । **'वैदिकधारा', 'औपनिषदधारा'** चेति ग्रन्थद्वयं प्रकाशितचरमेव । अन्या अपि पञ्च वा षड् वा धाराः क्रमशः प्रकाशयिष्यन्त इत्याशासे । भारतीयराष्ट्रे समन्वयात्मकता बुद्धेः पोषणेनास्या ग्रन्थमालाया अद्वितीयं महत्त्वमिति बहवो मन्यन्ते ।

प्रायेण राजकीय महाविद्यालयादवकाशग्रहणकालादारभ्य नानाकारणवशाद् **अध्यात्मचिन्तनप्रवृत्तेरुद्बोधनम्** अहमात्मनि अवलोकये आयुषः पश्चिमे भागे चिन्तनशीलस्य मानवस्य प्रवृत्तिरेषा स्वाभाविकी, समुत्पद्यते । **'रश्मिमाला', 'अमृतमन्थनम्'** इति पद्यात्मकग्रन्थद्वयानन्तरम् षोडशभिर् **रश्मिभिर्जीवनज्योतिषो** नरनारायणसंवादात्मकस्य पद्यात्मकग्रन्थस्य सांप्रतमेव प्रकाशनमपि तस्याः प्रवृत्तेरेव परिचायकम् । असाम्प्रदायिकदृष्ट्या विश्वमानवीयदृष्ट्या च जीवनदर्शनस्य प्रतिपादकोऽयं ग्रन्थः कदाचित्कालक्रमेण **'भगवन्नारायणगीता'** इति नाम्ना प्रसिद्धिं प्राप्नुयादिति संभाव्यते ।

भारतीयशासनेन संस्कृतायोगस्य नियुक्तिः

१९५६ ई० वर्षस्य अक्टूबरमासे भारतशासनेन भारते संस्कृताध्ययनस्यावस्थां परिशीलयितुं संस्कृताध्ययनस्य संस्कृतानुसंधानस्य चाभिवृद्धये संस्कृतायोगस्य नियुक्तिः कृतासीदिति नाविदितं विदुषाम् ।

तस्य सदस्येषु विभिन्नप्रदेशीयाः संस्कृतज्ञा आसन् । परमायोगसदस्येषु संस्कृताध्ययनाध्यापनस्य प्राचीनपरम्पराया निर्वाहकस्य पक्षस्य प्रायेण सर्वथा अभाव एवासीत् । स चातीव खेदावहः । **नूनं तादृशस्यायोगस्य नियुक्तिर्वरविरहिताया वरयात्रायाः प्रस्थानसमासीत् ।**

अतएवास्या नीतेर्विरोधप्रदर्शनार्थं **भारतीयसंस्कृतसाहित्यसंमेलनस्य विशेषाधिवेशनं** मम साभापत्ये **नाथद्वारापुर्याम्** १५,१६।१२।१९५६ दिनाङ्कयोरभवत् (तत्रत्यं ममाभिभाषणमस्मिन्नेव ग्रन्थेऽन्यत्र प्रकाशितं विद्यते) ।

अधिकारपदारूढानां शक्तिमतामविवेककारिताया एकमिदं प्रमुखं निदर्शनम् । विशेषतोऽस्माकमुत्तरप्रदेशे तादृशां निदर्शनानां बाहुल्यमवलोक्यते। तन्मूलकोऽनन्तधनराशेरपव्यय उपयोगिसंस्थानां निर्माणवैयर्थ्यं च विपश्चितां हृदयेष्वतितमां पीडामुत्पादयति !

तदेतत्केवलं प्रासङ्गिकम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

केन्द्रियसंस्कृतमण्डलस्य सदस्यता
(१९६०-१९६२)

उक्तस्यायोगस्य संस्तुतीरनुसृत्य भारतीय-शासनेन १९५९वर्षे एव केन्द्रियसंस्कृतमण्डलस्य स्थापना कृता । १९६०वर्षादारभ्य १९६२वर्ष-पर्यन्तमहमपि तस्य सदस्यत्वेन नियुक्तोऽभवम् । भारतवर्षस्य तत्तत्प्रदेशेषु तस्याधिवेशनान्यभवन् मम सदस्यताकाले संस्कृतज्ञानां च वास्तविकहित-दृष्ट्या कार्येणास्य भवितव्यमित्येष हार्दिकोऽभिलाष आसीद् भारतशासनस्य मण्डलसदस्यानां च ।

निःसंशयमनेन मण्डलेन नैकैरुपायैः संस्कृत-ज्ञानामुत्साहवर्धनं क्रियते, संस्कृतस्य समुन्नत्यै प्रचा-रार्थं च यत्नः क्रियते ।

परमस्मिन्नपि मण्डले प्रायेण तादृशां सदस्या-नामभावोऽपर्याप्तसंख्या वा खेदावहा ये वस्तुतः पर-म्परागतपद्धत्या संस्कृतस्याध्ययनाध्यापनकार्ये निर-तानां संस्थानां साक्षादनुभवं धारयन्ति । अनेन नूनं मण्डलस्योपयोगितापक्षस्य हानिरेव भवति ।

मम सदस्यत्वकाले भारतशासनद्वारा मह-त्संस्कृतसंस्थानमेकं दक्षिणभारते स्थापनीयमिति विचारः प्रादुरासीत् तदर्थं कुत्र स्थाने कीदृशं च तत्संस्थानं भवेदित्यस्मिन् विषये बहु खल्वस्माभि-श्चिन्तितम् । अन्ततो गत्वा सुप्रसिद्धतिरुपतिदेव-स्थानसान्निध्य एव तत्स्थापनीयमित्येषैवास्माकं मण्डलस्य संस्तुतिरासीत् । तां स्वीकृत्य तत्रैव तस्य स्थापनार्थं भारतशासनेन प्रयत्न आरब्धः ।

अस्मिन् प्रसङ्गे सुपुष्कलेन मासिकपुरस्कारेण अन्यैश्च सौकर्यैः सह तस्य संस्थानस्य स्थापनायाः संचालनस्य चोत्तरदायित्वं मया स्वीकर्तव्यमित्येष प्रस्तावः साग्रहं १९६२ वर्षे मम पुरः स्थापितो भारतशासनेन । मण्डलस्याध्यक्षः श्रीपतञ्जलि-शास्त्री अपि साग्रहमस्य प्रस्तावस्य समर्थक आसीत् । परं सिद्धान्तदृष्ट्या सधन्यवादप्रदर्शनं मया स प्रस्तावो नैव स्वीकृतः ।

एतादृश एव प्रस्तावः १९६०वर्षेऽपि **रांची-स्थितविकासविद्यालयस्य** प्रबन्धसमितेर्मन्त्रिणः सकाशान्मया प्राप्तोऽभूत् । सुपुष्कलमासिकपुर-स्कारेण अन्यैश्च विविधसौकर्यैः सह तेषामपि साग्रहं प्रार्थनासीद् यन्मया तस्य विशिष्टविद्यालयस्य प्रधानाचार्यपदं स्वीकर्तव्यमिति । तदपि पदं मया सधन्यवादप्रदर्शनं नैव स्वीकृतमासीत् ।

राजकीयसेवाया अवकाशग्रहणानन्तरं विशिष्ट-परिस्थितीर्विहाय, जीवनस्योदात्तादर्शाननुसरता मानवेन अर्थलाभदृष्ट्या कश्चिन्नूतनो भारो नैव स्वीकर्तव्य इत्येष खलु सिद्धान्तश्चिराय ममाभिमत आसीत् । तथाहि--

सत्यं लोका लौकिकैरर्थजातै-
विक्रीय स्वं तोषमासादयन्ति ।
मूढास्ते ये काचमूल्येन मुक्ता
विक्रीयन्ते धन्यमात्मानमाहुः ॥

वाराणसेयसंस्कृतविश्वविद्यालयस्योप-कुलपतित्वम्
(१९६१)

आसामप्रदेशशासनीयसंस्कृतसमितेर् लक्ष्मी-पुरनगरे उपाधिवितरणोत्सवे १०।४।१९६१ ई० दिनाङ्के दीक्षान्तभाषणं विधाय, शिलांगराज-धान्याम् (A. I. G.) पदमधितिष्ठतः स्वपुत्रस्य स्वर्गीय श्रीराजेशचन्द्र स्य (I. A. S.) सविधे कंचित्कालमतिवाहयितुम्, अहं स्वधर्मपत्न्या साकं तत्रैव गतः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्रैव तत्कालं निवसता मया सहसा उत्तरप्रदेशीय राज्यपाल महोदयात् २४।४।१९६१ ई० दिनांकस्य तडित्सदेशो लब्धो यदहं वाराणसेय संस्कृतविश्वविद्यालयस्योपकुलपतित्वेन न्ययुज्य इति ।

तं समाचारं लब्ध्वा किञ्चिदाश्चर्यचकितोऽहम् १।५।१९६१दिनांके कार्यभारं ग्रहीस्यामीति तडित्संदेशेनैव राज्यपालादीन् विज्ञाप्य३०।४।१९६१ दिनांक एव ततः प्रस्थानं कृत्वा १।५।१९६१ दिनांके वाराणसीं प्राप्य तत्र तस्मिन्नेव दिनांके सविधि तत्पदभारमगृह्णाम् ।

अध्यापकमहोदयैश्छात्रवृन्दैरन्यैश्च कृतानां सोत्साहमौपचारिकस्वागताद्यभिनन्दनकृत्यानामनन्तरं विश्वविद्यालयस्य वास्तविकपरिस्थितेरध्ययने प्रवृत्तोऽहमभवम् । कतिचिद्दिवसानन्तरं मया ज्ञातं यत्तत्रत्या स्थितिर्नैव संतोषावहा । १९५८ ई० वर्षस्य प्रारम्भे (१०।४।१९५८ दिनांके) स्थापिते तस्मिन् विश्वविद्यालये तत्कालपर्यन्तं तस्य विभिन्नानां **'कार्यकारिणी परिषद्'** आदि संस्थानामत्यावश्यकत्वेऽपि संघटनं नैवाक्रियत । ममागमनात्पूर्वं द्वावुपकुलपतीक्रमेण तत्रागतौ, परिस्थितिवशाच्च शीघ्रमेव ततः प्रस्थितौ । निहितस्वार्थवतामेकः प्रबलो वर्ग एव प्रायेण तत्र कारणमासीत् ।

अस्तु, सर्वमेतत्समीक्ष्य प्रदेशीयशिक्षामन्त्रिणा कुलपतिना च सह परामर्शं विधाय उक्तपरिषदादीनां नियमानुसारं संघटनस्य कार्यमेव सर्वतः प्रथमं मया गृहीतम् । घोरपरिश्रमेण, नैकविधा बाधा उत्तीर्य तत्कार्यं मया क्रमशो नियतसमयेन संपादितम् । बहूनां दृष्टौ तदतीवाश्चर्यकारिकार्यमासीत् !

अन्यासां नानाविधानामव्यवस्थानां दूरीकरणार्थमपि यथासाध्यं मया प्रयतितम् ।

तत्रत्यं सर्वं वृत्तमवलोक्याश्चर्यचकितोऽहमभवम् । उदाहरणार्थम्—विश्वविद्यालये प्राध्यापकानामपि नियुक्तयो नैव कथमपि विश्वविद्यालयीया आवश्यकता अनुसृत्याक्रियन्त । प्रायेणालोचनात्मकानुसन्धानयोग्यतायास्तेष्वभाव एवासीत् ।

तेष्वेव दिनेषु उत्तरप्रदेशीयशासनेन नियुक्त एको विश्वविद्यालयीय आयोगस्तत्तद्विश्वविद्यालयानामवस्थाया अन्वीक्षणे दत्तचित्त आसीत् । मम मित्रं न्यायाधिपतिः श्रीहरिश्चन्द्रः (I. C. S.) तस्याध्यक्ष आसीत् । तस्य मुखाद् वाराणसेय संस्कृतविश्वविद्यालयस्य तदधिकारिणां च वास्तविकीं गाथां श्रुत्वा नितरां खिन्नोऽहमभवम् । मयापि तत्र यद् दृष्टं तेन तस्य गाथायाः सर्वथा पुष्टिरेवाभूत् । आयोगाध्यक्षेण संस्कृतविश्वविद्यालयीय परिस्थितेः परिशोधनार्थं व्यक्तिगतरूपेण केचिदुपाया मां प्रति निर्दिष्टाः । तद्विषय आत्मनोऽसमर्थतां निभालयता मया स निवेदितो यन्मम मत्यनुसारं प्रदेशीय मुख्यमन्त्रिणः पुरस्तादेव त उपायाः स्थापनीया इति ।

विश्वविद्यालयीय तत्तत्समस्यानां समाधाने व्यस्तोऽप्यहं विश्वविद्यालयीय भविष्यविकासविषये नैवोपेक्षापर आसम् । तद्विषये नैका योजना आसन् मम मनसि । तासु महिलामहाविद्यालयस्य आयुर्वेदमहाविद्यालयस्य च विश्वविद्यालये स्थापनाया उद्देश्येन किंचित् कार्यमपि मया प्रारब्धमासीत् । किञ्चित्कालान्तरमायुर्वेदमहाविद्यालयस्य वस्तुतः स्थापना तस्य प्रयत्नस्याधारेणैव जातेति नैवात्र संदेहः ।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋगादिवेदचतुष्टयाधारेणार्यसभ्यताया निर्णयः कथं समीचीनः ?

श्री पं० जयदत्तशास्त्री, व्याकरणदर्शनाचार्यः, एम० ए०

अद्यत्वे वैदिकसभ्यतासंस्कृतीतिहाससम्बन्धे बहूनि खलु पुस्तकानि देशीयविदेशीयपुस्तकालयेषूपलभ्यन्ते । इतः शतद्वयवर्षपूर्वं शतत्रयवर्षपूर्वं वाऽत्र विषये कदाचिन्नासीदेकमपि पुस्तकमुपलब्धम् । एतत्तु पाश्चात्त्यैर्विद्वद्भिरितिहासलेखनस्य ग्रन्थसमीक्षणसमालोचनयोश्च योऽभिनवः पन्था आविष्कृतस्तत्परिपाटीफलमिति वेद्यम् ।

वस्तुतो देशकालविशेषरचितानां मनुष्यकृतग्रन्थानां विषये भूगोलेतिहाससमाजसंस्कृतिधर्मनीतिराजनीत्यादिदृष्ट्या देशकालपात्रालोचनप्रत्यालोचनमुचितमेव । परमेष नियमोऽपौरुषेयीणां वेदवाचां विषये कथं नाम चरितार्थः स्यात् ? यद्यपि समस्तोऽपि वेदराशिरिदानीं पुस्तकरूपे निबद्धो विद्यते, तथापि तस्य स्थितिर्ग्रन्थान्तरेभ्यः सर्वथा वैभिद्यते प्राचीनतमत्वाद्, वर्णानुपूर्वीनियतत्वात्, प्राचीनकालवदधुनापि श्रुतिनाम्ना प्रसिद्धत्वाल्लौकिकालौकिकविषयाणां याथातथ्यतो विधानसामर्थ्ययुक्तत्वादित्येवमादिभिः कारणैः । विभाव्यतां तावत्प्रेक्षापूर्वकारिभिः पाठकैर्यत् चार्वाकादीन् कांश्चिन्नास्तिकान् विहाय सर्वे खल्वपि प्राचीना भारतीया विद्वांसो मुन्यृषयः स्वप्रणीते संस्कृतवाङ्मये वेदमपौरुषेयमीश्वरनिश्श्वसितं च प्रत्यपीपदन् । तन्मते वेदाः स्वतः प्रमाणम् । किञ्च, तदधीनमेवेतरेषां मनुष्यकृतग्रन्थानां प्रामाण्याप्रामाण्यं निश्चीयते, न तु कदाचिदपरग्रन्थाधीनं क्वचिद् वेदप्रामाण्याप्रामाण्यमध्यवसीयते । एवं स्थिते वेदानुशीलने मनुष्यकृतग्रन्थानुशीलनवद् दृष्टिर्नतरां प्रशस्यते युज्यते वा । यदि कश्चिद्दीपकमादित्यं च तुल्यगुणतया तुल्यशक्तितया वा वर्णयेद्, यथा तद्वर्णनमश्रद्धेयं स्यात्तद्वद्वेद-वेदेतरग्रन्थसाम्यवर्णनं खल्वपि ।

अत्र केचिदेवं प्रत्यवस्थातुमर्हन्ति--"ननु यैर्वैदेशिकैर्भारतीयैर्वा संस्कृतभाषाया गूढमध्ययनं नाकारि न च साङ्गोपाङ्गवेदो यथाविधि समध्यगायि, कथं नाम ते वराका वेदमपौरुषेयं मन्येरन्? ग्रन्थान्तरवद् वेदमपि मानवकृतिं मन्वानास्ते वेदस्य परम्परीणार्थमवगन्तुं प्रतिपादयितुं वा कुतः समर्थाः स्युः ? न च प्राचीनकालादद्यपर्यन्तं गुरुशिष्यपरम्परयाऽधीतवेदानां भारतीयविदुषामिव वेदविषयेऽपौरुषेयत्वमान्यता तेषां कृते युक्ता भवितुमर्हति विशेषतोऽस्मिन् विज्ञान-विकासवादात्मके युगे । अत एव भट्टमैक्षमूलरमैकडानलमोनियरविलियमविलसनपीटर्सनप्रभृतिभिर्यूरोपवासिभिस्तदनुगामिभिरेतद्देशीयैश्च विद्वद्भिर्यच्च यादृशं च वेदविषये निगदितं प्रतिपादितं वा, तत्सर्वं समीचीनं कुतो न मन्तव्यं सर्वैः पक्षपातरहितैर्विचक्षणैरिति ।"

अत्र ब्रूमः । 'नैष स्थाणोरपराधो यदेनमन्धो न पश्यति पुरुषापराधः स भवति' इति न्यायान्नैष वेदस्यापराधो यदेनं मन्दधीर्न बुध्यते । यदि तत्रभवन्तो मैक्षमूलरादयोऽन्यथा वेदं व्याख्यातवन्तोऽवास्तविकं चार्थं तस्य कृतवन्तस्तर्हि तदीयानृतभाषितलिखितस्य खण्डनमसत्यत्वख्यापनं वा वेदज्ञैर्भारतीयपंडितैः सुदृढं सोत्साहं च कर्त्तव्यमेव । यदि वा क्वचित् किञ्चित् सत्यं तद्रचितेषु ग्रन्थेषु स्यात्तर्हि तस्य सहर्षं समर्थनमपि कर्त्तव्यम् । परं नहि कदापि तेषामयथार्थभणितीनामङ्गीकारान्धानुकारेणातिकोमलबुद्धयो बालकाः सामान्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्रैव तत्कालं निवसता मया सहसा उत्तर-प्रदेशीय राज्यपाल महोदयात् २४।४।१९६१ ई० दिनांकस्य तडित्सदेशो लब्धो यदहं वाराणसेय संस्कृतविश्वविद्यालयस्योपकुलपतित्वेन न्ययुज्य इति ।

तं समाचारं लब्ध्वा किञ्चिदाश्चर्यचकितोऽहम् १।५।१९६१दिनांके कार्यभारं ग्रहीस्यामीति तडित्संदेशेनैव राज्यपालादीन् विज्ञाप्य ३०।४।१९६१ दिनांक एव ततः प्रस्थानं कृत्वा १।५।१९६१ दिनांके वाराणसीं प्राप्य तत्र तस्मिन्नेव दिनांके सविधि तत्पदभारमगृह्णाम् ।

अध्यापकमहोदयैश्छात्रवृन्दैरन्यैश्च कृतानां सोत्साहमौपचारिकस्वागताद्यभिनन्दनकृत्यानामनन्तरं विश्वविद्यालयस्य वास्तविकपरिस्थितेरध्ययने प्रवृत्तोऽहमभवम् । कतिचिद्दिवसानन्तरं मया ज्ञातं यत्तत्रत्या स्थितिर्नैव संतोषावहा । १९५८ ई० वर्षस्य प्रारम्भे (१०।४।१९५८ दिनांके) स्थापिते तस्मिन् विश्वविद्यालये तत्काल-पर्यन्तं तस्य विभिन्नानां **'कार्यकारिणी परिषद्'** आदि संस्थानामत्यावश्यकत्वेऽपि संघटनं नैवाक्रियत । ममागमनात्पूर्वं द्वावुपकुलपतीक्रमेण तत्रागतौ, परिस्थितिवशाच्च शीघ्रमेव ततः प्रस्थितौ । निहितस्वार्थवतामेकः प्रबलो वर्ग एव प्रायेण तत्र कारणमासीत् ।

अस्तु, सर्वमेतत्समीक्ष्य प्रदेशीयशिक्षामन्त्रिणा कुलपतिना च सह परामर्शं विधाय उक्तपरिषदादीनां नियमानुसारं संघटनस्य कार्यमेव सर्वतः प्रथमं मया गृहीतम् । घोरपरिश्रमेण, नैकविधा बाधा उत्तीर्य तत्कार्यं मया क्रमशो नियतसमयेन संपादितम् । बहूनां दृष्टौ तदतीवाश्चर्यकारिकार्यमासीत् !

अन्यासां नानाविधानामव्यवस्थानां दूरीकरणार्थमपि यथासाध्यं मया प्रयतितम् ।

तत्रत्यं सर्वं वृत्तमवलोक्याश्चर्यचकितोऽहमभवम् । उदाहरणार्थम्—विश्वविद्यालये प्राध्यापकानामपि नियुक्तयो नैव कथमपि विश्वविद्यालयीया आवश्यकता अनुसृत्याक्रियन्त । प्रायेणालोचनात्मकानुसन्धानयोग्यतायास्तेष्वभाव एवासीत् ।

तेष्वेव दिनेषु उत्तरप्रदेशीयशासनेन नियुक्त एको विश्वविद्यालयीय आयोगस्तत्तद्विश्वविद्यालयानामवस्थाया अन्वीक्षणे दत्तचित्त आसीत् । मम मित्रं न्यायाधिपतिः श्रीहरिश्चन्द्रः (I. C. S.) तस्याध्यक्ष आसीत् । तस्य मुखाद् वाराणसेय संस्कृतविश्वविद्यालयस्य तदधिकारिणां च वास्तविकीं गाथां श्रुत्वा नितरां खिन्नोऽहमभवम् । मयापि तत्र यद् दृष्टं तेन तस्या गाथायाः सर्वथा पुष्टिरेवाभूत् । आयोगाध्यक्षेण संस्कृतविश्वविद्यालयीय परिस्थितेः परिशोधनार्थं व्यक्तिगतरूपेण केचिदुपाया मां प्रति निर्दिष्टाः। तद्विषय आत्मनोऽसमर्थतां निभालयता मया स निवेदितो यन्मम मत्यनुसारं प्रदेशीय मुख्यमन्त्रिणः पुरस्तादेव त उपायाः स्थापनीया इति ।

विश्वविद्यालयीय तत्तत्समस्यानां समाधाने-व्यस्तोऽप्यहं विश्वविद्यालयीय भविष्यविकास-विषये नैवोपेक्षापर आसम् । तद्विषये नैका योजना आसन् मम मनसि । तासु महिलामहाविद्यालयस्य आयुर्वेदमहाविद्यालयस्य च विश्वविद्यालये स्थापनाया उद्देश्येन किंचित् कार्यमपि मया प्रारब्धमासीत् । किञ्चित्कालान्तरमायुर्वेदमहाविद्यालयस्य वस्तुतः स्थापना तस्य प्रयत्नस्याधारेणैव जातेति नैवात्र संदेहः ।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋगादिवेदचतुष्टयाधारेणार्यसभ्यताया निर्णयः कथं समीचीनः ?

श्री पं० जयदत्तशास्त्री, व्याकरणदर्शनाचार्यः, एम० ए०

अद्यत्वे वैदिकसभ्यतासंस्कृतीतिहाससम्बन्धे बहूनि खलु पुस्तकानि देशीयविदेशीयपुस्तकालयेषूपलभ्यन्ते । इतः शतद्वयवर्षपूर्वं शतत्रयवर्षपूर्वं वाऽत्र विषये कदाचिन्नासीदेकमपि पुस्तकमुपलब्धम्। एतत्तु पाश्चात्त्यैर्विद्वद्भिरितिहासलेखनस्य ग्रन्थसमीक्षणसमालोचनयोश्च योऽभिनवः पन्था आविष्कृतस्तत्परिपाटीफलमिति वेद्यम् ।

वस्तुतो देशकालविशेषरचितानां मनुष्यकृतग्रन्थानां विषये भूगोलेतिहाससमाजसंस्कृतिधर्मनीतिराजनीत्यादिदृष्ट्या देशकालपात्रालोचनप्रत्यालोचनमुचितमेव । परमेष नियमोऽपौरुषेयीणां वेदवाचां विषये कथं नाम चरितार्थः स्यात् ? यद्यपि समस्तोऽपि वेदराशिरिदानीं पुस्तकरूपे निबद्धो विद्यते, तथापि तस्य स्थितिर्ग्रन्थान्तरेभ्यः सर्वथा बेभिद्यते प्राचीनतमत्वाद्, वर्णानुपूर्वीनियतत्वात्, प्राचीनकालवदधुनापि श्रुतिनाम्ना प्रसिद्धत्वाल्लौकिकालौकिकविषयाणां याथातथ्यतो विधानसामर्थ्ययुक्तत्वादित्येवमादिभिः कारणैः । विभाव्यतां तावत्प्रेक्षापूर्वकारिभिः पाठकैर्यत् चार्वाकादीन् कांश्चिन्नास्तिकान् विहाय सर्वे खल्वपि प्राचीना भारतीया विद्वांसो मुन्यृषयः स्वप्रणीते संस्कृतवाङ्मये वेदमपौरुषेयमीश्वरनिश्श्वसितं च प्रत्यपीपदन् । तन्मते वेदाः स्वतः प्रमाणम् । किञ्च, तदधीनमेवेतरेषां मनुष्यकृतग्रन्थानां प्रामाण्याप्रामाण्यं निश्चीयते, न तु कदाचिदपरग्रन्थाधीनं क्वचिद् वेदप्रामाण्याप्रामाण्यमध्यवसीयते । एवं स्थिते वेदानुशीलने मनुष्यकृतग्रन्थानुशीलनवद् दृष्टिर्नतरां प्रशस्यते युज्यते वा । यदि कश्चिद्दीपकमादित्यं च तुल्यगुणतया तुल्यशक्तितया वा वर्णयेद्, यथा तद्वर्णनमश्रद्धेयं स्यात्तद्वद्वेद-वेदेतरग्रन्थसाम्यवर्णनं खल्वपि ।

अत्र केचिदेवं प्रत्यवस्थातुमर्हन्ति--"ननु यैर्वैदेशिकैर्भारतीयैर्वा संस्कृतभाषाया गूढमध्ययनं नाकारि न च साङ्गोपाङ्गवेदो यथाविधि समध्यगायि, कथं नाम ते वराका वेदमपौरुषेयं मन्येरन्? ग्रन्थान्तरवद् वेदमपि मानवकृतिं मन्वानास्ते वेदस्य परम्परीणार्थमवगन्तुं प्रतिपादयितुं वा कुतः समर्थाः स्युः ? न च प्राचीनकालादद्यपर्यन्तं गुरुशिष्यपरम्परयाऽधीतवेदानां भारतीयविदुषामिव वेदविषयेऽपौरुषेयत्वमान्यता तेषां कृते युक्ता भवितुमर्हति विशेषतोऽस्मिन् विज्ञान-विकासवादात्मके युगे । अत एव भट्टमैक्षमूलरमैकडानलमोनियरविलियमविलसनपीटर्सनप्रभृतिभिर्यूरोपवासिभिस्तदनुगामिभिरेतद्देशीयैश्च विद्वद्भिर्यच्च यादृशं च वेदविषये निगदितं प्रतिपादितं वा, तत्सर्वं समीचीनं कुतो न मन्तव्यं सर्वैः पक्षपातरहितैर्विचक्षणैरिति ।"

अत्र ब्रूमः । 'नैष स्थाणोरपराधो यदेनमन्धो न पश्यति पुरुषापराधः स भवति' इति न्यायान्नैष वेदस्यापराधो यदेनं मन्दधीर्न बुध्यते । यदि तत्रभवन्तो मैक्षमूलरादयोऽन्यथा वेदं व्याख्यातवन्तोऽवास्तविकं चार्थं तस्य कृतवन्तस्तर्हि तदीयानृतभाषितलिखितस्य खण्डनमसत्यत्वख्यापनं वा वेदज्ञैर्भारतीयपंडितैः सुदृढं सोत्साहं च कर्त्तव्यमेव । यदि वा क्वचित् किञ्चित् सत्यं तद्रचितेषु ग्रन्थेषु स्यात्तर्हि तस्य सहर्षं समर्थनमपि कर्त्तव्यम् । परं नहि कदापि तेषामयथार्थभणितीनामङ्गीकारान्धानुकारेणातिकोमलबुद्धयो बालकाः सामान्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जना वा विपथगामिनो विधातव्या । पश्यन्तु चक्षुषी समुन्मील्य विद्वांसो महानुभावा मैक्षमूलर-महाशयस्य वेदविषयकं वदतोव्याघातदोषमेकम् । स हि दिवेदाजेत्याख्ये स्वरचितग्रन्थे वेदभाषाया दुरूहतामेकतोऽङ्गीकरोत्यन्यतस्तत्रैव१ वेदान् बाल-धीतुल्यान् भणित्वा निन्दति, पुनश्च वेदेऽमूल्य-रत्नावस्थितिं समर्थयते२। इत्येवं तदुक्तमस्पष्टं, परस्परविरुद्धं प्रमत्तप्रलपितमिव वाऽऽभाति। किं न, सत्यां दुरधिगम्यायां वैदिक्यां भाषायां येषां मन्त्राणां येषां पदानां वाऽर्थस्तात्पर्यं वा स्फुटं नास्ति तेषां विषये मौनावलम्बनं निजानभिज्ञताप्रकाशनं वा स्पष्टतश्चेत्क्रीयते तैः समीक्षकैः ? एतादृशेषु स्थलेषु किं 'चाइल्डिशे' ति शब्द प्रयोगः समुचितः? कदापि नहीति वक्तुं सुशकम् । अस्मन्मते तु वेदेषु सत्यविद्यावर्त्तमानतामन्तःकरणेन स्वीकरोत्येव मैक्षमूलरमहाशयः, किन्तु यत्रार्थं स्फुटं न पश्यति तत्र मन्त्रं मन्त्रदृशमृषिं वा तादृशापशब्दैर्गर्हयते । यदि नाम तद्दृष्टौ वेदेषु मानवोपयोगिज्ञानविज्ञानं न विद्येत, नतरां तदीयहृदयं वेदामृतोदधौ स्नातु-मिच्छेद् यस्य सङ्केतस्तदीयग्रन्थे समुपलभ्यते।३

एवं वेदार्थविबोधनालोडनाय सश्रद्धं प्रवर्त्तमाना:, खल्वष्यमी यूरोपमहाद्वीपीया विद्वांसो यत्र तत्र भ्रान्तिमापन्नाः, विरुद्धार्थमसत्यं वा भाषितवन्तः। उदाहरणान्तरं प्रस्तूयते । श्रीमैक्षमूलरो मोनियरवि-लियमश्च वेदेषु विशेषत ऋग्वेदे पुनर्जन्मविषयाभावं प्रख्यापयतः।४ परमेतत्तयोरज्ञानविजृम्भितमेव। यतो ह्यृग्वेदस्य वक्ष्यमाणमन्त्रेषु पुनर्जन्मविषयः स्फुटमस्ति प्रतिपादितः। तद्यथा:--

अग्नेर्वयं प्रथमस्यामृतानां मनामहे
चारु देवस्य नाम।
स नो मह्या अदितये पुनर्दात्
पितरं च दृशेयं मातरं च ॥
(ऋ० १।२४।२)

असुनीते पुनरस्मासु चक्षुः पुनः
प्राणमिह नो धेहि भोगम् ।
ज्योक् पश्येम सूर्यमुच्चरन्तमनुमते
मृलया नः स्वस्ति ॥
पुनर्नो असुं पृथिवी ददातु
पुनर्द्यौर्देवी पुनरन्तरिक्षम् ।
पुनर्नः सोमस्तन्वं ददातु पुनः
पूषा पथ्यां४ या स्वस्ति ॥
(ऋ० १०।५९।६-७)

---

1 Besides, their language is so difficult that, as yet, it makes a satisfactory translation of the whole Veda a perfect impossibility. (The Vedas, Page 49).

2 "Large numbers of the Vedic hymns are childish in the extreme; tedious, low, commonplace. . . . But hidden in this rubbish there are precious stones" (Page—26, ibid).

3 "The only excuse I am placed is that my own friends in England and in Germany have so often wondered how I could have fallen in love with the Veda, and actually left my own country in order to rescue this forgotten Bible from utter oblivion. It is fortunate that people have different tastes and that we are not all devoted to the same beauty. . . . All I care for is to make others understand how my heart was caught, and what I saw in my Indian love, not only in her vedantic dreams and aspirations, but in the simplicity of her earliest utterances of trust in powers, invisible, yet present behind what is possible, and in her faith in a law that rules both the natural and supernatural world" (Page 80-81, ibid)

4 (a) "In conclusion, let me tell you that there is in the Veda no trace of metampsychoses or that transmigration of Souls from human to animal bodies,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्येवमेव यजुर्वेदेऽथर्ववेदे चायं विषयो वर्णितः। जिज्ञासुभिरधिकमत्र विषये श्रीदयानन्दर्षिविरचिताया ऋग्वेदादिभाष्यभूमिकाया सम्बद्धप्रकरणं द्रष्टव्यम् ।

भारते क्रीश्चीनमतं प्रचारयितुं प्रसारयितुं च कामयमाना आंग्लदेशीयाः शासकाः शिक्षकाद्याश्च भारतस्य प्राचीनसंस्कृतीतिहासं दूषयितुं किं किं नाकार्षुरित्यपि दृष्टव्यार्हं विद्यते५। ते खलु वेदस्य व्याख्याशैलीमजानन्त ऐतिहासिक-भौगोलिक-सामाजिकराजनीतिकादितत्त्वानि वेदेषु यथा तथाऽऽपाततो दृष्ट्वा वर्णयन्ति । वेदभाष्यकारस्य तत्रभवतः सायणाचार्यस्य सरणिमनुगच्छन्तः समयविशेषोत्पन्नानां राज्ञामितरमानवानामृषीणां चेतिहासं ससाहसं वेदेषु प्रतिपादयन्ति । "वेदा इतः विचतुस्सहस्रवर्षेभ्यः पूर्वं मध्यैशियातो भारतमनुप्रविष्टैरार्यैः सिन्धुनदप्रदेशे रचिताः । अतः स्वीयधर्मसंस्कृतिराज्यकृषिवाणिज्यकलाकृतीनामितिहास एव तैर्वेदेषु लिखितः" इति पाश्चात्त्यविदुषां मान्यता विद्यते । तेषां पदचिह्नानि स्वादर्शभूतानीव मन्यमाना बहवो भारतीया विद्वांस खल्वपि तदुक्तमेव परिपोषयन्ति । तदेतद्दुर्भाग्यं देशस्य। सत्यस्य यत्रापलापः प्रच्छादनं वा स्यात् स ग्रन्थो न कदापि विद्यालयेषु विश्वविद्यालयेषु वाऽऽदर्शरूपेण प्रपाठनीय इत्येव नोऽनुरोधः। परं हा हन्त ! तथाकथितविकासवादेन चकिता न पश्यन्ति सत्यतालेशमपि प्राचीनग्रन्थेषु । क्व महान् वेदज्ञो यास्काचार्यो वेदविद्यागाम्भीर्यं प्रतिपिपादयिषया आह–"न ह्येषु प्रत्यक्षमस्त्यनृषेरतपसो वा पारोवर्य्यवित्सु तु खलु वेदितृषु भूयोविद्यः प्रशस्यो भवति · · ·

---

which is generally supposed to be a distinguising feature of Indian religion. Instead of this, we find what is really the sine-qna-non of all religion, a belief in immortality, and in personal immortality." (The Vedas, Page 40)

B "यह विश्वसनीय रूप से निश्चित प्रतीत होता है कि पुनर्जन्म का सिद्धान्त वेद के मन्त्र भाग में कोई स्थान नहीं रखता।" (मोनियर बिलियम कृत Indian Wisdom का डा० रा. कु. राय कृत अनुवाद भारतीय प्रज्ञा, पृष्ठ १५) "तथापि पुनर्जन्म का सिद्धान्त मन्त्रों के रचनाकाल में हिन्दू मस्तिष्क में स्थान पाता हुआ नहीं प्रतीत होता । कम से कम ऋग्वेद में इसका कोई उल्लेख नहीं दिखाई पड़ता ।"

(भारतीय प्रज्ञा पृष्ठ ६६, टिप्पणी १)

5 "No one who has not examined patiently and honestly the other religions, of the world, can know what christianity really is, or can join with such truth and sincerity in the words of St. Paul"—I am not ashamed of the Gospel of christ."

(The Vedas, Page 42).

"हमें यह नहीं भूलना चाहिये कि यह विशाल पूर्वीय साम्राज्य हमारे शासन में राजनीतिक तथा सामाजिक प्रयोगों का स्थान होने के लिये, अथवा अपना व्यापार बढ़ाने, अपने को गर्वान्वित अनुभव करने या अपना सम्मान कराने के प्रयोजन के लिए नहीं सौंपा गया है, अपितु इसलिये कि एक विस्तृत जनसंख्या, अनुरंजित, लाभान्वित एवम् उत्थापित की जा सके और ईसाई धर्म के पुनरुद्धारक प्रभाव का इस देश में सर्वत्र प्रसार किया जा सके।"

(भारतीय प्रज्ञा, प्रथम संस्करणामुख, पृष्ठ १)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्माद् यदेव किं चानूचानोऽभ्यूहत्यार्षं तद्भवति।६" इति क्व चैते वयं येऽनधिकारश्चेष्टितं कृत्वा यद्वा तद्वा वेदसम्बन्धे जल्पामः। इन्द्रवृत्रयोर्युद्धस्योदाहरणमत्रोपस्थाप्यते। तौ द्वावैतिहासिकप्राणिविशेषौ न स्तः, किं तर्हि सूर्यमेघौ, सूर्यस्याकर्षणविकर्षणशक्त्या वायुसाहाय्येन सूर्यप्रकाशावरकस्य वृत्राख्यस्य मेघस्य छेदनभेदनं भवति। अयमेवेन्द्रस्य मरुत्सखस्य वृत्रवधो "अपां बिलमपिहितं यदासीद् वृत्रं जघन्वां अपतद्ववार" (ऋग्वेदः १।३२।११) इत्याद्यृक्षु वर्ण्यते। अलंकृतशैल्यां युद्धस्येव वर्णनं तत्र सुतरां सङ्गच्छते। यथाह निरुक्तकारः--"तत्को वृत्रो मेघ इति नैरुक्तास्त्वाष्ट्रोऽसुर इत्यैतिहासिका अपां च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते, तत्रोपमार्थेन युद्धवर्णा भवन्तीति" (निरुक्तम् २।५।१६)। शतपथब्राह्मणेऽपि तथैव व्याख्यातम् 'वृत्रो ह वा ऽइदँ् सर्वं वृत्वा शिश्ये। यदिदमन्तरेण द्यावापृथिवी। स यदिदँ् सर्वं वृत्वा शिश्ये तस्माद् वृत्रो नाम। तमिन्द्रो जघान। स हतः पूतिः सर्वत एवापोभिसुस्राव।" (श० ब्रा० १।१।३।४) इति किञ्च, 'अहन् वृत्रं वृत्रतरं व्यंसमिन्द्रो वज्रेण महता वधेन' (ऋ० वे० १।३२।५) इत्यत्र मन्त्रे वृत्रशब्दात् परं तरप्प्रत्ययोगो वैदिकशब्दानां रूढित्वं निषेधति, यौगिकत्वं च प्रकटयति। वाह् वृच्यवेदेऽनेकसूक्तेषु संवादाख्यानान्यलंकृतशैल्यां निगदितानि सन्ति। तद्यथा--उर्वशीपुरूरवयोः (१०।९५), यमीयमयोः (१०।१०), अश्विनोः (१।१८०), इन्द्रवसिष्ठयोः, सुदासदाशराज्ञवर्णनं च (७।३३), तुर्वशयदुदिवोदासयोः, सूर्यासोमयोः (१०।८५), लोपामुद्राऽगस्त्ययोः (१।१७९), इन्द्राणीवृषाकप्योः (१०।८६), श्यावाश्वरथवीत्योः (५।६१) इत्येवमादीनि। इतिहासप्रियास्तु सर्वत्रैतादृशेषु स्थलेषु तन्नामकव्यक्तिविशेषस्यर्ग्वेदप्रणयनकालसम्भूतस्य वर्णनं प्रतिपाद्य पुस्तकानि लिखन्ति। निदर्शनं चात्र 'हिन्दूसभ्यता' ख्यस्य ग्रन्थस्य७ 'भारत में आर्य; ऋग्वेदीय सभ्यते' त्याख्यं प्रकरणमेव पर्याप्तम्। तत्र हि षडशीतितमे पृष्ठे गंगायमुनासरस्वतीकुभाक्रुमुगोमतीसुवास्तुसिन्धुवितस्ताऽसिक्नीपरुष्णीविपाट्छुतुद्रीनां वेदोक्तानां नदीनां नामसाम्यभ्रान्त्या भारतवर्षस्योत्तरपश्चिमस्थनदीनां नामानीमानीत्युक्त्वा ऋग्वेदकालिकभारतस्य भौगोलिकसीमानिर्धारणं खल्वपि कृतम्। परं किं सत्यमेतद्? वस्तुत इमानि गंगादिनामान्यपि नैरुक्तप्रणाल्या यौगिकार्थानि सन्ति८ तत्तद्गुणविशिष्टनद्यादीनामभिधायकानि वा विद्यन्ते, न तु वर्त्तमानानां गंगायमुनादिनदीनां नामानि। एतद्विषये वेदज्ञवर्यस्य तत्रभवतो बुद्धदेव विद्यालंकारस्य व्याख्यानानि, लिखितसाहित्यं वा पठनार्हं विद्यते यत्र पूर्वोक्तैतिहासिकमतस्य सप्रमाणं खण्डनं निहितं विद्यते। अपि च,

सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक्।
वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे ॥
(मनुस्मृतिः १।२१)।

इतिमनूक्तप्रामाण्याल्लौकिकैर्वस्तूनां नामानि वेदेभ्यो गृहीत्वा कृतानि, क्रियन्ते, करिष्यन्ते च। यत्र क्वचनाख्यानानि वेदेषु दृश्यन्ते, तान्यपि निरुक्तब्राह्मणादिसरण्या व्याख्येयानि तदेव तद्व्याख्यानं प्रमाणं भवितुमर्हति नान्यथा।

---

६ निरुक्तपरिशिष्टम् १।६।

७ डा० राधाकुमुदमुखर्जीकृतं Hindu Civilization इति नामकस्य ग्रन्थस्य डा० वासुदेवशरणाग्रवालकृत राष्ट्रभाषानुवादस्य।

८ 'गंगागमनाद् यमुना प्रयुवति गच्छतीति वेत्यादि' (निरुक्तम् दै० का० ३।३।२६।४)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'ऋषेर्दृष्टार्थस्य प्रीतिर्भवत्याख्यानसंयुक्तेति निरुक्तकारोक्त्या व्याख्याने आख्यानमुखेन मन्त्रार्थकरणं कृतार्थसाक्षात्काराणाम् ऋषीणां कृते न दोषाय भवति। विद्वांसो वेदज्ञा प्राचीनर्षिपरम्परया वेदान् अनित्यत्वामानवकृतत्वदोषरहितान् मन्वाना नित्येष्वेवार्थेषु मन्त्रानभिप्रयन्ति 'नैगमरूढिभवं हि सुसाधु, नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम्' इति महाभाष्यकारोक्त्या (म०भा० ३।३।१) रूढ्यर्थो हि वेदेषु नैवाभिमतः प्राचीनर्षीणामित्यलं बहूक्तेन।

पाश्चात्यविद्वांसः साटोपं घोषयन्ति 'ऋग्वेदरचनाकालात् पूर्वमार्यामध्यैशियातो भारतमनुप्रविष्टाः' इति। परमेतत् कथनमपि सर्वथाऽप्रमाणमस्ति। तेषां कपोलकल्पितमेवास्ति केवलम्। आर्यसभ्यतायाः प्राचीनचिन्हाणि यद् यूरोपे एशियामहाद्वीपे वोपलभ्यन्ते तस्य नायमर्थो यन्मूलत आर्यास्तेषु प्रदेशेषु न्यवसन्। नैव क्वचिदपि वैदिकवाङ्मये, संस्कृतवाङ्मये वा वर्णितं यदार्याः भारते बाह्यदेशेभ्य आगताः। प्रत्युत ब्रह्मावर्त्तार्यावर्त्तादिनाम्ना भारतस्य विशिष्टप्रदेश एवार्याणां मूलनिवास इति प्रमाणयन्ति पुरातनविद्वांसः। यदा काले काले दिग्विजयार्थम् आर्या बाह्यदेशेष्वगच्छन् तदा तत्रापि निवासं चक्रुरिति तथ्यमस्ति वास्तविकम्। अस्मदाश्चर्यं चिन्ता च तदा वर्धते यदैतत् स्वीकुर्वन्तोपीतिहासकारा यद् ऋग्वेदे आर्याणामागमनस्य वर्णनं नास्तीति, पुनर्वदन्ति यत्ते बाह्यदेशेभ्यो भारतभुवं प्रविष्टाः९ इति। तदेतत् परस्परविरुद्धोक्ततया प्रमत्तगीतवदप्रमाणमेवेति ज्ञेयम्।

वस्तुतो वेदेषु ज्ञानकर्मोपासनाविज्ञानभेदेन बह्व्यो विद्याः वर्णिताः सन्ति। तासां प्राप्तये, तदनुसारेण कुटुम्ब-समाज-जनपद-राष्ट्रियस्तरेषु च यदा आर्या अवर्तन्त, वर्त्तन्ते, वर्तिष्यन्ते वा स कालो वेदमर्यादाऽनुसारो भवितुमर्हति। नित्येषु वेदेषु अनित्येतिहासभौगोलिकसीमादिवर्णनं नैव सङ्गच्छते। देवस्तुतिर्वा स्यादाख्यानं वा, सृष्टिवर्णनं वा स्यात् प्रकृतिवर्णनं वा संवादो वा स्यात् कर्त्तव्योपदेशो वा सर्वं चैतद् वैदिकमर्यादानुसारेण व्याख्यातव्यं न तु कामकारेण। यदि हि वेदा अलौकिका ईश्वरनिश्श्वसिता वा न स्युस्तदा तेषां लोकभिन्नत्व--(लोके वेदे चेत्यादि१०) व्यवहारो न स्यात्। अपि च मानवकृतिषु यथा सामयिक-राजनीतिकसामाजिकादिवर्णनानि दरीदृश्यन्ते तद्वन्न वेदेषु। नित्यानुपूर्वीकतयैष वेदनित्यत्वं सिद्धं किं तर्कान्तरेण। तस्मादृग्वेदकाले भारतीया एवमुषितवन्त एवं वा व्यवाहार्षुः, यजुर्वेदकाले एवम्, सामवेदकाले एवम्, अथर्ववेदकाले चैवमित्यादि कथनं पाश्चात्यानां तदुच्छिष्टभोजिनां भारतीयानां च मिथ्येति मन्तव्यं विचक्षणैरिति शमोऽम्।

---

९ **आर्यों के मूल के विषय में ऋग्वेद की साक्षी**—भारत का इतिहास एक प्रकार से इस देश में आर्यों का इतिहास है। "उसका आरम्भ आर्यों के भारत में आगमन से होता है।" उसका सबसे प्राचीन स्रोत 'ऋग्वेद संहिता' है, जो न केवल भारतीय आर्यों का बल्कि समस्त आर्य जाति का सबसे प्राचीन ग्रन्थ है। (हिन्दू सभ्यता, पंचम संस्करण, पृष्ठ ८२) "ऋग्वेद में सभ्यता का ऊंचा स्तर स्वयम् ऋग्वेद में आर्यों के इस आगमन के विषय में एक भी शब्द नहीं है।" उसमें स्थान विशेष में बसे हुए जन, व्यवस्थित समाज और पूर्ण उन्नत सभ्यता का वर्णन है।

(वही, पृष्ठ ८६)

१० महाभाष्ये पस्पशान्हिकम्। —

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीय टिप्पण्यः

श्री भगवद्दत्तो वेदालंकारः

सुसम्पन्नं कुम्भमेला पर्व

अस्मिन्वारे हरिद्वारीय कुम्भमेलापर्व सर्वतः सुसम्पन्नमभूदिति साधुवादार्हाः प्रबन्धकमहोदयाः सर्वकारश्च । पञ्चाशल्लक्षाधिके जनसम्मर्देऽल्पीयसी दुर्घटना नगण्या भवति । परमस्मन्मते स्वास्थ्यक्षेत्रं ज्वालापुरं गुरुकुलं च यावत् यद्यभविष्यत् तत् समीचीनमभविष्यत् । यतः पश्चाद् भाविरोगजातं मक्षिकामशकादिकीटबाहुल्यं च परितः बहुकालपर्यन्तं स्वप्रभावं जनयतः ।

गुरुकुलोत्सवः

गुरुकुलोत्सवोऽपि श्री डा० रामनाथवेदालंकारस्याचार्यत्वे कार्यवाहककुलपतित्वे च शान्तवातावरणे सम्यक् समाप्तिमगात् । दिनत्रयं यावत् उत्सवः समजनि । नैकेषां विदुषां व्याख्यानानि नैकानि च सम्मेलनान्यपि जातानि । दीक्षान्तभाषणं श्री स्वामिब्रह्ममुनिमहोदयानामजायत । सर्वे विजानन्त्येव यत् गुरुकुलस्य स्वामिन्याः सभायाः पञ्जाबप्रान्तीयार्यप्रतिनिधिसभायाः निर्वाचनानन्तरं सदस्येषु परिवर्तनं जातम् । तेषां मिथः वार्तालापेन भाषणादिना चानुमीयते यत् गुरुकुलोन्नत्यै तेषां मनसि दृढ़संकल्पो विद्यते । तत् सर्वं भविष्यगर्भे सन्निहितमिति ।

भारतीय युवशक्तिधारायास्तटभङ्गः

भारतीययुवशक्तिधाराया आपूरः प्रबलोत्साहेन स्वमर्यादातटभङ्गं विधाय सर्वकारं तथान्यानपि पूंजीपतीन् निमज्जयितुं प्रवृत्त इति प्रतीयते । अत्र बुभुक्षा, भ्रष्टाचारो वृत्तीनामभावस्तथान्येऽपि बहवो हेतवः सन्ति । पूर्वं गुजरातप्रदेशेऽधुना विहारभागे युवशक्तीनां विक्षोभः श्रूयते । शनैः-शनैरन्येषु प्रदेशेष्वपि सम्भाव्यते । अनेनैतत् तु सुनिश्चितं यत् देशेऽस्मिन् सर्वेषां शासकानां प्रजानां च विचारेषु कार्यव्यवहारेषु महत् परिवर्तनमपेक्ष्यते । भूतं भव्यं च कालं सम्यङ् मनसि निधाय नेतृवर्गैः पूंजीपतिभिश्च तत् परिवर्तनं सद्यः कर्तव्यम् लोभाधिक्यं तु अतीवविनाशकरं भवति । तृष्णाया अन्तस्तु न केनापि दृष्टः । अतः सन्तोषादनुत्तमः सुखलाभः सूक्तिरेषा सदा जप्या । यथा जलधारायाः प्रवाहः प्रोच्छलदुत्तालतरंगवीचिमयः सर्वान् मार्गपतितान् वृक्षादीन् साध्वसाधूंश्चोत्पाट्य प्रवाहयति । एवमेव मनोधाराया आपूरोऽपि सर्वान् विनाशयति । तत्र भद्राभद्रयो विवेको विलुप्यते । धर्मोपदेशाः व्यर्थतां यान्ति नैतिकतां न कोऽपि गणयति । तत्र दण्डोऽप्यदण्डायते । अराजकतायाः स्थितिः सम्पद्यते । अतः सर्वैर्नेतृवर्गैः देशस्य शुभेच्छुभिश्च विचारणीयं तथा युगानुरूपं च परिवर्तनं विधातव्यम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साहित्य समीक्षा

मंत्रों के ऋषि

लेखक—श्री स्वामी ब्रह्ममुनि जी महाराज । प्रकाशक तथा पुस्तकप्राप्तिस्थान—आर्य साहित्य मण्डल, अजमेर । मूल्य ७० पैसे ।

यह पुस्तक ब्रह्ममुनिग्रन्थमाला का ७४वां पुष्प है । वेदों के मन्त्रों, सूक्तों और अध्यायों पर ऋषि लिखे रहते हैं । ये ऋषि मन्त्रों के कर्ता हैं या द्रष्टा इस सम्बन्ध में विद्वानों में बड़ा मतभेद है । ऐतिहासिक दृष्टिकोण वाले भारतीय व पाश्चात्य विद्वान् ऋषियों को मन्त्रों का कर्ता मानते हैं और वेदों में प्रागैतिहासिक घटनाओं व वर्णनों का दिग्दर्शन कराते हैं । आर्यसमाज वेदों को अपौरुषेय मानता है । अतः आर्यसमाजी विद्वानों ने अपने पक्ष की पुष्टि के लिए लेख व ग्रन्थ लिखे । पर इन सबमें सर्वोत्कृष्ट दृष्टिकोण स्वामी जी महाराज का है । यह पुस्तिका लेखकविरचित 'वेद में इतिहास नहीं' पुस्तक की भूमिका का पुष्पित व पल्लवित रूप है ।

इनकी ऋषि-मीमांसा से यह सिद्ध है कि ऋषि मन्त्रों के कर्ता नहीं और न ऐतिहासिक वंशज रूढ़िनाम हैं किन्तु योगवशात् योग्यता प्राप्त यौगिक एवं उपाधिवाचक नाम हैं ।

स्वामी जी महाराज के ऋषिविवेचन पर स्व० स्वामी वेदानन्द तीर्थ जी ने लिखा था कि—पुस्तक के विचार अधिकतर मौलिक और अनूठे हैं । ऋषि निर्वचन प्रसंग में कई वाद सर्वथा नये और अपूर्व हैं । इसी प्रकार अन्य विद्वानों ने भी इनके दृष्टिकोण को सराहा था । यह पुस्तक वेदप्रेमी आर्यजनों को अवश्य पढ़नी चाहिये ।

आवश्यक निवेदन

सत्यार्थप्रकाश शताब्दी के अवसर पर उड़िया भाषा में सत्यार्थप्रकाश का प्रकाशन

सारे आर्य जगत् में सत्यार्थप्रकाश शताब्दि मनाने की व्यवस्था की जारही है । इस शुभावसर पर लाखों सत्यार्थप्रकाश देशविदेश की अन्य भाषाओं में प्रकाशित हो चुकी हैं । परन्तु अन्य पिछड़ेपन की तरह उड़ियावासी ऋषि दयानन्द की इस अमृतवाणी को अपने भाषा में प्राप्त नहीं कर सके । इस महती कमी को दूर करने के लिए 'गुरुकुल आश्रम आमसेना कालाटाण्डी' ने साधनाभाव के होते हुए भी आर्यबन्धुओं के सहयोग एवं विश्वास पर उड़िया भाषा में सत्यार्थप्रकाश प्रकाशित करना शुरू कर दिया है । यदि कागज आदि समय पर मिल जावे तो सारा ग्रन्थ श्रावणी तक छपकर तैयार हो जायेगा ।

ऋषिभक्त दानी महानुभावों से प्रार्थना है कि अधिक से अधिक दान देकर वनवासी जनता तक ऋषिसन्देश पहुंचाकर यश के भागी बनें । जो सज्जन एक हजार रुपये दान देंगे उनका चित्र प्रकाशित किया जावेगा ।

निवेदक
धर्मदेव स्नातक

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

युवक के प्रति भारत का असन्तोष

श्री विष्णुदेव प्रसाद, कक्षा १२, गुरुकुल कांगड़ी विश्वविद्यालय

हे वीर युवा ! सुनो भारत के,
अब शोक मुझे इस बात का है।
थी आश अभी जिस पर वही
अब छोड़ रहा निज दायित्व को ।।१।।

भूमि यही उन वीरों की,
जिन जान गंवा दी है स्वाधीनहेतु।
पश्चिमीय शिक्षा का द्वार खोल
निर्माण किया निज हाथ से सेतु ।।२।।

अवनि यही महाराणा की,
जिन घास को खाकर जान बचायी।
खून से प्यास बुझा करके,
चन्द्रहास के नोक पै रात बितायी ।।३।।

पैर पड़े यवनों के यहां न,
यह पावन है ऋषियों की धरा।
निज संस्कृति उज्ज्वल होती रहे,
स्वाभिमान हृदय में यही था भरा ।।४।।

स्वदेशी वसन को त्याग सभी,
परदेशी को प्रेम से धार लिया।
साम के गान को छोड़ सबै,
चलचित्र के गान को मान दिया ।।५।।

ज्ञान की दीप दिखा जिसको हम,
तमोनिलय से बाह्य किया।
पर आज वही कछुए की चाल से,
आगे बढ़ा शश पीछे किया ।।६।।

देश के भार को युवा सदा,
बन वाहक भार-अभार किया।
धर्म - कर्म ठुकरा करके,
निज संस्कृति पर अभिघात किया ।।७।।

छल से दशानन सीता हरी,
तब आर्यों ने ताहि विनाश किया।
प्रतिवासर गो-वध कन्या-हरण,
क्या ? वीर अभी तक सोया हुआ ।।८।।

दृग खोल युवा अब देख चहुं दिशि,
होड़ मची उत्थान की है।
हम भी क्यों अब तक सोये रहें,
उत्थान में शान जवान की है ।।९।।

हे वीर ! सजग-प्रहरी अब जागो,
जलाए तुम दीपक ज्ञान का जाओ।
था प्राचीन-भारत वही अभी,
समवेत ऋचा-जयघोष कराओ ।।१०।।

मैं हूं पान्थ

श्री अभेदानन्द

पत्थरों से टकराता,
हर कदम लड़खड़ाता,
दायें-बायें गिरता,
मैं हूं पान्थ !

दूर मंजिल मेरी,
राह कांटों की ढेरी,
लेकिन उम्मीदें भरी,
मैं हूं श्रान्त !

अन्धेरी ये रातें,
तारे टिमटिमाते,
अकेला हूं राही,
मैं हूं क्लान्त !

कोई पदचाप मुझे,
बुलाता निरन्तर,
पाथेय है यही
मैं हूं पान्थ !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(गतांक से आगे)

ऋग्वेदभाष्यभूमिका उत्तरार्धं

प्रथम सूक्त

सौर्य अणुतन्त्र एवं वैदिक देवता

श्री दीनदयालु गुप्त, एम.एस-सी., एल. एल-बी

भृगु और अङ्गिरस

'श्रान्ताभ्यस्तप्ताभ्यः सन्तप्ताभ्यो (अद्भ्यः) यद्रेत आसीत्तदभृज्यत यदभृज्यत तस्माद् भृगुः समभवत्'। गो. पू० १–३।

'वायुरापश्चन्द्रमा एते भृगवः'। गो० पू० २-८-६।

'वरुणस्य वै सुषुवाणस्य भर्गोऽपाक्रामत् स त्रेधाऽपतत्। भृगुस्तृतीयं श्रायनीयं साम तृतीयमपस्तृतीयं प्राविशत्।' ता० १८–६–१।

'तस्य (प्रजापतेः) यद्रेतसः प्रथममुददीप्यत तदसावादित्योऽभवद्यद् द्वितीयमासीत्तद् भृगुरभवत् तं वरुणो न्यगृह्णीत तस्मात् स भृगुर्वारुणिः'। ऐ० ३–३४।

'एतद्वै तेजिष्ठं तेजो यद् भृग्वङ्गिरसाम्॥' श० १–२–१–१३।

'एतद्वै भूयिष्ठं ब्रह्म यद् भृग्वङ्गिरसः'। गो० पू० ३–४।

'(तत्र)सोमो वै वृष्णो अश्वस्य रेतः' तै०३-६-५-५।

'आपो हि रेतः'। ता० ८–७–६।

'वागु हि रेतः' श० १–५–२–७।

'शुक्लं वै रेतः'। ऐ० २–१४।

'रेतो नाभानेदिष्ठः।' ऐ० ६–२७।

'सौर्यं रेतः। तै० ३–६–१७–५।

'विवृद्धि रेतः' ता० ८–७–१४।

'वायुर्वै रेतसां विकर्ता' श० [illegible]

'प्राणोदानौ रेतः सिक्तं विकुरुतः'। श० ६–५–१–५६।

'उभयतः परिगृहीतं वै रेतः प्रजायते।' श० २–३–१–३२।

परिपाक जिनका हो चुका–और ताप को प्राप्त हुए ऐसे तेजोमय उद्दीप्त-क्षेत्र में सुसंगत गतिशील तेजांशों में जो सन्तप्त (बीजरूप) सोम (गतिरूप से रहित) ताप से संयुक्त हुआ वह मानो (शुक्ल-अश्व-सौर्य) प्रकाशरश्मि का बीज था–वह अपेक्षाकृत–द्रवत्व से हीन भृगु उत्पन्न हुआ। यह अधिकतर ताप–तेजोभार से युक्त भृगु-वायु (प्रकाशरश्मि) में, आपः (तेज, जिनमें बह रहा है ऐसी रश्मियों में, तथा च चन्द्रमा (उदान-वायु) में प्राप्त है। यह वायु, आपः, चन्द्रमा क्रमशः प्रकाश रश्मि, एल्फा (अ) किरण और हाइड्रोजन द्रव्य हैं। भृगु इनमें 'प्रतनु' (प्रोटन) नाम विद्युद्-भार से युक्त है।

सौर्य तेज (वरुण) जब रश्मियों में प्रवेश करके प्रजनन कार्य में प्रवृत्त होता है तो वह तेज तीन विधियों से निम्न गति करता है। इन तीन में से एक सन्तप्त भृगु, दूसरा पाक परिणामी क्षेत्र, तीसरा गतिशील 'विद्युत् तनु'–इलेक्ट्रन। तथा क्रम से उद्दीप्त प्रज्वाल्यमान विस्तृततम सूर्य के चारों ओर जो अग्नि की (शोचिष्केशः) लपटें हैं, वह आदित्य-संज्ञक प्रसरण शील हैं। और 'द्वित' गतिशील तेज सूर्य रश्मि में गृहीत हुआ, इस हेतु भृगु को

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वरुण (वैद्युच्चुम्बकीय) शाखा के अन्तर्गत 'आपः में प्रविष्ट उद्दीप्ततर तेज वारुणि कहा जाता है। यह भृगु अंगिरसों का तेजों में अधिकतम तेज, ब्रह्मवाच्य आदित्य और अणुओं में 'प्रतनु' और 'विद्युत्तनु' हैं।

यह बीज रश्मियों वा प्रचलनशील तेजो में—वाक् (आकाश) वाणी में, श्वेत किरणों में सप्त-संख्यात वर्ण, एवं बहु गतिकम्पनों में अपने त्रिवृत्त (अर्थात् (१) कम्पन संख्या—(२) तरङ्ग की उत्तान—(३) व्यञ्जना वा रूपक) आदि गुणों सहित प्राप्त होते हैं। जब प्रकाश रश्मि द्वारा बीजों का अन्तरिक्ष (द्यावापृथिवी) योनि में आधान होता है, तो यह बीज विरुद्ध उभय रूपों में उत्पन्न होते हैं। प्राणवायु (ओषजन) और उदानवायु (आर्द्रजन) यह दोनों भी लोक में बीजों को विरुद्ध उभयरूप—क्रमशः क्षारों और अम्लों की उत्पत्ति करते हैं। यह समस्त विज्ञान भृगु और अंगिरस सम्बन्धित उपरोक्त उद्धरणों में उपलब्ध है। विस्तार भी यथास्थान वैदिक साहित्य में भरा पड़ा है।

भृगु शब्द भृञ् धारण पोषण अर्थवाचक तथा भृजी भूंजना, भ्रस्ज पाके इन धातुओं से (उ० १—२८) सिद्ध होता है। तद्वत् अङ्गिरस शब्द—अङ्ग (अंकनात्) + रस रंहतेः—गति धर्म वाले दो पदों से युक्त प्रसंख्यात वेग अर्थ वाले वर्णव्य-ञ्जक गतिशील 'विद्युत्तनु' इलेक्ट्रन हैं—यह विशेषकर अणुओं में द्रव्यों के गुणों को विशिष्ट करते हैं। भृगु में तेज केन्द्रस्थ (न्यूक्लिअर) है। अंगिरस में तेज कक्षा में गतिशील है।

जब गतिशील (प्रसंख्यात गतिप्रवाहों से युक्त) विद्युत्तनु अंगिरस-केन्द्रस्थ विद्युद्धारांश प्रतनु अर्थात् भृगुओं से समवेत होते हैं तो ताप उत्पन्न होता है। भृगु जो स्वयं अपेक्षाकृत 'गतिसह' तथा द्रव्यभारयुक्त स्वयं 'ताप तेज' से सन्तप्त है, वह अणु रचनाक्रम में अधिकतर उद्दीप्त होता है, तो मानो भृगु (प्रतनु) का शरीर भट्टी में भूना जा रहा है। यही इसका भर्गत्व है। अङ्गिरसों का भरण पोषण भी यह करता है। उन्हें कक्षा में धारण करके पुष्ट शरीर 'अणु' को प्रदान करता है। इसलिए 'भार्य' परिपालित विद्युत्तनु—इलेक्ट्रनों का यह भृगु प्रतनु भारान्न है।

अणुनिर्माण

भृगु और अङ्गिरा भयिष्ठ-तेज वाऽपि ब्रह्म-वाच्य सूर्य और अणु का शरीर कैसे निर्माण करते हैं। इस विषय पर कुछ मन्त्रों को उद्धृत करते हैं—

(१) सुरूपकृत्नुमूतये सुदुघामिव गोदुहे।
जुहूमसि द्यविद्यवि ॥ ऋ० १—४—१।

(२) आ त्वेता निषीदतेन्द्रमभि प्र गायत।
सखायः स्तोमवाहसः ॥ ऋ० १—५—१।

(३) पुरूतमं पुरूणामीशानं वार्याणाम्।
इन्द्रं सोमे सचा सुते ॥ ऋ० १—५—२।

(४) स घा नो योग आ भुवत् स राये स पुरन्ध्याम्।
गमद् वाजेभिरा स नः ॥ ऋ० १—५—३।

(५) सुतपाव्ने सुता इमे शुचयो यन्ति वीतये।
सोमासो दध्याशिरः ॥ ऋ० १—५—५।

(६) त्वं सुतस्य पीतये सद्यो वृद्धो अजायथाः।
इन्द्रं ज्यैष्ठ्याय सुक्रतो ॥ ऋ० १—५—६।

(७) आ त्वा विशन्त्वाशवः सोमास इन्द्र गिर्वणः।
शं ते सन्तु प्रचेतसे ॥ ऋ० १—५—७।

इन मन्त्रों का भावार्थ इसप्रकार है—

प्रत्येक प्रकाश की चमक में शत-शत अणुनिर्माता उत्तप्त सूर्य से जो तेज प्राप्त होता है, उसे रश्मियां (ऊति) अवनकर्म के हेतु (हु दानादनयोः) व्यवहार में लाती हैं। 'अव' क्रिया का अर्थ है—रक्षण, गति, कान्ति (अभा-दीप्ति), प्रीति, तृप्ति, अवगम

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(बोध), प्रवेश, श्रवण, स्वाम्यर्थ, याचन, क्रिया, इच्छा, प्रकाश, प्राप्ति, अवाप्ति, आलिङ्गन, हिंसा, दान, भाग और वृद्धि । ये क्रियायें 'सुरूपकृत्नु' अर्थात् बहुरूप द्रव्यों के परमाणु के विनाश और उत्पत्ति में व्यवहार में आती हैं । गो रश्मियों के दुहने अर्थात् प्रपूरण और तृप्ति करने हेतु हम 'इन्द्र' उत्तप्त सूर्य वा अणु का व्यवहार करें । द्रव्य का विनाश और निर्माण करते समय अवनकर्म तथा सूर्य वा अणु की रश्मियों का प्रपूरण और तृप्ति के समय प्रत्येक 'भृगु-प्रतनु' और 'अङ्गिरस-विद्युतनु' के संयोग और वियोग द्वारा उत्पन्न तेज का व्यवहार प्रत्येक चमक में तथा शृंखलाबद्धचमक में देखा जा सकता है, और चमक-चमक में तेज निश्चित मात्रा में व्यवहृत होता है । मानों तेज सीमाबद्ध कड़ियों में क्वणित (शब्दायमान) और प्रत्येक (शब्द) गतिकम्पन द्वारा परमाणुगत वा परिणमयित-आवर्तित होता है । इसको विज्ञान की परिभाषा में 'क्वणतं' नाम से कहेंगे । इस का व्यवहार 'इन्द्र' उत्तप्त सूर्य में तथा उससे गो-दुहन में वा प्रसारित रश्मिपुञ्ज में होता है ।

बहुरूप परमाणुओं में इन्द्र तेज भारमय 'ईशानम्' अग्निरूप है । समस्त उत्पन्न अणुओं में दशधा प्रत्यवस्थित है (जै० उ० १–२९–३–४) । इस अवस्थित तेज द्वारा ही अन्न-बीज निष्पाद्य होता है । यह साधारणतया 'वार्य' सुरक्षित अणुओं में सोम-अन्नरूप से सुसंगत स्तुत्य (न्यूक्लियस्) है । इस संयोगजन्य अणु में नितरां स्थित स्तुत्य (णुक्रिय-न्यूक्लियस्) इन्द्र के प्रत्यक्ष गुणों को प्रकट और व्यवहार्य रूप देने वाले सखा हैं । वे स्तोम (ऋणात्मक विद्युत् तनु) – तेजांश के वहन करने वाले हैं । वह 'णुक्रिय' स्तुत्य गुण केन्द्र इस संयोजनीय अणु (योग) में बहुलतम वा अल्पतम संख्या वा भारयुत प्रकट होता है । साथ में गतिशील 'वाज' नामांकित अङ्गिरसगण इन गुणों को विशिष्ट बनाते हैं । निष्पादित सोम की रक्षा तथा तेज को पान कर प्रजनन आदि कर्म वा तृप्ति हेतु अणु वा उत्तप्त सूर्य में त्रिगुणावृत प्राणेन्द्रियां वा शीर्षस्थानीय अग्निस्तोमरूप गतिशील 'विद्युत्-तनु' हैं, जिन को केन्द्रस्थ सोमों ने कक्षाओं में धारण किया है । इन दो में से केन्द्रस्थ सोमासः हैं, जिसमें विद्युदन्नमय भार है, दूसरे 'आशवः' जिनके द्वारा अणुओं को दृढ़ दुर्गमय बनाया जाता है (ता० १४–९–१०) यह भृगु (प्रतनु) से सम्बन्धित (आशु) क्षिप्र गतिशील एवं 'इन्द्र' अणु वा सूर्य को दृढ़ बनाते हुए सूर्य वा अणु के मण्डल में प्रविष्ट हैं । यह सोमास स्थित तेज के भारांश एवं यह 'आशवः' शीघ्र गतिशील केन्द्र से सम्बन्धित विद्युद्भारांश-विरुद्धोभय तेजरूप बल वाले प्रकृष्ट दीप्ति के सञ्चय हेतु ना-रुद्र-गणों-तापगणों द्वारा प्रचेतन-प्रज्वालनहेतु (शं सन्तु) शमित होते रहें और शमन काल में कार्य सम्पादन करें । इष्टकर्मों को सम्पन्न करें । शमित होना उद्दीप्त स्तर से प्रवाहित हो कर तेज का कार्यक्षम होना है । 'अध्रिगुरपापश्चोभौ देवानां शमितारौ ।' तै०३–६–६–४ । निरन्तर गति जिनमें हो, ऐसे अधरा (निम्नतल) को वा 'विद्युत् तनु' को 'अध्रिगु' तथा जिन में तेज घटे नहीं, उद्दीप्ततल स्थिर रहे, वे केन्द्रस्थ भृगु 'प्रतनु' वा 'सोमो अक्षा', विद्युत्-तोदाः इरस्तोद, इलेक्ट्रोद वा अपाय (देवानां निग्रभीता) कहेंगे । यह दोनों निरन्तर गति (विद्युत् सरकिटों) द्वारा देवों–दिव्य तेजों का कर्म में प्रयोग कर के शमन करते हैं ।

वेदों के कुछ-एक देवताओं का निरूपण प्रमाणों सहित इस हेतु प्रारम्भ में दिया गया है कि तकनीकी शब्दों से परिचय हो जाय । अब आगे वेद के सूक्तस्थ मन्त्रों की वैज्ञानिक भाषा में प्रवेश हेतु कुछ-एक वैज्ञानिक विषय प्रस्तुत करते हैं ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अणु विस्फोट एवं 'उस्रिया' वाच्य क्षरणशील 'क्ष' किरण

"वीडु चिदारुजत्नुभिर्गुहा चिदिन्द्रव न्हिभिः।
अविन्द उस्रिया अनु॥" ऋ०१-६-५।

इस मन्त्र में 'वीलु' शब्द निघ० २-६ के अनुसार 'बल' नाम वाला है। निरुक्त में 'वृञ्' आच्छादनार्थक धातु से 'बलं भरं बिभर्तेः' इस प्रकार 'भृञ्' भरणार्थक धातु से निरुक्त ६-१-२ (५) और ३-२-६ में यास्काचार्य ने बल शब्द सिद्ध माना है। अद्रि-ग्रावाणः पर्वत यह शब्द ऋ० म० १०, सू० ६४ में प्राप्त है। मेघ और पर्वतवाची नामों में (निघ० १-१०) बल शब्द का होना सिद्ध करता है कि पर्वत,अद्रि,ग्रावाणः बलवाच्य जो चट्टाने (रौक्स) हैं, उन से यह 'वीलु और बल' सम्बद्ध हैं। ऋ० १-६-५ तथा १०-८६-६ में स्पष्ट 'वीलु' वह संस्तम्भित-दृढ पदार्थ है जो इन्द्र-विद्युत् की वा सूर्य की वन्हि (अश्वनाम निघ० १-१४) श्वेत किरण वा मन्यु तापस (ऋ० १० -८४-१।७) द्वारा भङ्ग किया जावे और इस कार्य से शत्रुओं को सर्वथा विजय किया जावे। इस क्रिया से क्ष (X) किरण वा सुतीक्ष्ण विश्व किरण (कास्मिक) पैदा होती हैं। वीलु को शीर्ण करने वाली 'सोमो अक्षा' का वर्णन उपरोक्त ऋ० म० १०, सू० ८६ में है जिसका रेणु ऋषि है। त्रस (धारण, ग्रहण, वारण करने वाला) रेणु हिंसा-तोड़फोड़ करने वाला। इसप्रकार त्रसरेणु-परमाणु है। रिणाति-गच्छति-हिनस्ति, हन्यते वा स रेणुः-उ० ३-३८। इसको शीर्ण (भङ्ग) किया जाता है,वा यह तोड़फोड़ करता है। ऋ०म० १०, सू० ८४, ६४ के अतिरिक्त अनेक मन्त्र हैं, जिनमें वृत्र वा असुरों के दृढ़ दुर्गों अर्थात् परमाणुओं को तोड़ फोड़ कर, गो-रश्मियों को वा ऐश्वर्य प्रसाधन को इन्द्र' प्राप्त करता है। इन्द्र की वन्हियां (ऋ० १-३२-१०) अभेद्य पदार्थों को भेदन करने वाली रश्मियां हैं, जो सुदीर्घ अन्तरिक्ष में वा पोली गुहा (बल्व) में अन्धकार से आवृत वृत्र वा मेघ को शीर्ण कर दृढ़ वलों वा परमाणुओं को तोड़ देती हैं। काष्ठ वा मेघ को भेदन करने वाली यह रश्मियां क्ष (X) किरण वा विश्वकिरण (कौस्मिक किरणें) हैं। मन्त्र इसप्रकार हैं--

(१) अतिष्ठन्तीनामनिवेशनानां काष्ठानां मध्ये निहितं शरीरम् (यस्य स वृत्रस्तस्य) वृत्रस्य निण्यं (गृहे) वि चरन्त्यापो (रश्मयः) दीर्घं तम आशयदिन्द्र (सूर्यो विद्युत् वा) शत्रुः (शमयिता शातयिता वा यस्य स वृत्रः)॥ ऋ० १-३२-१०।

(२) आपान्तमन्युस्तृपलप्रभर्मा (क्षिप्रप्रहारी सोमो वेन्द्रो वा) धुनिः शिमीवान् (कर्मवान्) शरुमां ऋजीषी। (सोमः) सोमो विश्वान्यतसा वनानि (रश्मीन्) नार्वागिन्द्रं प्रतिमानानि देभुः (दभ्नुवन्ति)। ऋ० १०-८६-५। अर्वागेवैनमप्राप्य विनश्यन्तीति।

(३) न यस्य द्यावापृथिवी न धन्वं नान्तरिक्षं नाद्रयः सोमो अक्षाः (क्षियति क्षरति सोमः) यदस्य मन्युरधिनीयमानः शृणाति वीलु रुजति स्थिराणि॥ ऋ० १०-८६-६।

(४) जघान वृत्रं स्वधितिर्वनेव रुरोज पुरो अरदन्न सिन्धून्। विभेद गिरिं नवमिन्न कुम्भमा गा इन्द्रो अकृणुत स्वयुग्भिः॥
ऋ० १०-८६-७।

उपरोक्त मन्त्र १ का सार ऊपर दे चुके हैं। शेष मन्त्र २, ३ और ४ का भाव यह है कि क्षिप्र (शीघ्र) प्रहार में अन्तरिक्ष में (धुनिः) गति-कम्पन उत्पन्न करता हुआ इन्द्र (सूर्य) वा (प्रतनु) सोम नितान्त गतिशील रश्मियों को जन्म देता है। इसका पहिले से ही यदि प्रतिमान न किया

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जावे तो यह विनाश कर देता है। इस इन्द्र या सोम वा तज्जनित रश्मियों का द्यावा, पृथिवी, अन्तरिक्ष वा पर्वत प्रतिमान नहीं करते। सोम जिनमें निवास करता वा जिनसे क्षरता रहे ऐसे सोमदण्ड हैं। जिन का 'मन्यु ताप' वाऽपि क्रोध वा आवेश में प्रयुक्त दहन शक्ति 'वीलु-बल' (संस्तम्भित)' सुदृढ़ परमाणुओं को शीर्ण कर देती है और उनके सुदृढ़ अंगों को—वा आक्रान्त सुदृढ़ स्थिर पदार्थों को भंगकर देती है, तोड़फोड़ देती है। इस उत्तप्त सोम वा इन्द्र (सूर्य) ने वृत्र (बल)—परमाणु को नष्ट किया और रश्मि जैसे उसके 'वज्र' ने नगरों को विदीर्ण कर डाला (सिन्धून्) सप्त रश्मियों के बन्धन से बन्धे इस सब को चीर दिया। जै० उ० १–२९–६। ऋ० २–१२–१२। गिरि–पर्वत वा चट्टानों के अवयव-अवयव कर दिये। सूर्य वा उत्तप्त सोम (अल्फा+) रश्मिरूप परमाणुओं के संघात से द्विविध संयोगों द्वारा ठीक नया सूर्य जैसा (कुभि आच्छादने) कु-आकाश में छा जाता है। जिन द्विविध रश्मियों का संघात और विखण्डन हो जाता है, वे युगल 'सोमरूप' तथा 'इन्द्ररूप' निज उद्दीप्त वेग द्वारा इरा को फाड़ने वाले पृथक् पृथक् परमाणु हैं। इन्हीं दो की रश्मियां संयुक्त हो सूर्य के रश्मिपुञ्ज जैसा बवंडर खड़ा कर देती हैं, वह स्वयं ही बिखर भी जाता है। इस अणुविस्फोट की प्रक्रिया देखिये—

> "तद्देवानां देवतमाय कर्त्वमश्रथ्नन्दृळ्हाव्रदन्त वीलिता। उद्गा आजदभिनद् ब्रह्मणा बलं (वीलु) अगूहत्तमो व्यचक्षयत्स्वः।"
>
> ऋ० २–२४–३।

'अश्रथ्नन्दृळ्हाव्रदन्त वीलिता' स्तम्भरूप दृढ़ अणु रूई के गोलों जैसा पोला हो गया—मानो खण्ड-खण्ड उसके रेशे हो जावेंगे। विस्तार को प्राप्त अणु का केन्द्र—'ब्रह्म' भृगु अंगिरायुक्त परमाणु के खण्ड खण्ड होने पर सूर्य का प्रकाश विशेष रूप से प्रकट हो जायेगा।

'महत आयुधाः संशिशाना आरुजन्तोऽभिप्रयन्तु।' अग्निरूप मरुद्गणों से विद्युत् (तनु) सम्पादित अस्त्रों के प्रयोगों द्वारा तोड़ फोड़ के कार्य सम्पन्न हों।

अत्रि-आत्रेय

वागेवात्रिः। वाचान्नमाधत्ते। श० १४-५-२-२ वाग् वायुः। इन्द्रः। दध्यङ् आथर्वणः। अर्बुदः। उक्थम्। ब्रह्म-सुब्रह्म। सरिरम्। सोमक्रयणी वा। ता० १८-८-७। कौ० २-७। १३-५। यजु० ११-३३। तै० ३-८-१६-३। ष० १-५ ऐ० ६-३। यजु० १३-५३। श० ३-२-४-१०-१५।

अत्री रेतः (वाचः सकाशादुत्पतितं गर्भं यस्मिन्) वा बभ्रुः। तद्ध स्म पृच्छन्त्यत्रेव त्या दिति ततोऽत्रिः सम्बभूव। श० १-४-५-१।

बभ्रुः (बिभ्रति गच्छति स आत्रेयः सोमः यजु० १२-७५) अत्रिणो रक्षांसि पाप्मानः। (ष० ३-१), ऐ० २-२।

"हिमेनाग्निं घ्रंसमवारयेथां पितुमतीमूर्जमस्मा अधत्तम्। ऋबीसे अत्रिमश्विनावनीतमुन्निन्यथुः सर्वगणं स्वस्ति" ।।ऋ० १०-११६-८। ऋबीसमपगतभासमपहृतभासमन्तर्हितभासं गतभासं वा। नि० ६-६-३६। गणं गणनात् – रसतेजसी विद्येते यत्तदश्विनो रूपम्।

जिस वाणी द्वारा अन्न खाया जाता है तद्वत् वाणी (वाक्), प्रकाश रश्मि, उत्तप्त सूर्य, अचल तथा आधारभूत 'अथर्वणः भृगु' आदि सोम, वा गतिशील अर्बुद काद्रवेय सर्प, यह सब तथा घ वाक् और वाङ्नामों में पठित निघ० (१-११) के ५७ अन्य शब्द जो 'अत्ति' (अदन) क्रिया में सहायक हैं, वह सब भी अत्रि कहलाते हैं। अत्तिकर्म वाले दस शब्द निघ० (२-८) में पठित हैं। तदनुसार अत्रि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वह हैं, जो (आवयति) तन्तुसन्तान–कपड़ा बुनना वा संयुक्त गति, (भर्वति) नीचे गिराता है, (भसथः, बब्धाम्, बभसति) भर्त्सना और दीप्ति करता है। (वेति) गति, व्याप्ति, प्रजनन, कान्ति, असन, खादन करे (वेवेष्टि) व्याप्त होना (अविष्यन्) प्रविष्ट हुआ हो वा विरुद्ध संयोग को प्राप्त हो। (हरति ह्वयति) हरणशील एवं दान-अदन और आदान करना–यह सब अत्रि के कर्म हैं।

निघण्टु के ५७ शब्दों (वाङ्नामों) में गौ, सरस्वती, शब्द, स्वर, धेना, अदिति आदि पठित हैं जो रश्मि, सूर्य, तेज, गतिकम्पन, अखण्डनीय प्रकृति द्रव्यादि के वाचक हैं।

शतपथ ब्राह्मण के अनुसार 'वाणी' के वा अदिति के अखण्डनीय-तेजोमय-गतिकम्पनमय गर्भ में आत्रेय सोम उत्पन्न हुआ–तो वह जो 'बीज' था वही–अत्रि है। वैसे तो यह अदन कर्म करने वाले तेजों के विकार हैं। अर्थात् तेजांशों वा प्रतनु सोमों के विकृत होने पर उत्पन्न होते हैं। 'रस (गति) और तेज' (अश्विनद्वय) के प्रभाव में उन्नयन (वेगवृद्धि) द्वारा गणनापूर्वक इन्हें प्रयोग किया जाता है। यह अत्रि 'भासा' गतिकम्पनयुत आभासमय वर्ण से हीन हैं, वा भासानुकूलित वर्णत्व से इन्हें पृथक् होना पड़ा है। वा इनकी गतिकम्पनसंख्यायुत भासा का चयन वा संग्रह नहीं हुआ –ऐसी अवस्था में यह अत्रि पड़े हुए हैं। उसी अवस्था में तेज के क्षेत्र में वेग सञ्चार द्वारा इन्हें उन्नयन किया जाता है। तब यह सोमरूप (प्रतनु-णुक्रिय-न्यूक्लियस) में अन्न को भक्षण करते-अणु-आकाश में अर्थात् गति-कम्पन के क्षेत्र में बीज बन कर अन्य अत्रिगण को जन्म देते हैं।

उपरोक्त प्रमाणों से स्पष्ट है कि हिमशीत के द्वारा इनके क्रियाकलाप को सुरक्षित किया जावे। इन अत्रियों से उत्पन्न ऊर्जा को, अग्नि और ताप को, गणनापूर्वक--इनकी संख्या को कम वा अधिक करके ताप को नियन्त्रित किया जावे कि परमाणुओं से ताप और तेज का (स्वस्ति) आवर्तन होता रहे।

तो फिर यह 'अत्रि वा आत्रेय' जो तीन के (त्रिवृत् वा त्रिष्टुप् वा त्रिनाभि) चक्र से पृथक् गिने जाते हैं–कौन हैं ? यह न तो अल्फा+विद्युत् वाले सोम हैं न बीटा – विद्युत् वाले स्तोम हैं न तरङ्गमात्र-सुतीक्ष्ण गामा वा क्ष किरण सम हैं - 'अत्रय', 'नत्रय', 'न्यूत्रन' हैं।

अब इन 'अत्रयः' 'नत्रयन्स' की क्षमता का दिग्दर्शन करें–

(१) यत्त्वा सूर्य स्वर्भानुस्तमसाविध्यदासुरः।
अक्षेत्रविद्यथा मुग्धो भुवनान्यदीधयुः ॥
ऋ० ५–४०–५।

(२) ....गुल्हं सूर्यं तमसापव्रतेन तुरीयेण
ब्रह्मणाविन्ददत्रिः ॥ ऋ० ५–४०–६।

(३) यं वै सूर्यं स्वर्भानुस्तमसाविध्यदासुरः।
अत्रयस्तमन्वविन्दन्नह्यन्ये अशक्नुवन् ॥
ऋ० ५–४०– ९।

सूर्य तमोगुण से विद्ध है – (तम-तनु) उसका (स्वर्भानु) तेज (तमसा) विस्तृत होता हुआ सूर्य नामक गुह्य वनस्पति में (अविध्यत्) प्रविष्ट हुआ। उस सूर्य तेज को समस्त रूप में वा समग्र रूप में 'अत्रि और आत्रेय' भिन्न-भिन्न अत्रि गणों ने सूर्य सम अवस्था में प्राप्त किया, वे 'अत्रयः' 'न त्रयः' ही सूर्य के तेज को इस सूर्य नामक 'वनस्पति' में प्राप्त करते हैं। अन्य परमाणुओं में वह तेज संगृहीत नहीं होता। ऋग्वेद के पांचवें मण्डल में अत्रिगण द्वारा सूर्यतेज का समस्त रूप में ग्रहण प्रयोग विवेचनीय है। वेद से सूर्य जैसे शक्तिसम्पन्न स्रोत का आविष्कार उद्दिष्ट है। इस साधन का फिर प्रयोग में ला सकना भी एक समस्या है। (क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कच्छवंश महाकाव्य

डा० रामदत्त शर्मा, एम.ए., पीएच. डी

(लेख की टिप्पणियां लेख के अन्त में दी गयी हैं। लेख दो भागों में छपने के कारण आगामी मास में पूरा होगा, अतः टिप्पणियां अगले मास दी जायेंगी)

—सम्पादक

संस्कृत-साहित्य एक विशद-साहित्य है, जिसमें अनेक महत्त्वपूर्ण कृतियों का सृजन तो हुआ है परन्तु वे अप्रकाशित होने एवं बन्द कोठरियों में पड़ी रहने के कारण प्रकाश में नहीं आ सकीं हैं। ऐसी ही परम्परा में 'कच्छवंश महाकाव्य' आता है, जो अत्यन्त विशद, महत्त्वपूर्ण एवं ऐतिहासिक होते हुए भी अप्रकाशित है। जयपुर के शासकों के विषय में उपलब्ध ऐतिहासिक महाकाव्यों में यह महाकाव्य सबसे अधिक पूर्ण एवं विकसित है,

इच्छन्ति देवा इति० देवाः ज्ञानज्योतिषा दीप्यमानाः, अन्येभ्योऽपि स्वसञ्चितज्ञानसंपदः प्रदातारो वा सत्पुरुषाः। सुन्वन्तम्–यज्ञादिसत्कर्मसु सततंतत्परम्, तपसा वाष्पीकृतं ध्यानप्रणाल्या परिस्रुतं भगवतः सोमस्य भक्तिरसं हृदयभाजने स्रावयन्तम्। अथवा आत्मसरिति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्नान्तं जनम् इच्छन्ति कामयन्ते तेन सहावस्थानमिच्छन्ति । तदुक्तम् आत्मा नदी संयमपुण्यतीर्था सत्योदका शीलतटादयोर्मिः । तत्राऽभिषेकं कुरु पाण्डुपुत्र न वारिणा शुध्यति चान्तरात्मा ।। ते स्वप्नाय निद्रायै निद्रालवे जनाय वा न स्पृहयन्ति । इदं तथ्यं मनोगतं कुर्वाणाः अतन्द्राः निरलसाः साधकाः, अपि कदाचित् प्रमादं यन्ति ? प्रमादं प्राप्नुवन्ति ? नेति काक्वा व्यज्यते । षुञ् अभिषवे । अभिषवः स्नपनं पीडनं, स्नानं सुरासन्धानं वेति सिद्धान्तकौमुद्यां श्री दीक्षिताः । पौराणिकास्तु–'आदित्या ऋभवोऽस्वप्ना अमृता अमृतान्धसः । इत्यमरः' इत्यनुसारम् देवाः कदाचिन्न स्वपन्तीति मन्यन्ते ।

अथवा—

ईशा वास्यमिदं सर्वं यत् किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद् धनम् ।।
यजु० ४०-१

देवता–आत्मा । ऋषिः दीर्घतमाः । छन्दः अनुष्टुप् ।

ईशा वास्येति–जगत्यां पृथिव्यां लोकत्रये वा यत् किञ्च जगत् यावन्मात्रं स्थावरजङ्गमात्मकं पदार्थजातं विद्यते । जगत्पदेनात्र स्थावरस्याप्युपलक्षणम् । तावन्मात्रं सर्वमपि ईशा अस्य स्वामिना परमात्मना वास्यम् आच्छादनीयम् व्याप्तं तदीयमेव न तवेति भावः । ईष्टे इतीट् । तेन ईशेति तृतीयान्तं पदम् । ईश् ऐश्वर्ये धातोः क्विपि रूपम् । तेन तस्मात्कारणात् । त्यक्तेन भुंजीथाः त्यागभावनया परित्यक्तस्वस्वामिभावसम्बन्धपूर्वकम् अस्य भोगं कुरु । मागृधः लोभं मा कार्षीः । इदं ममैवास्त्विति गृधिं त्यज । त्यक्तेनेति त्यज् धातो र्भावे क्त प्रत्ययः । कस्यस्विद् धनम् धनं कस्य स्वित् ? न कस्याऽपीति काक्वा व्यज्यते । स्विदिति निपातोऽनर्थको वितर्कद्योतको वा । वस आच्छादने धातो र्ण्यत्प्रत्यये वास्यम् ।

अथ वाक्य वैशिष्ट्ये व्यञ्जना । वाक्यमाकांक्षायोग्यतासत्तियुक्तं पदजातम् । यत्र व्यंग्यार्थप्रतीतावनेकसाकांक्षपदानां योग आवश्यकः ।

यथा—

यूयं वयं वयं यूयमित्यासीन्मतिरावयोः ।
किं जातमधुना मित्र यूयं यूयं वयं वयम् ।।

उत्तरवाक्ये अधुना प्रयोग साकांक्षत्वाय पूर्वपदे तदापुरादिपदानामन्यतमस्य प्रयोगोऽपरिहार्यः । तस्मिन्नध्याहृते (पुराअधुनापदयोः प्रयोगात्) अनयो वैशिष्ट्येन यदाहं धनधान्यवान् आसं तदा तव मयि निरतिशया प्रीतिरासीत् अधुना संपत्तिनाशे तु त्वं सर्वथैव मां विस्मृतवानसि । तेन तव प्रीतिर्मम धने एव आसीदिति व्यज्यते ।

यथा वा—

तथा तदस्तु सोमपाः सखे वज्रिन् तथा कृणु ।
यथा त उश्मसीष्टये ।। ऋ० १।३०।१२

तथातदिति । हे सोमपाः सौम्यानां जनानां पालक, वज्रिन् वज्रहस्तत्वात् दुष्टानां नियामक देव, तव भक्ता वयम् इष्टये अभिलषितसिद्धये त उश्मसि त्वामेव कामयामहे, नान्यम् । यतस्त्वमेव सर्वेभ्य उत्कृष्टः प्रदातासि । अतस्त्वं तथा कृणु कुरु अस्माकमपि च तत्तथैवास्तु यथा वयं कामयामहे । वाचां शक्तेः परिमितत्वात् भक्तः स्वहृदि वर्तमानाः सर्वाः कामनाः शब्दैः प्रकटयितुमक्षमः । अत्र यथा तथापदयोर्वैशिष्ट्यात् – त्वं सर्वान्तर्यामी सर्वज्ञः सर्वशक्तिमांश्चासि तस्माद् वाचामविषयानपि ममाभिलाषान् त्वं पूरयेति व्यज्यते ।

यथा वा—

यथेमां वाचं कल्याणीमावदानि जनेभ्यः
ब्रह्मराजन्याभ्यां शूद्राय चार्य्याय च
स्वाय चारणाय च० ।। यजु० २६।२

देवता–ईश्वरः । ऋषिः–लौगाक्षिः । छन्दः स्वराडत्यष्टि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा अहम् ईश्वर: इमां कल्याणीं सर्वजन-मङ्गलविधायिनीं वेदवाचं जनेभ्य: सृष्ट्यादावुत्पन्नेभ्योऽग्निवायुप्रभृतिभ्य: आवदानि उपदिष्टवानस्मि तथा यूयमपि इमां ब्रह्मराजन्याभ्यां ब्राह्मणेभ्य: क्षत्रियेभ्य:, शूद्राय च अर्याय च अन्त्यजेभ्यो वैश्येभ्यश्च, स्वाय च अरणाय च स्वजनेभ्य: परेभ्यश्च उपदिशत । अर्य: स्वामिवैश्ययो: ।(पाणि० ३।१।१०३) अरण: अपार्णो भवति (निरुक्ते ३।१।१) यास्क: अपगतजलसम्बन्ध: परकीयइत्यर्थ: । अर्ण उदकनाम । अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम् । इत्यमर: । मन्त्रस्यास्य प्रथमचरणे प्रयुक्तं यथेति पदं तावत्साकांक्षं पूर्णार्थं च न भवति यावदुत्तरवाक्ये तथेति पदं प्रयुज्य तदनुसारं वाक्यं न पूर्यते । अत्र भगवान् वक्ता अन्ये वेदविद: सम्बोध्या: । यथा तथेत्यनेकपदयोरत एव वाक्यस्य वैशिष्ट्यात् वेदे मानवमात्रस्याधिकारो व्यज्यते ।

इत्थमभिधा लक्षणा व्यञ्जनाख्यास्तिस्रो वृत्तयो निरूपिता: । किन्तु अभिधया पदानामर्थेषूपस्थापितेष्वपि वाक्ये तेषां पदार्थानां मिथ: कर्तृत्वकर्मत्वादिरूपसम्बन्धविनिश्चयाय मीमांसकानामेकेऽभिहिताऽन्वयवादिनो भाट्टास्तात्पर्याख्यामपरां वृत्तिम् उररी कुर्वन्ति । तेषामयमाशय:––देवदत्तो ग्रामं गच्छतीत्युक्ते देवदत्त इति पदस्य तन्निरूपितव्यक्तिविशेषरूप:, तत्रस्थस्य सु प्रत्ययस्य कर्तृत्वरूप:, ग्रामपदस्य तन्निर्दिष्टगृहसमवायरूप:, तदनन्तरवर्तिनोऽम् प्रत्ययस्य कर्मत्वरूप:, गच्छतीति पदस्य वर्तमानकालिकी गमनानुकूला कृतिरिति चार्थो यद्यपि प्रातिस्विकतया पृथक् पृथक् प्रतीयते तथापि देवदत्तनिष्ठा ग्रामकर्मिका वर्तमाना गमनानुकूला कृतिरितिरूपमन्वितमर्थमभिधातुं नाभिधा क्षमते; तस्या: पदार्थोपस्थापनमात्रेण प्रक्षीणशक्तित्वात् । अतस्तत्कृते काचिदपरा वृत्तिरवश्यमभ्युपेया सा च तात्पर्याख्या । दृश्यते हि कदाचित्प्रतिपदमर्थविबोधेऽपि न वाक्यतात्पर्याऽवगम: । तदुक्तं साहित्यदर्पणे श्रीविश्वनाथै:––

तात्पर्याख्यां वृत्तिमाहु: पदार्थाऽन्वयबोधने ।
तात्पर्यार्थं तदर्थं च वाक्यं तद्बोधकं परे ॥
सा० द० २।२०

एतद्विपरीतं प्रभाकरानुवर्तिनोऽपरे मीमांसकास्तु––अन्वितान्येव पदानि प्रथमतोऽभिधीयन्ते अतस्तेषामनन्तरमन्वययोजनं तदर्थमपरावृत्तिश्च नाऽपेक्ष्यते इत्याहु: । वाक्यं हि भाषाया मूलघटकं तच्च अन्वितमेव । बालकोऽन्वितैर्वाक्यै: देवदत्त गामानय, गां बधान अश्वमानयेत्यादिरूपैर्भाषां शिक्षते न अनन्वितै: पदैरिति प्राक् प्रतिपादितम् । इति व्यञ्जनाप्रकरणं समाप्तम् ।

इति चतुर्थ उन्मेष:

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गणतन्त्राभिनन्दनम्

श्री नारायण शास्त्री काङ्करः

गणतन्त्र ! नमस्तुभ्यं
सर्वतस्तेऽभिनन्दनम् ।
प्राणप्रियस्त्वमस्माकं
कुर्मस्ते स्मरणं वयम् ।।१।।

पूर्वजानां महात्यागात्
कठोरात् तपसस्तथा ।
त्वामासाद्य वयं सौख्यं
स्वातन्त्र्यस्य लभामहे ।।२।।

त्वत्कृपातोऽधुनास्मासु
शासका न विदेशिनः ।
स्वदेशिनो वयं कुर्मः
स्वयमात्मसु शासकान् ।।३।।

स्वतन्त्रो जायते प्राणी
स्वतन्त्रो म्रियते च सः ।
जन्ममृत्योर्द्वयोर्मध्ये
परतन्त्रः कथं स हि ।।४।।

कृत्रिमं पारतन्त्र्यं न
रोचयामो वयं क्वचित् ।
स्वातन्त्र्यं ये समीहन्ते
वयं तेषां सहायकाः ।।५।।

इमं स्वभावमस्माकं
परिचिन्वन्ति ये जनाः ।
आत्मीया इव भूत्वा ते
मैत्रीं कुर्वन्त्यकृत्रिमाम् ।।६।।

केवलं दोष एकोऽयं
गणतन्त्र! त्वयि प्रभो!
राजानं यत्र मत्वा स्वं
कश्चित् कञ्चिन्न मन्यते ।।७।।

अत एव महत् खातं
शासके शासिते पुनः
उद्भूय त्वद्विनाशाय
पुर आयाति भीषणम् ।।८।।

अस्मासु भारतीयेषु
त्वत्प्रियेष्वितरेषु च ।
दुर्दशेयं न जायेत
परेशं प्रार्थयामहे ।।९।।

धारयन्तो वयं साम्यम्
अन्योन्यं सुख-दुःखयोः ।
छत्रच्छायां तवातुल्याम्
आवसाम सदैव हि ।।१०।।

विद्या बुद्धिः सदाचारो
जलमन्नं धनं बलम् ।
शुद्धा भक्तिः परेशे च ।
सर्वमेतत् सदाऽस्तु नः ।।११।।

अधिकारं धनं भूमिं
यशः स्त्रीं च परस्य हि ।
अपहर्त्तुं बलादिच्छा
जायतां नहि कस्यचित् ।।१२।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुर्भावना न जायेत
द्वेषो नश्यतु नाशकः ।
कुदृष्टिर्न भवेत् क्वापि
प्रसादोऽस्तु पदे पदे ॥१३॥

अन्योन्यं वर्धतां प्रेम
नाशुभं कोऽपि चिन्तयेत् ।
मित्रस्य चक्षुषा पश्यन्
कुर्यात् सर्वः सहायताम् ॥१४॥

शासकः शासितः सर्वः
सुमना जायतां सदा ।
मिथो वञ्चयतां नासौ
स्वीयं कार्यं करोतु च ॥१५॥

शिक्षा व्यर्था न दीयेत
जीविका न मिलेद् यया ।
बुभुक्षितो न जानाति
पापं पुण्यं च कर्हिचित् ॥१६॥

स्त्रीणां भवतु सम्मानः
कश्चित् ता नैव धर्षयेत् ।
तासामन्तर्व्यथाशापात्
समृद्धिर्हि विनश्यति ॥१७॥

ददतां गुरवो विद्यां
शिष्याः संगृह्णतां च ताम् ।
सर्वकारो नियुञ्जीत
यथास्थानं च तान् बुधान् ॥१८॥

निर्भया निरहंकारा
नीरोगाश्च निरागसः ।
निरीर्ष्या निरपस्माराः
सर्वे सन्तु सदाशयाः ॥१९॥

कञ्चित् सन्तापयेन्नैव
बृहतीयं महार्घता ।
विकार्यताऽपि कञ्चिन्न
क्षीणं कुर्यात् कदाचन ॥२०॥

भारतं भा-रतं भूयात्
संस्कृतं स्याद् गृहे गृहे
विश्वस्मिन् भ्राजतां विश्वे
संस्कृतिः संस्कृताश्रिता ॥२१॥

माहात्म्यं तेऽद्भुतं ख्यातं
गणतन्त्र महाप्रभो !
शरणं त्वां समायाता
अस्मात्कामं प्रपूरय ॥२२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रहस्थितजीवने प्रभावः

श्री विद्याभूषणः गणेशराम शर्मा

विफलान्यन्यशास्त्राणि विवादस्तेषु केवलम् ।
प्रत्यक्षं ज्यौतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ ।।१।।

अयि वेदवेदाङ्गदर्शनसाहित्यादिविविधविद्यापारावारपारीणा ज्ञानविज्ञानसम्पन्नबुद्धयः सकलकलाकलापकुशलाः श्रद्धाविश्वासभाजः सम्माननीया विद्वांसो महाभागाः ! सततसामयिक साहित्यानुशीलनप्रवणाः प्रियाः पाठकबन्धवो महानुभावाश्च ! जानन्त्येवात्रभवन्तो भद्रभव्यभावानुभूतिशीलाः प्रौढानुभवशालिनः सज्जना यदिह भौतिकविज्ञानार्थशास्त्रराजनीतिवाणिज्यव्यवसायप्रधाने परमाणूदजनविस्फोटनाप्तामोघशक्तिसंदृप्ते विद्युद्गतितीव्रतमजवे युद्धाग्निविभीषिकासंत्रस्ते सर्वतः सर्वराष्ट्रप्रजाजनजीवनसंघर्षतरलेऽस्मिन्नवसभ्यताविकाशयुगे केचन दुराग्रहग्रहग्रस्ता उदरभरणमात्रपुरुषार्थवादिनो यन्त्रैकशरणचेतनाः परदेशीयाचारविचारधाराचाकचक्यचञ्चलचेतसः स्थूलबुद्धयो जडसभ्यताग्रहग्रहिला जनाः प्राच्यं प्रतीच्यं ज्ञानं विज्ञानं तत्त्वतः पूर्णतया साधिकारं न जानन्तोऽस्य ब्रह्माण्डस्य सृष्टिस्थितिलयकारणे परमात्मनीश्वरे तत्प्रेरितशक्तीनां सत्तायां चाश्रद्दधाना भारतीयवेदवेदाङ्गदर्शनशास्त्रतत्त्वसिद्धान्तान् केवलं कपोलकल्पनाकल्पितानिव निस्सारान् सर्वांशतो मिथ्या प्रमाणयितुं दुश्चेष्टन्त इति विशेषतो वैदिकयज्ञानुष्ठानकर्मकाण्डविज्ञाने प्राचीनायुर्वेदचिकित्सापद्धतौ फलितज्यौतिषतन्त्रे तु नवशिक्षातानामेतेषां नांशतोऽपि श्रद्धाभावलवलेशो विद्यते ततस्ते ज्यौतिषशास्त्रस्य फलिततन्त्रोक्तग्रहप्रभावाणां सत्यत्वेऽतिशयसंशयाः परप्रत्ययनेयबुद्धयः सन्देहोद्भान्तमस्तिष्काः फलादेशसिद्धान्तमकर्मण्यानां दैववादं रूढीवादं च जोघुष्यमाणाः सदा दैवज्ञानाक्षिपन्ति । केचित्पुनरास्तिक्यभावापन्नाः स्वयं भारतीया भगवति परमेश्वरे तत्प्रयोजितानां दैवीशक्तिनाम् सत्तायां वहुविश्वसन्तोऽपि च वर्त्तमानविश्वस्य नानाराष्ट्राणां नव्यवैज्ञानिकैः सप्रयोगं सप्रमाणं प्रत्यक्षं च प्रतिष्ठापितस्य विज्ञानविकाशक्रमस्य तत्त्वावबोधाय यावदपेक्षितं बौद्धिकं स्तरमस्पृशन्तः संकीर्णहृदयत्वाच्छ्रद्धाजडतां रूढिवादप्रियतां कूपमण्डूकत्वं द्रढयन्तः स्वदेशीयानाम् तत्तच्छास्त्राणामधीतिबोधाचरणप्रचारणैः प्राप्यं पारमार्थिकं ज्ञानं सोपपत्तिकं चानासाद्य जीविकावृत्तिनिर्वाहमात्रपर्याप्तं ज्यौतिषायुर्वेदादिविद्यानां केवलं पल्लवग्राहिपाण्डित्यं समाश्रयन्तोऽन्धेन नीयमाना अन्धा इव प्रजासु बुद्धिभेदं जनयन्तो भ्रमोत्पादनं कुर्वन्ति । परिणामतोऽस्माकं भारतीयं ज्योतिर्विज्ञानं प्रखरं भास्वरं प्रत्यक्षं सदपि कैश्चित् स्वार्थपरायणैर्नक्षत्रसूचिभिर्याचकैर्मौहूर्तिकैश्चापकर्षतां नीतं किञ्चित्कलुषितं मलिनीकृतमिव च दृश्यते । प्राचीना नवीना वानभिज्ञास्तत्तद्विद्यानां साङ्गोपाङ्गं तलस्पर्शि पारमार्थिकं निगूढं ज्ञानमनाश्रयन्तो गम्भीरतत्त्वावबोधे मोमुह्यन्ते चेत्तदतीव स्वाभाविकम् । परदेशीयाः प्रजाः कामं किमपि वदन्तु भारतीयानां विद्यानां विषये परन्तु महद्दुःख तु तदा जायते मार्मिकाणां यदास्माकं राष्ट्रनेतारः प्रामाणिकाः पुरुषाः शिक्षिता विज्ञा वैज्ञानिकाः स्वात्मानं शिक्षितं दीक्षितं सभ्यम्मन्याश्चापि स्वदेशस्य कला विद्या ज्ञानं विज्ञानं प्रति तत्तद्विद्याविशेषज्ञान् विदुषः प्रति चानास्थाम - श्रद्धां जुगुप्सां तिरस्कारभावनां च प्रथन्ते । एवं सति फलिततत्त्वसिद्धान्तनिरूपणमद्यत्वे कियत्कठिनं कष्टसाध्यं वारण्यरोदनमिवमोघं भवतीति सरलतयानासं चानुमातुं शक्यते विचक्षणैः पाठकैः । साध्वाह श्रीमान् भास्कराचार्यवर्यः सिद्धान्तशिरोमणेर्गोलाध्याये:—

"ज्योतिः शास्त्रफलं पुराणगणकैरादेश इत्युच्यते,
नूनं लग्नबलाश्रितः पुनरयं तत्स्पष्टखेटाश्रयम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ते गोलाश्रयिणोऽन्तरेणगणितं गोलोऽपि न ज्ञायते, तस्माद्यो गणितं न वेत्ति स कथं गोलादिकं ज्ञास्यति ।। ।।१।।

सत्यप्येवमत्राद्य भारतीयज्योतिर्विज्ञानदृशा फलितसिद्धान्तमधिकृत्य सर्वेषामपि जडचेतनानां जीवने खगोलस्थानां ग्रहाणां प्रभाव: पतति न वा ? यदि च पतति तदा स: कथं बोधगम्य: स्यात् ? ग्रहाणां प्रभाव: पतितोऽपि स खलु निवार्यो वानिवार्यो वा भवितुमर्हति नवेति विषयेष्वेषु कश्चिद्विमर्शो बुधानां सर्वसाधारणानां पाठकानां च पुर: समुपस्थाप्यते प्रसंङ्गात् । ज्ञानस्यानन्तत्वान्मानवबुद्धेरल्पत्वात्तत्तद्विषयेष्वल्पज्ञत्वाच्चात्र विषये प्रमेयोपपादने गच्छतो मे प्रमादात्स्खलनानि विशेषज्ञा बुधा: क्षाम्यन्त्विति विनिवेद्य प्रकृतमनुसरामि:--

एतत्तु नास्तिका आस्तिका: पण्डिता मूर्खा ज्ञानिनो विज्ञानविद: सर्वेऽपि स्वजीवने प्रतिदिनं प्रत्यक्षमेवानुभवन्ति स्वप्रतीते: प्रामाण्यात् स्वीकुर्वन्ति च यदाकाशे संचरतां केषांचिज्ज्योतिष्पिण्डानां स्थूलो वा सूक्ष्मो वा महीयान् वाल्पीयान् वा प्रभावो विश्वस्य सर्वेष्वपि च भूभागेषु दिग्दिगन्तेषु सर्वेषु सचेतनेषु जीवेषु पदार्थेष्वपि च सदा सर्वदा सर्वत: सर्वत्र न्यूनाधिकं निश्चयेन पततीति । तत्रापि केषांचिन ग्रहनक्षत्रतारकाणां प्रभावस्तथा परिपतन् दृश्यते यश्चर्मचक्षुर्भ्यामेवानुभवितुं शक्यते । उदाहरणार्थं तावत्सूर्यस्यैव प्रभावं वयमत्र किञ्चिच्चिन्तयेम चेत्तदा स्थितिसुस्पष्टा जायेत तथाहि--

प्रातर्यदा सूर्य: पूर्वाकाशक्षितिजे समुदेति तदा तस्य किरणजालं भूमावन्तरिक्षे सर्वासु दिक्षु च प्रसरति । तस्यालोक: सर्वं वै ब्रह्माण्डं व्याप्नोति । तस्यातपऊष्मा च सर्वत्रानुभूयते । मानवा: पशव: खगा: सरीसृपा: कीटा: पतङ्गादयश्च सर्वेऽपि जीवा: सूर्योदयात् स्वजीवने कामपि नवीनामेव संजीवनीं शक्ति, कर्मक्षमतां, स्फूर्तिं चासाद्य सद्यश्चेतनां बलमोज:, क्रियाशक्ति, कर्मक्षमतां वात्मनि विदन्त: सोत्साहं कर्मसु प्रवर्तन्ते । न केवलं सचेतनां एवापि तु जडपदार्थाश्चापि सूर्यप्रकाशेन प्रभाविता इव परिलक्ष्यन्ते । सूर्यरश्मिभि: स्पृष्टा जलाशयास्तरङ्गिता भवन्ति । वृक्षा लता गुल्मा: पादपा: पत्राणि पुष्पाणि मञ्जर्य: फलानि च कामपि नव्यां शोभां दधते । समस्ताया: पृथ्व्या: सौन्दर्यं सूर्यकिरणानुप्राणितमुच्छ्वसतीव राजते । निखिलमपि स्थावरजङ्गमं जगत् सत्यं प्रियमानन्दमयमिवाभाति । प्रात: सूर्योदयसमयेऽस्वस्था रुग्णा: पीडिता अपि प्राणिन: किञ्चिदाश्वस्ता इव स्वास्थ्यं सुखं शांति चात्मनि सम्भावयन्ति । कोनु खल्वेवंविधो भवेत् सचेतनो यो हि सूर्यस्य प्रकाशोष्मणो: प्रभावं प्रत्यक्षमेव परिपतन्तं न स्वीकुर्वाण: स्यात् ? सूर्योदयादेवास्य विश्वस्य वृत्तिचक्रं गतिशीलं भवति, तदस्तमनेन च शैथिल्यं वा निवृत्ति वाश्रयते । सूर्योदयादेव सापेक्षिकस्य कलनात्मकस्य कालस्य गणनारम्भो भवति येन प्राणा विकला: कला: पलानि घटिका: प्रहरा दिवसा रात्र्य: सप्ताहा: पक्षौ मासा ऋतवोऽयनानि वर्षाणियुगादीनि च सर्वाणि जायन्ते । सूर्यस्य प्रकाशतापोष्मभिरेव मेघोत्पत्तिर्जलवर्षणमृतुपरिवर्तनं कृषिकर्मसु धान्यांकुर रोहा वृक्षादीनां विकाशोजलवायुशुद्धि: श्वेतपीतरक्तहरितकृष्णकर्बुरादीनां वर्णानां पृथक् पृथक् प्रतीतिर्दूषितबाष्पपरमाणूनां शोष इत्याद्या: परिणामा भवन्ति । संक्षेपादिदमेव निवेदनं पर्याप्तं यदणुपरमाणुपर्यन्तं सर्वमपि जगत् सूर्यसाक्षिकं स्पन्दते, स्वस्थितिं च परिपालयति । एवं सति सूर्यस्य तमिमं प्रत्यक्षं प्रभावं को नाम न मन्येत ? तत एवहि प्राचीना मन्त्रदृष्टारो महर्षयो नवीना वैज्ञानिकाश्च रविरश्मिषु जीवनदायकममृतमयं किमप्यविनाशितत्त्वं निहितं समर्थयन्ते । नवीना वैज्ञानिकास्तु स्वप्रयोगशालासु बहुयन्त्रोपकरणानां साहाय्येन लोकजीवनोपयोगिनां सूर्यकिरणान्त:स्थितानाम् तत्त्वानां (Cosmic Rays) ब्रह्माण्डकिरणा:, (Ultra

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Violet Rays) अस्तित्वं सप्रमाणं योगसिद्धं चामनन्ति । सूर्योष्मणाग्नीन्धनविद्युच्छक्तिप्रयोगैर्यन्त्रसञ्चालनं कर्तुम् प्रयतन्ते वैज्ञानिकाः । नव्या वैज्ञानिकास्तु चन्द्रलोकयात्राम् भौमगुरुशुक्रमण्डलयात्रामपि कर्तुं चेष्टमानाः सन्ति । इत्थं सुदूरमूहापोहानन्तरं त्वज्ञाजडामन्दमतयो मूर्खाश्चापि सूर्यस्यातपप्रकाशोष्मणां प्रभावं स्वीकुर्युरेव किन्तु नवशिक्षितानां पुरतः–"सूर्य आत्मा जगतस्तस्थुषश्च" । अथवा "आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च । हिरण्ययेन सविता रथेन देवो याति भुवनानि पश्यन्" ।।१।। किंवा " नवो नवो भवति जायमानोऽन्हां केतू रुचसामेत्यग्रं भागम् । विदधात्ययन्नं प्रचन्द्रमाः स्थिरं ते दीर्घमायुः ।।२।। अपि च– "योऽसावादित्ये पुरुषः सोऽसावहम् ।।३।।" इत्यादीनि श्रुतिवचनानि गम्भीरज्ञानविज्ञानानुभवशबलानि समुच्चारणन् कोऽपि भारतीयः शास्त्रज्ञो विद्वान् वेदशास्त्र प्रामाण्यात् सूर्यस्य चान्येषां ग्रहाणां प्रभावसम्बन्धिनं सत्यसिद्धान्तं त्रिकालाबाधितं किलाव्यभिचारि प्रमाणयति तदा स्थूलधियोऽद्यतनाः केवलं भौतिकविज्ञानमेव विद्यासर्वस्वं मन्यमानाश्चाक्षुषप्रत्यक्षगम्येऽप्यत्र सुस्पष्टे विषये विप्रतिपद्यमानाः' सहसा सहमता न भवन्ति, नैव भवन्तीत्यहो तेषां बोधदारिद्रयमज्ञता ज्ञानरंकता चेति वक्तव्यं भवेत् ।

न केवलं सूर्यस्यैवैकलस्य भावोऽस्मिञ्जगति विद्यते प्रत्यक्षं प्रत्युतान्येषामपि चन्द्रादीनां ग्रहाणामपि प्रकाशादीनां प्रभावो भवति नूनम् । विषयमेतं समधिकं स्पष्टीकर्तुमधुना सूर्यवच्चन्द्रस्यापि प्रभावविषये किञ्चिदुच्यते–चन्द्रस्तावज्जलपिण्डरूपः । अर्थाच्चन्द्रमसि जलीयतत्त्वानां तरलरसरूपाणामाधिक्यं वर्तते । स च पुनः सूर्यकिरणस्पर्शादेव प्रकाशते । स्वयं जलरूपोऽपि चन्द्रमाः सूर्यरश्मिभिः सम्पृक्तः शीतलां द्युतिं ज्योत्स्नारूपां सर्वतो दिक्प्रसारयति । तदेवाहुर्भास्कराचार्यवर्याः––

"तरणिकिरणसङ्गादेष पीयूषपिण्डो,
दिनकरदिशि चन्द्रश्चन्द्रिकाभिश्चकास्ति ।
तदितरदिशि बालाकुन्तलश्यामलक्ष्मी–
र्घट इव निजमूर्तिश्छाययैवातपस्थः ।।१।।

सोऽयं चन्द्रः शीतलां द्युतिमात्मीयां विकिरञ्जागतिकान् सर्वांश्चेतनाचेतनान् प्रभावयति स्वचन्द्रिकाकिरणजालैः । यथा सूर्ये प्रकाशोष्णताधिक्यं तथैव चन्द्रे रसाधिक्यं शीताधिक्यं च वर्तते । यतश्चन्द्रकिरणानां प्रभावः शीतलो रसमयश्चाल्हादकरोऽनुभूयतेऽस्माभिः । चन्द्रस्य किरणानां सूक्ष्मप्रभावान्मनः प्रहृष्यति, जलं तरङ्गायते । वनस्पतिष्वोषधिषु रसात्मकेषु तरलद्रव्येषु च रसपरिपाकस्तरलतादयो गुणाः सम्भवन्ति । चान्द्रमसं ज्योतिर्जीवानां भौतिके देहे तथौषधिप्रभृतिषु पदार्थेषु च रसं पुष्णात्यमृतमयरश्मिभिस्तस्मादेवायमोषधिपतिरित्युच्यते । मानवानाम् व्यष्टिपिण्डे मनस्तत्त्वप्रतिष्ठा चन्द्रमसएव भवति । तदेवोक्तं श्रुतौ– "चन्द्रमा मनसो जातश्चक्षोः सूर्योऽजायत । श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ।।१।। इति । स्मृतिप्रस्थानेऽपि गीतासु भगवत्पादा इममेवार्थं प्राहुः–"युष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ।।" (गीता, अध्यायः १५, श्लोकः १४) ।

पुनः सर्वेषां सचेतनानां प्राणिनां मनस्तत्त्वनिर्माणे चन्द्रमसस्तेजसो महत्त्वपूर्णः प्रभावो भवति । एवमेव सर्वेषामेव ग्रहाणां तत्तत्तेजोविशेषाणां प्रभावाः सचेतनेष्वचेतनेष्वपि चानिवार्यतया पतन्ति । प्रत्यक्षमनुभूयमानेऽस्मिन् विषये नास्त्येवाणीयानपि संदेहशंकावसरस्तथापि विषयस्यास्य स्पष्टीकरणाय सर्वेषामेव ग्रहाणाम् प्रभावविषये श्रीमद्वराहमिहिराचार्यैर्बृहज्जातके प्रोक्तमेतच्छन्दोऽवधीयतामत्र प्रसङ्गोपात्तम्:––

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"कालात्मा दिनकृन्मनस्तुहिनगुः सत्त्वं-कुजोवचो,
जीवो ज्ञानसुखेसितश्च मदनो दुःखं दिनेशात्मजः ।
राजानौ रविशीतगू क्षितिसुतो नेता कुमारो बुधः,
सूरिर्दानिवपूजितश्चसचिवौ प्रेष्यः सहस्रांशुजः ॥१॥"

अस्यायमभिप्रायो यत् सचेतनानां प्राणिनाम् किलात्मतत्त्वनिर्माणे सूर्यतेजसस्तन्मात्राणां, मनस्तत्त्वप्रतिष्ठायां चन्द्रमसः, बलसञ्चारे भौमस्य, वाग्विकाशे बुधस्य, ज्ञान-सुखयोः प्रतिष्ठायां बृहस्पतेः, कामसंकल्परचनायाम् शुक्रस्य, दुःखानुभूतिसंवेदनादितत्त्वावस्थितौ शनेश्च तेजस्तन्मात्राणां प्रामुख्येनोपयोगो भवति । एवं हि जीवे पृशासनाधिकारक्षमतानिर्माणे सूर्यचन्द्रयोः, नेतृत्वशक्तिसञ्चारे भौमस्य, क्रीडाप्रियत्वसौकुमार्यमार्दवादिगुणरचनायां बुधस्य, मन्त्रित्वराजनीतिज्ञतादिगुणक्षमतानिर्माणे गुरुशुक्रयोस्तथा च दूतत्वादिगुणनिर्मितौ शनैश्चरस्य तेजसः सुमहान् प्रभावो भवति ।

नायं कल्पनाप्रसूतो भावात्मको वादविशेषः । वैज्ञानिकेन दृष्टिकोणेन विश्लेषणान्मनोबुद्धीन्द्रियगोचरो ज्ञानगम्योऽयं विषयः । वस्तुतो ग्रहाणां स्थितिः खगोले सौरमण्डले वर्तते । स्वस्वकक्षासु स्वकीयं गतिक्रममन्वटन्तो ग्रहास्तत्रत्ये वातावरणे स्वतेजसामाकर्षणविकर्षणाभ्यां ग्रहान्तन्यान्भूमिमण्डलं सर्वानपि खगोलस्थान् ज्योतिर्मयनक्षत्रतारकापिण्डान् प्रभावयन्तो भवन्ति, स्वयं चान्येषां तेजोरश्मिपुञ्जैः प्रभाविताः सन्तो निखिलब्रह्माण्डस्थलोकांस्तत्रस्थाञ्जडचेतनांश्च स्वप्रकाशावपातानुपातप्रमाणं प्रभावयितुं प्रभविष्णवो भवन्ति । अतोऽत्र सौरे जगति वर्तमानस्य ग्रहनक्षत्रमण्डलस्य यथार्थस्थितिपरिचयाय किञ्चिदुच्यतेऽधस्तात् :—

"भूमेः पिण्डः शशांकज्ञकविरविकुजेज्यार्किनक्षत्रकक्षा
वृत्तैर्वृत्तोवृतः सन्मृदनिलसलिलव्योमतेजोमयोऽयम् ।
नान्याधारः स्वशक्त्यैव वियति नियतं तिष्ठती हास्यपृष्ठे
निष्ठं विश्वं च शश्वत्सदनुजमनुजादित्यदैत्यं समन्तात् ॥
॥१॥"

"सर्वतः पर्वतारामग्रामचैत्यचयैश्चितः ।
कदम्बकुसुमग्रन्थिः केसरप्रसरैरिव ॥२॥"

—श्रीमद्भास्कराचार्यः, सिद्धान्तशिरोमणौ

अत्र श्रीमद्भास्कराचार्यकृतं वासनाभाष्यमपि दृश्यताम्:—

योऽयं मृदनिलसलिलव्योमतेजोमय इतिपांचभौतिको भूमेः पिण्डो वर्तुलाकारस्तद्बहिःस्थैः शशांकादिकक्षावृत्तैरावृतः सन्नन्याधारः स्वशक्त्यैव नियतं निश्चितं वियत्याकाशे तिष्ठति । तत्पृष्ठनिष्ठं च जगत् । सदनुजमनुजादित्यदैत्यम् । दनुजा दानवाः । मनुजा मानवाः । आदित्या देवाः । दैत्या असुराः । तैः समेतं समन्तात् तिष्ठति । शेषं स्पष्टार्थम् ।

श्रीमद्भास्कराचार्यैः सिद्धान्तशिरोमणेर्गोलाध्याये यद् भारतीयखगोलविज्ञानोक्तप्रकारेण ग्रहादीनां स्थानादिकमुपवर्णितं तत्र सर्वादौ केन्द्रमध्यवर्ति भूमण्डलं, ततो विधुबुध-शुक्र-सूर्य-भौम-गुरु-शनीनां कक्षावृत्तानि क्रमशो वर्तन्ते, ततो नक्षत्रमण्डलमास्त, इत्येव भारतीयज्यौतिषाचार्योक्तः खगोले भूमण्डलग्रहमण्डलानां कक्षाक्रमः ।

श्रीभास्कराचार्यवर्यैः स्वकीयस्य सिद्धान्तशिरोमणिग्रन्थस्य गोलाध्याये या ग्रहस्थितिर्भूमिं केन्द्रं मत्वा वर्णिता तां सम्यगवबोद्धुमेकं चित्रमधस्तादीयते, तत्साहाय्येन पाठकाः स्पष्टं ज्ञातुं शक्नुयुः—

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वसन्तोत्सव (होलिका पर्व) सन्देशः

आचार्य धर्मदेवो विद्यामार्तण्डः (देवमुनिर्वानप्रस्थः)

सदा प्रसन्ना भवतेह सन्तः,
'वसन्तवल्लोक इहाचरन्तः ।'
दुःखं परेषामपि दूरयन्तः,
सद्धृदया देववरं स्मरन्तः ॥

देवोऽस्ति नित्यं करुणाकरोऽसौ,
शान्तेः प्रहर्षस्य विधायकोऽसौ ।
तमेव नित्यं मुदिता भजध्वं,
ध्याने तदीये सततं रमध्वम् ॥

लीला तदीया सुखदास्त्यनन्ता,
गायन्ति तां शुद्धधियो हि सन्तः ।
दिशन्ति नित्यं प्रदिशो हसन्ताः,
विलोक्य तां नित्यमिहारमध्वम् ॥

न रोदितुं विश्वमिदं विचित्रं,
विनिर्मितं तेन दयामयेन ।
अस्मान् सुतान् मोदयितुं सदासौ,
लीलां मनोज्ञां तनुते समन्तात् ॥

सन्मोदमत्ता भवताप्रमत्ताः,
स्वकीयधर्मं परिपालयन्तः ।
सदा हसन्तश्चरितैः पवित्रैः,
जनान् समस्तानपि हासयन्तः ॥

अयं वसन्तोत्सव एतमेव,
ददाति सन्देशमनुग्ररुपम् ।
'प्राञ्चो अगाम नृतये हसाय,'
वेदस्य सन्देशमिमं श्रृणुध्वम् ॥

गुरुकुल पत्रिका के नियम

१ 'गुरुकुल पत्रिका' मासिक है । यह प्रत्येक अंग्रेजी मास की १२, १३ तारीख को प्रकाशित होती है ।

२ यह आधी संस्कृत में तथा आधी हिन्दी में होती है । इस में कवर समेत प्रायः ४४ पृष्ठ होते हैं । वर्ष में एक या दो विशेषांक लगभग १२०-१५० पृष्ठों तक के होते हैं ।

३ इसमें प्रमुख रूप से लेख वैदिक-साहित्य, भारतीय-संस्कृति-सम्बन्धी होते हैं ।

४ वार्षिक मूल्य देश में ४) और विदेश में ७) है, जो धनादेश (मनीआर्डर) द्वारा ही "**सम्पादक : गुरुकुल-पत्रिका**" के नाम से आना चाहिए । ग्राहक कभी भी बन सकते हैं ।

५ लेख छोटे, सारगर्भित तथा मौलिक होने चाहिएं । शुद्ध, सुपाठ्यातथा कए ओर लिखे होने चाहिएं । लेख, कविता तथा समालोचनार्थ पुस्तकें (२ प्रतियां), परिवर्तनार्थ पत्र-पत्रिकाएं सम्पादक के नाम भेजनी चाहियें ।

६ किसी लेख अथवा कविता आदि के प्रकाशित करने या न करने, घटाने-बढ़ाने या संशोधन करने का अधिकार सम्पादक को है । बिना डाक खर्च भेजे अप्रकाशित कविता वा लेख लौटाये न जा सकेंगे ।

सम्पादक—गुरुकुल पत्रिका, डाकघर : गुरुकुल कांगड़ी
जिला : सहारनपुर (उ० प्र०)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ प्रकाशाभ्युदयोनाम

डा. मंगलदेव शास्त्री

महाविद्यालयस्य द्वितीयोपाधिवितरणोत्सवोऽनुसन्धानसंस्थान-प्रारंभोत्सवश्च

१९४७ वर्ष इव १९४८ वर्षेऽपि ३०।१।१९४८ दिनांके महाविद्यालयस्य द्वितीयोपाधिवितरणोत्सवो निरवर्त्तत यथापूर्वं महता समुत्साहेन । तेनैव सह तस्मिन्नेव दिनांकेऽनुसन्धानसंस्थानप्रारम्भोत्सवोऽप्यभवत् । तस्मिन्नुत्सवे सभापतिरासीत् प्रान्तीय-शिक्षामन्त्री माननीय श्रीसंपूर्णानन्दः, प्रवक्ता च म० म० श्री पं० गिरिधरशर्मचतुर्वेदः ।

उत्सवद्वयानन्तरमामन्त्रितानां महानुभावानां विशेषातिथीनां च सभाजनार्थमुद्यानगोष्ठी प्रस्तुतासीत् । तस्याश्च प्रायेण समाप्तेरनन्तरमेव प्रस्थितेषु प्रस्थानोन्मुखेषु चातिथिषु सहसा विश्वस्य जगतो वज्राघात इव विश्ववन्द्यस्य महात्मनो गान्धेः प्राणहत्याया वृत्तान्तः श्रुतिपथमागतो वेपमानहृदयानां साश्रुमुखानां च सर्वेषामुपस्थितानाम् ।

स्वर्गस्थितानां सहसा नरकस्य दुःखसागरे पातनमिवान्वभूम सर्वेऽपि वयं तत्रोपस्थिताः !!! हा ! हन्त ! महद् दुर्भाग्यमेतन्न केवलं भारतस्य, किन्तु सर्वस्यापि जगतः !!!

सत्याहिंसावतारो वै चिरदास्यादमोचयत् ।
चारित्र्यस्य बलेनैव भारतं, महदद्भुतम् ! ॥१॥
विश्ववन्द्यो महात्मा यो दीनोद्धारायणः ।
सर्वोदयमहामन्त्रऋषिर्हन्त ! हतोऽद्य सः ! ॥२॥

हृदयोन्माथिनी वेदनैषा सर्वैरप्यन्वभावि तदा ।

उत्तरप्रदेशीय संस्कृतपाठशाला पुनर्व्यवस्था-समितिः
(१९४७–१९५०)

महाविद्यालयीयवृत्तान्तस्य मध्येऽस्याः समितेर्विषयेऽपि किञ्चित्कथनमावश्यकम् । महाविद्यालयस्य प्रधानाचार्यपदमधितिष्ठतो मम पदेन प्रदेशीय संस्कृतपाठशालाभिः सहापि नैकरूपः संबन्ध आसीदिति पूर्वमुक्तम् । ततश्चास्याः समितेरुल्लेखोऽत्र नैवाप्रासंगिकः ।

१७-११-१९४७ दिनाङ्के शासनेन समितिरेषा न्ययुज्यत । अस्याः सदस्या एवमासन्—

(१) डा० मङ्गलदेव शास्त्री, सभापतिः ।
(२) पं० त्रिभुवनप्रसादोपाध्यायः (संस्कृतपाठशालानिरीक्षकः) ।
(३) पं० अलगूरायशास्त्री (एम.एल.ए.) ।
(४) पं० कमलाकान्तमिश्रः (गोइनकासंस्कृतमहाविद्यालयस्य प्रधानाचार्यः) ।
(५) डाक्टर बाबूराम सक्सेनामहोदयः, प्रयाग-विश्वविद्यालयात् ।
(६) म० म० श्रीगिरिधरशर्मचतुर्वेदः ।
(७) श्रीहरिदत्तशास्त्री, संस्कृतपटलस्य सदस्यः (शिक्षासंचालकद्वारा नियुक्तः ।

पं० शिवनाथ झारखंडी (सरस्वती भवन पुस्तकालयाध्यक्षः) असदस्यो मन्त्री । परं शिवनाथझारखंडी महोदयस्य, स्वपदादवकाशग्रहणकारणात्तस्य मन्त्रित्वपदं १५।४।१९४८ दिनांके प्रथमं पं० श्रीकुबेरनाथशुक्लेन, तदनन्तरं च श्रीवीरेन्द्राग्निहोत्रिणा गृहीतमासीत् ।

समितेः प्रगतिः प्रतिवेदनं तत्परिणामश्च

समितेः प्रथमाधिवेशनं २४–२७।६।१९४८ दिनांकेषु अन्तिमं चाधिवेशनं २३।३।१९५० दिनांकेऽभवत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समित्या तत्तदुपायैः पूर्णसावधानतापूर्वकं स्वविचारणीयविषयाणां सम्यगध्ययनं विवेचनं च विधाय स्वकीयप्रतिवेदनं यथाविधि प्रस्तुतीकृत्य सर्वसंमत्या सहस्ताक्षरं स्वीकृत्य च स्वसभापते-र्डाक्टरमङ्गलदेवशास्त्रिणो द्वारा ६।४।१९५० दि-नांके शासनसन्निधे प्रेषितम् ।

अज्ञातकारणैस्तत्प्रतिवेदनं न कदापि प्रकाशि-तमभवत् । प्रतिवेदनेन प्रकाशमानीता नैकपाठशा-लानां दुरवस्था कदाचित्तस्यैकं कारणं भवेत् । सभापतिना स्वयं निरीक्षितासु पाठशालासु यत्रतत्र मिथ्यापाठशालाः (= केवलमर्थोपार्जनार्थं तथा जनताया वञ्चनार्थमपि स्थापिताः पाठशालाः) अपि दृष्टिपथमागताः !

तथापि नात्र संदेहो यत्प्रतिवेदनेनानेन महदु-पकृतं पाठशालानाम् । पाठशालानां प्रगत्यै यदपि कार्यम् (अध्यापकानां वेतनवृद्धिः, आर्थिकसहायता-या वृद्धिः, तासां वर्गीकरणम्, निरीक्षकाणां संख्यायां वृद्धिरित्यादिकम्) शासनेन तदनन्तरं कृतं तस्य सर्वस्य मूले तदस्माकं प्रतिवेदनं तद्गताः प्रस्तावाश्चैव विद्यन्ते । तदत्र नः परमः सन्तोषः ।

प्रधानाचार्यपदादवकाशग्रहणम्, शिक्षा विशेषाधिकारिपदे नियुक्तिश्च

(१९४८)

ममैतज्ज्ञातमासीद् यत् प्रधानाचार्यपदाद् अथवा राजकीयसेवाया मया ३०।६।१९४८ दिनांकेऽव-काशो ग्रहीतव्य इति । तत्कालपर्यन्तं न मया कोऽ-प्याकस्मिकोऽन्यप्रकारको वावकाशः कदाचिदपि गृहीत आसीत् ।

अतस्तस्यैव वर्षस्य जनवरीमासस्यानन्तरं मया कदाचिन्माननीयः शिक्षामन्त्री श्रीसम्पूर्णानन्दः पृष्टो यन्नियमानुसारमहं राजकीयसेवातः पूर्णाविकाशग्रह-णात् प्राग्भाविनमवकाशं ग्रहीतुमिच्छामि, किं तद् भगवतानुमतं भविष्यति ? तेन, तत्तद्योजनानां कार्यान्वियने ममोपयोगितामाकलय्य, तन्नानुमतम् । उक्तं च यद् भवतां राजकीयसेवाकालस्य, अव-शिष्टकार्यस्य हेतोः, शासनेन वृद्धिः करिष्यत इति !

शिक्षामन्त्रिणामेष विचारः कथञ्चिद् निष्का-रणं स्वभावतोऽस्मद्विरोधपरायणैः प्रतिक्रिया-वादिभिरदनतः । मम कार्यकालस्य वृद्धिरतेषां नैवेष्टासीत् । तैर्गुप्तमन्त्रणा कृता । निर्धारितं च यदेकं संकीर्णविचारपराणां प्रतिक्रियावादिनां वाराणसेय-वृद्धपण्डितानां शिष्टमण्डलं स्वविरोधप्रदर्शनार्थं प्रदेशीयमुख्यमन्त्रिणां श्रीगोविन्दवल्लभपन्तमहो-दयानां सेवायामुपस्थितं भवत्विति । एतन्निश्चया-नुसारं ते श्रीपन्तसेवायामुपस्थिता अभवन् । तत्समक्षं च कथमपि कृत्रिमोपायैः साश्रुमुखैस्तैः प्रभाववता नाटकीयप्रकारेण मम कार्यकालस्य वृद्धि प्रस्तावमुद्दिश्य स्वकीयस्तीव्रो विरोधो निवेदितः । कश्चित्प्रयागस्थो नाट्यकलापटुस्तेषां तस्मिन्निवेदने नेतृत्वमकरोत् । श्रीसंपूर्णानन्दोऽपि तत्रासीत् । तद्द्वारैव एष समाचारः शनैः शनैरन्येषामपि कर्णगोचरतां गतः ।

मम कार्यकालस्य वृद्ध्या तथाकथितधर्मस्य महाननर्थो भविष्यतीति श्रुत्वा सरलमतिना श्री पन्तेन कार्यकालवृद्धेः प्रस्तावं प्रति स्वकीया अरुचिः प्रदर्शिता । ततश्च मम कार्यकालवृद्धेः प्रसङ्गः सर्वथा समाप्त एव ।

ततः क्रमेण ममावकाशग्रहणस्य समय उपस्थितः । २८।६।१९४८ दिनांके तडित्संदेशः शासनसका-शात्प्राप्तो यत् ३०।६।१९४८ दिनांकेऽवकाशं गृह्णता मया प्रधानाचार्यपदाधिकारो म०म० श्रीनारायण, शास्त्रिखिस्ते महोदयाय (सरस्वतीभवनपुस्तकाल-याध्यक्षाय) समर्पणीय इति ।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाकविश्रीव्यासगौरवम्

डा० अमरनाथ पाण्डेयः, एम० ए०, डी० फिल०

साहित्यसर्वस्वविधानदक्षो व्यासः कवीनां नृपतिर्बभूव ।
तस्य प्रकृष्टैः कविकर्मबन्धैरालोकिता लोकसमर्चिता ये ।। १

मनीषिलीलालिभिरात्मबोधं राज्ञां चरित्रैर्व्यवहारकोषम् ।
मुनीन्द्रनिध्यातरहस्यरत्नं जग्रन्थ काव्ये जनताहिताय ।। २

व्यासस्य संयोजनया प्रसन्ना लोकाः प्रशंसन्ति तदीयवृत्तम् ।
ये ये प्रसङ्गा निहिता मनोज्ञास्तेषां गुरुत्वं प्रथितं कथासु ।। ३

वृत्ते महाभारतनामधेये तत्त्वं निगूढं विबुधैर्विमृष्टम् ।
व्याख्याकदम्बैरपि पूजितं यत् तद् भारतं भारतदेशरत्नम् ।। ४

शिक्षाप्रसन्नोक्तिविलासिनीनां दीप्तिः प्रकृष्टाऽविरतं चकास्ति ।
तत्र प्रगीतेषु महत्सु सम्पत् काचित् समिद्धा हृदि भावनीया ।। ५

आचारसन्तानसमेधितानि पर्वाणि सर्वत्र हितं वहन्ति ।
तेषां विलासः कविवृन्दपूज्यः सृष्टिश्च तेषां सरसा विभाति ।। ६

खिन्नं प्रसादयति बोधयति प्रमुग्धं ज्ञानप्रकाशकिरणैर्दिशति व्यवस्थाम् ।
नीतिं प्रसारयति भेदविधाभिरच्छां तद् भारतं जगति गौरवमातनोति ।। ७

भक्तिप्रवाहपरिपूरितदिग्विभागं सद्वृत्तबोधितकवीन्द्रगृहीतकाव्यम् ।
युद्धस्फुरद्भटसमर्चितपादपद्मं व्यासं मुनिं कविगुरुं शिरसा नमामि ।। ८

आयोधनेषु सुभटैर्निजाहुदण्डैः शस्त्रास्त्रभूषितकरैः प्रकटीकृतं यत् ।
नीतेर्विलासकलयाऽचलया प्रणीतं तद्भारतेऽमरगिरा रचिते पवित्रे ।। ९

विज्ञानवैभवमनाकुलमादधानैर्योगार्थसिद्धिलतिकाञ्च समीहमानैः ।
प्रासङ्गिकैरमितभावकथावितानैराविष्कृतं किमपि वस्तु मदीयदेशे ।। १०

भारतं भारतं रत्नं लोके सर्वत्र विश्रुतम् ।
धार्यते हृदये सद्भिः सदा मङ्गलकाङ्क्षया ।। ११

इदमेव परं तीर्थं तपश्चेदमनुत्तमम् ।
मित्रं हितकरं लोके तत्समीपे सुखं महत् ।। १२

—✲—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीय टिप्पण्यः

निर्वाचनम्

१९७४ ईस्वीये फर्वरीमासे उत्तरप्रदेश ओडिसा मणिपुर नागालैण्ड पाण्डिचेरी प्रदेशेषु निर्वाचनं प्रायः सर्वत्र शान्तिपूर्णवातावरणे सुसम्पन्नमभूत्। निर्वाचनपरिणामानामक्षिलक्ष्यी कृत्य साश्चर्यमिदं वक्तुं शक्यते यत् चमत्कारः समजनि। सर्वत्र सर्वक्षेत्रेषु भ्रष्टाचारः सीमातीतमहर्घता खाद्यवस्तूनां कृत्रिमोऽभावो विषदिग्धपदार्थानां मिश्रणमित्यादिनरकयातनाभिः प्रपीडिता जनता पुनरपि कांग्रेसदलं सत्तारूढं विदधाति नावलोकयन्ती किमप्यन्यदलं सिंहासनारोहणक्षमम्। नानुचितं तदेतदङ्गीकरणं यत् सामान्यजनतासु विशेषतोऽधःपतितेषु सत्तायाः प्रभावः स्वकार्यं करोत्येव। अद्याप्यस्माकं मनःस्थितिरोजोबहुला न विद्यते। एतादृशीं हीनदशामवाप्ताः स्म यदेकश्वासेन कांग्रेसाय गालिं वोटं चोभयं प्रदद्मः। केचन ब्रुवते यत् पञ्चषरूप्यकाणां सामयिकेन लाभेन परितुष्टा अज्ञाः किं सत्यं लोकतन्त्रोचितं निर्वाचनं कर्तुमर्हन्ति। नाहं कस्यापि विशिष्टदलस्य विरोधेऽस्मि। कांग्रेसो वा जनसंघो वा समाजवादो वा कम्युनिष्टो वा यो वा को वा भवेत् भारतवर्षे तु प्रायः सर्वे समनस्काः समधरातले संस्थिताः सन्ति, सन्ति चैकस्यैव क्षेत्रस्य मूलानि। परमोच्चशिखरस्थितां भारतीयसंस्कृतिमनुरुध्योपत्यकामेव सम्प्राप्ताः एते। परमतेजस्विनस्तपस्त्यागमूर्तयो राक्षसचाणक्यप्रभृतयो महामन्त्रिणोऽद्यापि दृष्टिपथं न याताः। अस्मन्मते तु २५ प्रतिशतं ३० प्रतिशतं वोटस्यावाप्तिः सिंहासनमारोढुं जनताया आदेश इति न मन्तव्यम्।

अन्यच्च, निर्वाच्यनिर्वाचकयोरुभयोरपि कश्चिद् योग्यतामानदण्डो निर्धारणीयः। तत्र निर्वाच्यस्त्यागी तपस्वी सुपठितः शिष्टैर्गुणैः समलंकृतः स्यात्। एवं निर्वाचकोऽपि कथञ्चित् पठितस्तु भवेत्। अनेन निर्वाचनेन जातिदोषो दृढमूलतां यातः। धनस्यापि निकृष्टः प्रभावः सर्वेषामुपरि पतितः। अतोऽस्मन्यते तादृशा नियमा विधातव्या येन सर्वमलापेतं शुद्धं पवित्रं निर्वाचनं जायेत।

गुजरातप्रदेशे विक्षोभः

गुजरातप्रदेशे यो विक्षोभः श्रूयते प्रत्यहं वृत्तपत्रेषु च पठ्यते। तेनानुमीयते यत् जनतायाः सामूहिं मनः परिवृत्तिमगात्। न तदद्यतनीयं शासनमभिवाञ्छति। तत्र विक्षोभस्य पूर्वं कारणं खाद्यवस्तूनां कृत्रिमोऽभाव एव विद्यते। यदि शासनं सर्वतोभद्रं शुद्धमभविष्यत् तत्र तद् विरुद्धं जनान्दोलनमपि नाभविष्यत्। अतोऽस्यामवस्थायां दण्डेन शासनं नोचितम्। तत्र जनता यादृशं शासनमभिवाञ्छति तत् प्रदातव्यमित्यस्त्यस्माकं दृढो विश्वासः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साहित्य समीक्षा

भारतीय प्राचीन राजनीति

लेखकः—स्व० श्री पं० भगवद्दत्तः बी० ए०

प्रकाशकः—रामलाल कपूरट्रस्ट, बहालगढ़, सोनीपत (हरयाणा, मूल्यम्—)७५ ।

मम सनामो दिवंगतः श्री पं०भगवद्दत्तः बी०ए० वेदादिसच्छास्त्राणां महान् विद्वान् आसीत्, इति सर्वे विजानन्त्येव । भारतीयैतिह्यसम्बन्धेऽपि अनेन विदुषाऽतीव पाण्डित्यपूर्णं प्राक्तनसाहित्यमवगाह्य सत्यपूर्णं 'भारतवर्ष का इतिहास' इति नामकं भागद्वयसंवलितं पुस्तकं प्रकाशितम् । एवमनेके ग्रन्था अनेन पण्डितवर्येण स्वजीवने विलिख्य प्रकाशिताः । भारतीयराजनीतिविषयेऽस्यां पुस्तिकायां स्वविचाराः सुष्ठुरूपेण दिग्दर्शिताः । मन्ये मनुस्मृत्यादिषु महाभारतादिमहाकाव्येषु कौटिल्याद्यर्थशास्त्रेषु विस्तरेण राजनीतिसम्बद्धा विचारा बहुशः प्रपञ्चिताः । तानेवाङ्गीकृत्य सूक्ष्मरूपेण दिग्दर्शनमस्यां पुस्तिकायां कृतं पण्डितवर्येण । सर्वैः पुरुषै विद्वद्भिश्च पुस्तिकैषाऽवश्यमवलोकनीयेति ।

पाणिनीय शब्दानुशासनम्

प्रथमो भागः

प्रकाशकः—रामलालकपूर ट्रस्ट, बहालगढ़, सोनीपत (हरयाणा) मूल्यम्—४) ।

पाणिनिव्याकरणस्य शुभ्रं यशो व्योम्नि ज्योतिरिवार्कस्य सर्वत्र प्रसृतं विद्यते । पाश्चात्यविदुषां मते व्याकरणमिदं मानवमस्तिष्कस्य सर्वोत्तमकृतित्वेन जगति विराजते । पुराकालेऽष्टाध्यायीसाहाय्येन स्वल्पकाल एव व्याकरणाभिज्ञो भवति स्म । परं यदा प्रक्रियाग्रन्थानां प्रचारः समभवत् तदा दीर्घकालाध्ययनरतोऽपि विद्यार्थी पूर्णपाण्डित्यं न प्राप्नोति स्म । अतः पुनरपि अष्टाध्यायीक्रमेण व्याकरणस्याध्ययनं प्रचालनीयम् । प्रारम्भे सूत्राणां कण्ठस्थीकरणे पुस्तकमिदमतीव साहाय्यकरं विद्यते । अस्मिन् प्रस्तुतपुस्तके प्रदत्तानां परिशिष्टानां तथा लघुवृद्धादिपाठानां दर्शनेनास्य महत्त्वमधिकं सञ्जातम् ।

अस्मन्मते तु सूत्रसम्बद्धा वार्तिकगणादयोऽपि सूत्राणामधस्तात् यथोचितस्थाने निवेशनीया येन सूत्रसम्बद्धवार्तिकैस्तत् कार्यमवगतं भवेत् ।

भगवद्दत्तो वेदालंकारः
सम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जनवरी १९७४ से आगे —

महर्षि दयानन्द की विश्वदर्शन को देन

(Contribution of Dayananda to world philosophy)

श्री प्रो. जयदेव वेदालंकार

पंचम परिच्छेद

आत्म-मीमांसा

चार्वाक दर्शन सम्पूर्ण सृष्टि की उत्पत्ति केवल प्रत्यक्ष प्रमाण को मानते हुए पृथिवी, जल और वायु नामक चार भूतों से मानता है। इस दर्शन में आकाश को स्वीकार नहीं किया गया है। क्योंकि आकाश का प्रत्यक्ष नहीं होता है। आकाश प्रत्यक्ष का विषय ही नहीं, अतएव सम्पूर्ण जगत् उपर्युक्त चार भूतों से ही बना है। इन्हीं चार भूतों के विशेष योग से चैतन्य की उत्पत्ति होती है।

प्रत्यक्ष से ग्रहण न होने के कारण आत्मा का कोई पृथक् अस्तित्व नहीं है, जैसा कि आस्तिक दर्शनकार उल्लेख किया करते हैं। क्योंकि वह न तो घटादि की तरह बाह्येन्द्रियों से और न सुख आदि की तरह मन से ग्राह्य होती है। अनुमान प्रमाण तो चार्वाक मानते ही नहीं। इसके अतिरिक्त आत्म सिद्धि में कोई लिङ्ग भी नहीं है, क्योंकि चैतन्य की इन चार भूतों से अतिरिक्त कोई सत्ता नहीं है। चेतनता रहित इन चार भूतों के विशेष प्रकार से मिश्रित होने पर तथा शक्ति के आधिक्य से चैतन्य गुण उत्पन्न हो जाता है, जैसे कि मद-शून्य जौ आदि के संयोगजन्य सुरा में मदशक्ति की उत्पत्ति होती है१। समय बीतने पर व्याधि के कारण जब शक्ति का भय हो जाता है तो शरीर चेतनाविहीन हो जाता है। चैतन्य के रहने पर यह चार भूतों से निर्मित शरीर ही स्मृति, अनुसंधान आदि व्यवहार का निर्वाह करता है।

सब मनुष्य अपने विषय में ऐसा व्यवहार करते हैं कि "मैं स्थूल हूं, मैं कृश हूं।" इस वचन में "मैं" और "स्थूल" तथा "कृश" के समानाधिकरण से भी इसी निर्णय पर पहुंचा जाता है कि देह ही "मैं" अथवा "आत्मा" है, क्योंकि स्थूलता आदि देह के ही धर्म हैं, किसी दूसरे के नहीं। "यह मेरा देह है" इस प्रकार के वचन भी आत्मा और देह के भेद को नहीं सिद्ध कर सकते हैं। क्योंकि–ये तो उसी प्रकार एक होने पर भी गौण रूप से द्वैतप्रतिपादक हैं, जिस प्रकार राहु का शिर।२

न स्वर्ग नाम की ही कोई वस्तु है, न मोक्ष ही, न आत्मा, और न परलोक ही है। वर्णाश्रम धर्म की अनेक प्रकार की क्रियायें भी किसी प्रकार के फल को देने में सहायक नहीं हैं।३ इसलिए (इन सब के न होने से) जब तक जीवन है तब तक सुखपूर्वक रहना चाहिये। सुख प्राप्ति के लिए यदि किसी से

---

1. किण्वादिभ्यः समेतेभ्यो द्रव्येभ्यो मदशक्तिवत्।
   अहं स्थूलः कृशोऽस्मीति समानाधिकरण्यतः ।।

२. देहस्थौल्यादियोगाच्च स एवात्मा न चापरः।
   मम देहोऽयमित्युक्तिः संभवेदौपचारिकी ।।
   स.द.सं.पृ ७ ।।

३. न स्वर्गो नापवर्गो वा नैवात्मा पारलौकिकः।
   नैव वर्णाश्रमादीनां क्रियाश्च फलदायकाः ।।
   स.द.सं.पृ० १३ ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋण लेना पड़ जाये, तो भी घृतादि के पान के लिए लेना चाहिये (यह नहीं विचारना चाहिये कि इस ऋण को आगामी जन्म में लौटाना पड़ेगा)। दूसरे जन्म से डरना व्यर्थ है, क्योंकि जिस शरीर को मर जाने पर जला दिया जायेगा, वह लौटकर नहीं आ सकता ।४

केवल युक्तियां ही नहीं, अपितु निगम भी इसी सिद्धान्त के प्रतिपादक हैं, क्योंकि उनमें भी इस प्रकार के वचन मिलते हैं कि "यह आत्मा महान् है, अनन्त है, अपार है। वह विज्ञानमय ही है। इन महाभूतों से उठकर यह इन्हीं में विलीन हो जाता है। विनष्ट हो जाता है। मरकर इसका ज्ञान वा नाम नहीं रहता।" इस प्रकार के प्रसंगों व तर्कों से स्पष्ट है कि आत्मा पृथिव्यादि चार भूतों के संयोग से उत्पन्न होने वाली शक्ति के अतिरिक्त अन्य कुछ नहीं है ।५

अन्य स्थलों पर भी चार्वाक दर्शन के उन सिद्धान्तों को दर्शाया गया है जिनमें देहात्मवाद की चर्चा की गई है। जैसे–प्रमाण के विषय में केवल प्रत्यक्ष प्रमाण और उसके द्वारा प्रमाणित पदार्थों की सत्ता मानते हुए 'सर्वसिद्धान्त संग्रह' तथा 'षड्दर्शन समुच्चय' में लिखा है कि जिसका प्रत्यक्ष द्वारा बोध होता है, उसी का केवल अस्तित्व स्वीकार किया जाता है। अदृष्ट का कदापि नहीं, क्योंकि वह कभी देखा नहीं गया। अदृष्टवादी भी ऐसा ही कहते हैं कि अदृष्ट अर्थात् आत्मा, परमात्मा, धर्म, अधर्म व स्वर्ग-नरक और मोक्षादि कभी भी देखे नहीं गये ।६

इसी प्रकार शास्त्र-श्रवणादि के द्वारा देखे गए को भी अदृष्ट माना है। और जो अदृष्ट है उसके बारे में कहा भी नहीं जा सकता, क्योंकि वह तो हमेशा ही अदृष्ट है। जो हमेशा ही अदृष्ट है, उसे सत् कैसे कह सकते हैं। जैसे खरगोश के सींग हमेशा ही अदृष्ट होते हैं ।७

अतः जिन पदार्थों को हम देख सकते हैं, प्रत्यक्ष कर सकते हैं, वे ही हैं, अन्य नहीं। स्वर्ग-नरक, धर्म-अधर्म और मोक्ष आदि तो कल्पनामात्र हैं, इनका वास्तविक अस्तित्व कोई भी नहीं ।८

यह पहले भी कह दिया गया है कि भूतों के शरीराकार में विशेष प्रकार के सम्मिश्रण से चैतन्य उत्पन्न होता है। चैतन्यविशिष्ट देह ही आत्मा है। क्योंकि इस प्रकार की प्रतीति एवं व्यवहार से कि "मैं स्थूल हूं, तरुण हूं, वृद्ध हूं, युवा हूं," ऐसी प्रतीति होता है कि देह ही आत्मा है। शरीर से भिन्न कोई आत्मा नहीं है। जड़भूतों के विकारमात्र से शरीर में जो चैतन्य उपलब्ध होता है, वह तो ताम्बूल, सुपारी और चूना में पृथक्-पृथक् लाल रंग के न

---

४. यावज्जीवेत्सुखं जीवेत्ऋणं कृत्वा घृतं पिबेत् ।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः ।।
सं०द०सं०पृ० १४ ।।

५. विज्ञानघनएवैतेभ्यो भूतेभ्यः समुत्थाय
विनश्यति न प्रेत्य संज्ञास्ति ।।बृ० उ० २,४,१२ ।।

६. प्रत्यक्षगम्यमेवास्ति नास्त्यदृष्टमदृष्टतः ।
अदृष्टवादिष्टमिथ्यापि नादृष्टं दृष्टमुच्यते ॥
स.द्वि.सं. २।२

७. क्वापि दृष्टमदृष्टं चेददृष्टं ब्रुवते कथम् ।
नित्यादृष्टं कथं सत्स्यात् शशशृंङ्गादिभिस्सममम् ।। स.सि.सं. २, ३।।

८. एतावानेव लोकोऽयं यावान्निन्द्र
भद्रे पश्य यद्वदन्ति बहुश्रुताः ।।ष.द.सं.८१।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

होने पर भी सबके संयोग से उत्पन्न होने वाले लाल रंग के समान है ।९

इससे यही निष्कर्ष निकलता है कि पृथिवी, जल, अग्नि और वायु ये चार भूत ही चैतन्य की उत्पत्ति के कारण हैं अर्थात् ये मिलकर चैतन्य को उत्पन्न करते हैं, न कि चैतन्य इनसे पृथक् अन्य तत्व है। इस प्रकार का प्रश्न करना भी व्यर्थ है कि — जड़ भूतों के योग से पर्वत आदि की तो उत्पत्ति हो सकती है पर चेतन कैसे उत्पन्न हो सकता है, क्योंकि दही और गोबर आदि के मिश्रण से बिच्छु आदि चेतन की उत्पत्ति देखी जाती है। उसी प्रकार इनके मिश्रण चैतन्य के न होने पर भी चैतन्योत्पत्ति शरीर में हो जाती है ।१० इस प्रकार इन उद्धरणों से स्पष्ट है कि चैतन्य को ही देह का धर्म माना जाय, इससे पृथक् आत्मा का अलग अस्तित्व मानने की आवश्यकता नहीं है। जब आत्मा का अस्तित्व ही नहीं बनता तो मुक्ति आदि का प्रश्न ही नहीं रहता।

देहात्मवाद के उपर्युक्त महत्व का मुख्य कारण यह है कि मनुष्यमात्र की देहात्मबुद्धि बलवती है। जो कि प्रत्येक प्राणी को प्रत्यक्ष सिद्ध है। यही कारण है कि इसके अत्यन्त स्फुट होने से सर्वसाधारण को देह से भिन्न आत्मवस्तु पर सन्देह हो सकता है। और देहात्म-विषय को वह ऐसा प्रत्यक्ष समझता है कि उसमें तनिक भी सन्देह नहीं किया जा सकता है। इस प्रकार की बुद्धि का भी एक कारण है। वह कारण इस प्रकार है कि चार्वाक प्रत्यक्ष को ही प्रमाण मानते हैं। यह प्रमाण अन्य प्रमाणों से साधारणतया प्रबल है। प्रत्यक्ष से देहभिन्न आत्मा का ज्ञान नहीं होता, और केवल इतना ही नहीं, प्रत्युत सर्वसाधारण का सन्देहरहित ज्ञान भी यही है कि "मैं देह हूं।" इन सभी चीजों को लेकर अपने सिद्धान्त एवं अनुभवानुसार चार्वाक दर्शन ने केवल प्रत्यक्ष को ही प्रमाण माना। इसप्रकार देखा यह जाता है कि चार्वाक दर्शन का देहात्मवाद प्रत्यक्ष प्रमाण पर और प्रत्यक्ष प्रमाण देहात्मवाद के अनुभव पर स्थिर है।

आत्मा की जब पृथक् सत्ता नहीं है। शरीर ही आत्मा है, तब इस आत्मा का नित्यत्व नहीं बन सकता है। जो नित्य नहीं, वह मुक्त भी नहीं है। अतएव चार्वाक दर्शन की उक्ति प्रसिद्ध ही है कि मरना ही मोक्ष है" ।११

चार्वाक दर्शन ने केवल प्रत्यक्ष-प्रमाण को मान कर देहात्मवाद को सिद्ध किया है फिर इन दोनों के आधार पर ही ईश्वर और आत्मा को नहीं माना है। यहां पर चार्वाक दर्शन के खण्डनार्थ शरीर से दूसरा शरीर है। जिसप्रकार मेरे देखे का आपको स्मरण नहीं होता, इसी प्रकार बाल्यकाल में देखे हुए का यौवन काल में स्मरण नहीं होना चाहिये। क्योंकि— बाल्यशरीर यौवन शरीर से परिमाण में भिन्न हैं। परिमाण का नाश आश्रयनाश के कारण होता है।

---

९. स्थूलोऽयं तरुणो वृद्धो युवेत्यादिविशेषणैः ।
विशिष्टो देह एवात्मा न ततोऽन्यो विलक्षणः ।।
जड़भूतविकारेषु, चैतन्यं यत्तुदृश्यते ।
ताम्बूलपूगचूर्णानां योगाद्रागइवोत्थितम् ।।
स.सि.सं.२७६-७ ।।

१०. किञ्च पृथ्वी जलं तेजो वायुभूतचतुष्टयम् ।
चैतन्यभूमिरेतेषां मानं त्वक्षजमेव हि ।।
पृथ्व्यादि भूतं संहत्यां तथा देहादिसंभवः ।
मदशक्तिसुरांगेभ्यो, यद्वत्तद्वत्स्थित आत्मा ।।
ष.द.स.६,७ ।।

११. मरणमेवापवर्गः ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतएव बाल्य शरीर के परिमाण का नाश अपने आश्रय बाल्य शरीर के नाश से ही हुआ है। इसलिए बाल्यशरीर नष्ट हो चुका है और यौवन का शरीर बाल्य शरीर से भिन्न दूसरा ही शरीर है। अत एव बाल्यकाल में देखे हुए का यौवन में स्मरण नहीं होगा। यदि कहा जाय कि बाल्य काल के संस्कार युवावस्था के शरीर में संक्रान्त हो जाते हैं। इसलिए स्मरण बन जायगा, यह बात ठीक नहीं। क्योंकि–कारण का कार्य में वासना संक्रमण नहीं होता। जैसे–माता के अनुभूत का गर्भस्थ शिशु को स्मरण नहीं होता है। इस पर भी कोई कहे कि–उपादान कारण की वासना का उपादेयमय संक्रमण माना जाय, तो भी ठीक नहीं। क्योंकि–एक परमाणुपुञ्ज से दूसरे परमाणुपुञ्ज की उत्पत्ति न होने से हाथ आदि को ही उपादान मानना पड़ता है। हाथ आदि के कट जाने पर उस कटे हुए हाथ आदि से अनुभव किये हुए विषयों का खण्ड शरीर को अनुभव नहीं हो सकेगा। खण्ड शरीर में कटे हुए हाथ के उपादान न होने कारण।१२

इस पर चार्वाक कहता है कि शरीर में जो परमाणु होते हैं, वे बाल्यावस्था तथा यौवनावस्था में एक से होते हैं। अतएव उन परमाणु के कारण बाल्यावस्था का यौवनावस्था में स्मरण हो सकता है। इसका उत्तर यह है कि–ऐसा मानने पर दो प्रकार के दोष आते हैं। प्रथम तो यह कि–लौकिक पुरुष परमाणुओं को इन्द्रियों से ग्रहण नहीं कर सकते क्योंकि–वे अतीन्द्रिय होते हैं। चैतन्य जब परमाणु में रहेगा, उस अवस्था में स्मरण आदि भी अतीन्द्रिय हो जायेंगे; क्योंकि–वह परमाणुओं का धर्म हो जायेगा। दूसरा दोष पहले ही बताया है कि–हाथ के कट जाने पर हाथ के साथ अनुभव करने वाले–आत्मा की नित्यता को सिद्ध करने के लिए शरीर से आत्मा की पृथकता को सिद्ध करना होगा। न्याय दर्शन के लेखक गौतम मुनि ने लिखा है—

"जिस को मैं आंख से देखता हूं इसी को हाथ से छूता हूं। वा जिसको हाथ से छूता हूं उसी को आंख से देखता हूं। आंख से पुस्तक को देखता हूं और हाथ से छूता हूं। इससे पता चलता है कि देखने और छूने वाली वस्तु एक ही है। यदि पुस्तक आंख से दिखाई न देती और हाथ से छूने पर नहीं आती तो हम को पुस्तक का ज्ञान न होता। हम यह नहीं कह सकते कि यह पुस्तक है। इससे पता चलता है कि जो चीज़ हाथ और आंख को काम में ला रही है – वह इन से कोई अलग है। इसी का नाम आत्मा है। आत्मा अगर अलग पदार्थ न होता तो हम ऐसा नहीं कह सकते थे कि जिसको छूआ उसी को देखा। चूंकि आंख देखती है स्पर्श नहीं करती अथवा हाथ स्पर्श करता है परन्तु देखता नहीं। इस पर आक्षेप किया जाता है कि किसी अन्य सत्ता को मानने की आवश्यकता नहीं है। विषयों की अवस्था ही ऐसी है कि आंख रूप को देखे या हाथ कठोरता को छूए। नेत्र न हो तो हम रूप को नहीं देख सकते।१३

त्वचा न हो तो हम स्पर्श नहीं कर सकते या जीभ न हो तो हम रस चख नहीं सकते थे। अतः इन्द्रियादि से अतिरिक्त किसी आत्मा की आवश्यकता नहीं है। यदि अलग आत्मा हो तो विषयों की अलग-अलग व्यवस्था न होती। इन्द्रियां अपने अपने

---

१२. नान्यदृष्टं स्मरत्यन्यो नैकं भूतमपक्रमात्।
वासना संक्रमो नास्ति न च गत्यन्तरं स्थिरे॥
न्या०कु० १, १५॥

१३. दर्शनस्पर्शनाभ्यामेकार्थग्रहणात्।
न्याय ३।२।१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषय को ग्रहण करने में चेतन हैं, क्योंकि इन्द्रियों के होने न होने में विषय ग्रहण का होना न होना निहित है।" ऐसी अवस्था में अन्य चेतन से कोई लाभ नहीं। इस आक्षेप के उत्तर के लिए गौतम मुनि ने अगले सूत्र में लिखा है कि उन विषयों की व्यवस्था से ही आत्मा के अस्तित्व की सिद्धि होती है।१४ यदि कोई इन्द्रिय अनियत विषयों वाली, सब विषयों को जानने वाली, सब का ग्रहण करने वाली होती तो कोई भी उससे अलग आत्मा का अनुमान न करता। इन्द्रियां अनियत विषयों वाली नहीं हैं और न ही सब का ग्रहण करने वाली हैं।

अतः सब को जानने वाला तथा सब विषयों के ग्राहक आत्मा को मानना पड़ता है। इससे इन्कार नहीं किया जा सकता कि प्रत्यभिज्ञा चेतन का धर्म है। किसी वस्तु को देखकर पूर्वानुभव द्वारा उसकी गन्ध तथा कोमलता अथवा कठोरता आदि का निश्चित ज्ञान कर लिया जाता है। और तदनुसार सूंघने और छूने पर पाया भी जाता है इससे पता चलता है कि समस्त इन्द्रियों के विषयों का ग्राहक कोई एक आत्मा है। इसी विषय के सम्बन्ध में कणाद मुनि ने लिखा है।

प्रसिद्धा इन्द्रियार्थाः।
इन्द्रियार्थप्रसिद्धिरिन्द्रियार्थेभ्योऽर्थान्तरस्य हेतुः॥
(वैशेषिकदर्शन ३।१।१-२)।

अर्थात् प्रत्येक इन्द्रियों के अलग-अलग विषय तो प्रसिद्ध ही हैं-जैसा कि सब जानते हैं। यह प्रसिद्धि इस बात की पुष्टि करती हैं कि इन्द्रियों और उनके अर्थों से भिन्न एक ऐसी वस्तु है जिस को आत्मा कह सकते हैं। रूप का आश्रय आंख है और शब्द का आश्रय कान है। यहां प्रश्न है कि प्रसिद्धि अर्थात् ज्ञान का आश्रय क्या है? शब्द का कान पर पड़ना ही तो शब्द का ज्ञान नहीं यदि इसी को ज्ञान कहेंगे तो मृतक शरीर के भी कान में शब्द का ज्ञान होजाये। अतः मालूम होता है कि शब्द का ज्ञान इससे भिन्न है। वह जिस को होता है वही आत्मा है।

इस पर वर्धमियों का आक्षेप है कि यदि आत्मा शरीर से पृथक् है तो किसी के शरीर को नष्ट करने पर पाप नहीं लगना चाहिये-क्योंकि आत्मा तो तब भी वैसी की वैसी बनी रहती है। इस आक्षेप का उत्तर देते हुए कहा है। कि हमने यह नहीं कहा कि नित्य आत्मा का वध करना हिंसा है, अपितु नित्य आत्मा के भोग का आश्रय जो शरीर है, उसका और अपने अपने विषयों के कर्त्ता इन्द्रियों आदि का वध करना हिंसा है। जब किसी के हाथ, पैर आदि को काट कर हिंसा की जाती है- तो आत्मा को कष्ट पहुंचता है - वा किसी को यदि मार दिया जाता है तो आत्मा को अपने आश्रय-स्थान के हट जाने से उसी प्रकार का कष्ट होता है - जिस प्रकार किसी व्यक्ति को अपने आश्रयस्थान अथवा घर लुट जाने से होता है।

आत्मा की पृथक् सत्ता को बतलाने के लिए कई अन्य प्रमाण हैं। कोई व्यक्ति किसी चीज को बांई आंख से देखता है। उसी चीज को वह दांई आंख से भी देखता है। तब वह कहता है कि जिस को बांई आंख से देखा था उसी को दांई आंख से देखता हूं। यह प्रत्यभिज्ञा तभी होगी जब कि अतिरिक्त आत्मा की सत्ता स्वीकार करली जाय।

(२) एक इन्द्रिय के विकार से दूसरी इन्द्रिय में विकार आजाता है। कल्पना कीजिए कि आप

---

१४. तद्व्यवस्थानादेवात्मसद्भावादप्रतिषेधः॥
न्याय ३।१।३)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(पाणि. ७।१।५०)। दिवा=दिवसे । ईयुर्गच्छन्ति कुहचिदिति न ज्ञायते । वरुणस्य व्रतानि अदब्धानि वरुणदेवस्य नियमा अदब्धाः=न केनापि खण्ड्यन्ते । अत्र अदब्धानि वरुणस्य व्रतानीति तृतीयचरणस्याऽर्थोऽवशिष्टैस्त्रिभिर्निष्पाद्यते । तैर्विना सोऽसङ्गत एव भवेदिति काव्यलिङ्गमलङ्कारः । तदुक्तं साहित्यदर्पणे– हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम् ।

अथ कालः–

वर्षाऽहोरात्रमासादिरूपश्च काल उच्यते ।
सोऽप्यनेकार्थशब्दानामेकत्राऽर्थे नियामकः ।। २७३।।

दिवसे द्योतते हंसो द्विजराजो निशागमे ।
हंसो दिवससम्बन्धादिह सूर्यः प्रतीयते ।। २७४।।

निशया सह सम्बन्धेनाऽत्र द्विजराजश्चन्द्रः । "दन्तविप्राण्डजा द्विजाः।" इतिद्विजपदस्याऽप्यनेकार्थता । तदुक्तं नैषधीये–का नाम बाला द्विजराजपाणिग्रहाऽभिलाषं कथयदलज्जा ?

यथा वा—

मूर्धा भुवो भवति नक्तमग्नि-
स्ततः सूर्यो जायते प्रातरुद्यन् ।
मायामू तु यज्ञियानामेताम्
अपो यत्तूर्णिश्चरति प्रजानन् ।।
ऋ. १०।८८।६।।

नक्तं रात्रौ अग्निरेव भौतिकोऽग्निरेव भुवो मूर्द्धा भवति=मूर्धेव प्रधानप्रकाशको भवति । ततः प्रातः स एवाग्निः उद्यन् सूर्यो जायते उदयमवाप्नुवन् सूर्यरूपेण प्रकाशते । अथ एतां मध्यस्थानामपि देवतां विद्युद्रूपां यज्ञियानाम्=मिथः संयोगार्हाणां पदार्थानाम् मायामेव कर्मपरिणामं वा प्रजानन्=विज्ञानविदो जानन्ति । अथवा प्रजानन्निव स्वकर्तव्यं कर्म जानन्निवेत्यर्थः । स एव मध्यस्थानो देवः । तूर्णिः=नितरां शीघ्रगामी । अपश्चरति=मेघात्मकेषु जलेषु संञ्चारं समाचरति। अपः कर्माणि वा वृत्रवधादीनि चरति विधत्ते। "माया स्याच्छाम्बरी बुद्धयोः" इति मेदिनी। तूर्णिः=त्वरमाणः इति निरुक्ते यास्कः (७।७।२७) वहि श्रिश्रु· · · त्वरिभ्योनित् (उणा. ४६१) एकैव सा शक्तिः समयभेदेन त्रिधा प्रकाशते। रात्रिसम्बन्धेनाग्निः, दिवससम्बन्धेन सूर्यः, स एव जलसम्बन्धेन मध्यमः। तथाहि–"अयमेवाऽग्निर्वैश्वानरः इति शाकपूणिः । विश्वानरावेते उत्तरे ज्योतिषी (विद्युत्सूर्यौ) वैश्वानरोऽयं यत् ताभ्यां जायते। कथ न्वयमेताभ्यां जायते ? यत्र वैद्युतः शरणं (स्वाश्रयम् मेघम्) अभिहन्ति यावदनुपात्तो भवति। मध्यमधर्मैव तावद् भवति । उदकेन्धनः शरीरोपशमनः । (स हि मध्यमो जलमिन्धनं समुद्दीपकं यस्य । शरीरस्य प्राणिदेहस्य च उपशामको मृत्युहेतुः) उपादीयमान एवाऽयं सम्पद्यते उदकोपशमनः शरीरदीप्तिः (अर्थात् विपरीतधर्मा)। अथ आदित्यात्–उदीचिप्रथमसमावृत्ते आदित्ये (ग्रीष्मर्त्तौ) कंसं वा मणिं वा (अवनतोदरमित्यर्थः) परिमृज्य प्रतिस्वरे (रश्मिसंग्रहकेन्द्रे– FOCUS) यत्र शुष्कगोमयमसंस्पर्शयन् धारयति तत् प्रदीप्यते। सोऽपि (सूर्योऽपि) अयमेव भौतिकोऽग्निरेव तदा सम्पद्यते ।" (निरुक्ते–७।६।२३) यो दिवि सूर्यः स एवान्तरिक्षेऽशनिः पृथिव्यां चाग्निरिति तात्पर्यम्।

अथ व्यक्तिः––

पुंस्त्रीप्रभृतिलिङ्गानि ज्ञायन्ते व्यक्तिसंज्ञया ।
क्लीबे नभो वियद्वाचि तत्पुंसि श्रावणाऽर्थकम्।। २७५।।

मित्रो भातीति पुंल्लिगे सूर्य वाचि च यत्पदम् ।
मित्रं भातीति तत्क्लीबे सुहृदर्थे नियन्त्रितम् ।। २७६।।

"· · · ·नभः क्लीबं व्योम्नि पुमान् घने ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रावणघ्राणवर्षासु विसतन्तौ पतद्ग्रहे ।।" इति मेदिनीप्रामाण्यात् क्लीबे यन् नभःपदं व्योम वाचकं तदेव पुंसि श्रावणमासाद्यर्थकम् । "नभाः श्रावणिकश्च सः "इत्यमरः । नभ आदित्यो भवति नेता रसानां भासां ज्योतिषां प्रणयोऽपि वा भन एव स्याद् विपरीतः । इति निरुक्ते (२।४। १४) यास्कः ।

अथापि--

अभयं मित्रादभयममित्राद्
अभयं ज्ञातादभयं परोक्षात् ।
अभयं नक्तमभयं दिवा नः,
सर्वा आशा मम मित्रं भवन्तु ।।

अथर्व० १९।१५।६।

सर्वा आशाः=सर्वा दिशः, लक्षणया तत्र निवासिनो जना मम मित्रं=मम सुहृदः सन्तु । इह मित्रपदं नपुंसकलिंगकं सुहृदर्थे । किन्तु--

अयं मित्रो नमस्यः सुशेवो
राजा सुक्षत्रो अजनिष्ट वेधाः।
वयं तस्य सुमतौ यज्ञियस्याऽ-
पि भद्रे सौमनसे स्याम ।।

ऋ० ३।५९।४।

देवता-मित्रः। ऋषिः=गाथिनो विश्वामित्रः। छन्दः=त्रिष्टुप् । प्रमीते त्रायते । सम्मिन्वानो द्रवतीति वा । मेदयतेर्वा । प्रमीतेर्मरणात् त्रायते । इति मित्रः । अमिचिमिदिशसिभ्यः क्त्रः (उणादि ६०३ ।

अयमिति--एषः नमस्यः-सर्वैर्नमस्करणीयः। सुक्षत्रः=शोभनक्षत्रबलोपेतः । मित्रः सूर्यः सूर्य सदृशप्रतापो वा । सुशेवः=सुखप्रदाता । वेधाः= प्रजानां भाग्यविधातेव । नः राजा अजनिष्ट= प्रजाभिः कृतवरणः सिंहासनमधिरूढः । तस्य= तथाविधस्य, यज्ञियस्य=राजसूयादियज्ञार्हस्य सङ्गमनयोग्यस्य वा सुमतौ शोभनमतौ भद्रे सौमनसे च सौमनस्ये च वयं भवेम । अत्र पुंल्लिगकं मित्रपदं सूर्यं सूर्यसदृशं वा राजानमाह ।

तथा--

मित्रो जनान् यातयति ब्रुवाणो मित्रो दाधार पृथिवीमुत द्याम्० ।। ऋ० ३।५९।१। मित्रः सूर्यः पुरोवातो वा ब्रुवाण इव आलपन्निव कृषकान् जनान् यातयति=कृष्यर्थं प्रयत्नाय प्रेरयति । स एव वृष्टिकर्मणा पृथिवीं द्युलोकं च धारयति । स मित्रः अनिमिषा=निमेषशून्यया दृष्ट्येव कृष्टीः=कर्षकान् अभिचष्टे । तस्मै मित्राय घृतवत् हव्यं जुहोत । यज्ञाद् भवति पर्जन्यः पर्जन्यादन्न-संभवः । इति भगवद्गीतायाम् । वृष्ट्यर्थं यज्ञं समाचरतेत्याशयः ।

अथ स्वरः--

उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः ।
नियतास्ते श्रुतौ तस्मान्निश्चितार्थप्रकाशकाः ।।

२७७।।

अतएव पाणिनीय शिक्षायामुक्तम्--

मन्त्रो हीनः स्वरतो वर्णतो वा
मिथ्या प्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रुः स्वरतोऽपराधात् ।।

तद् विवृणोति--

इन्द्रस्य शत्रुरित्यत्र षष्ठीतत्पुरुषे कृते--
इन्द्रशत्रुपदस्याऽन्त्यपदोदात्तत्वमीप्सितम् ।।

२७८।।

असुरैस्तु स्वराऽज्ञानादाद्युदात्ततयेरितम् ।
बहुव्रीहिसमासेन विरुद्धार्थं तु तत्कृतम् ।।

२७९।।

तेनेन्द्रः शत्रुरस्येतीन्द्रे हि शातन कर्तृता ।
प्राप्ता, वृत्रासुरस्तेनानुष्ठानेन स्वयं हतः ।।

२८०।।

इन्द्रस्य शत्रुः शातयिता वृत्रासुरो वर्धता-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मित्यभिप्रायवद्भिरसुरैर्यज्ञः समारब्धः । किन्तु स्वरशास्त्रानभिज्ञैस्तैः षष्ठीतत्पुरुषसमासानुसारमन्त्यपदोदात्तत्वे चिकीर्षिते प्रमादवशात् इन्द्रशत्रुर्वर्धताम् इति पदमाद्युदात्ततयोच्चारितम् । तेन बहुव्रीहिसमासानुसारम् इन्द्रः शत्रुः शातयिता यस्येत्यभिप्रायेण तत्पदं विरुद्धार्थकमभवत् परिणामे च तेनानुष्ठानेन वृत्रासुरः स्वयमेव विनाशमवापेति पौराणिकः प्रवादोऽत्रानुसन्धेयः ।

ननु काव्येऽपि स्वरो विशेषार्थप्रतीतिकृदस्ति। मथ्नामि कौरवशतं समरे न कोपाद्०" इत्यादौ काक्वा कण्ठध्वनिभेदेन मथ्नाम्येवेति रूपविरुद्धार्थप्रतीतिरपलपितुं न शक्या । किंच रसविशेषे स्वरस्य विशेषस्य प्रयोगो भरतमुन्यभिमतः इति चेत्–सत्यम्, तथापि अनेकार्थस्य पदस्य एकार्थनियमनरूपं प्रस्तुतं कार्यं काक्वादिभिर्न विधीयते । संयोगो विप्रयोगश्चेत्यादि कारिकयोः–'कालो व्यक्तिः स्वरादयः' इत्यादि पदेनाऽभिनयादेर्ग्रहणम् । यथा–एतावानस्य महिमा अतो ज्यायांश्च पूरुषः० इत्यत्र उभयोर्हस्तयोः पूर्णविस्तारेण निर्दिश्यमानस्य वस्तुनो महत्त्वातिशयो बोध्यते । अनेकार्थकपदानां स्वरभेदेन एकस्मिन्नर्थे नियमनं यदुक्तं तद्वेदे एव न तु लौकिकसंस्कृतकाव्ये । तथा सति बहुषु स्थलेषु श्लेषानङ्गीकार प्रसङ्गात् । काव्ये च श्लेषस्य चमत्कारकारकतया त्यक्तुमशक्यत्वात् ।

उक्तरीत्या अनेकाऽर्थकस्य कस्यचिच्छब्दस्य निर्दिष्टस्वरूपैः संयोगादिभिरितरार्थप्रतिबन्धादेकस्मिन्नर्थे निर्धारितेऽपि वा अर्थान्तरप्रतीतिः क्वचिद् भवति न साऽभिधया सकृदर्थं प्रकाश्य तस्या विरतत्वात्, न वा लक्षणया मुख्यार्थबाधादिहेतुत्रयाऽभावात् किन्त्वभिधामूलव्यञ्जनयैवेति स्फुटम् ।

यथा––

भद्रात्मनो दुरधिरोहतनोर्विशाल-
वंशोन्नतेः कृतशिलीमुखसंग्रहस्य ।
यस्याऽनुपप्लुतगतेः परवारणस्य
दानाम्बुसेकसुभगः सततं करोऽभूत् ॥

भद्रात्मन इत्यादि – कस्यचिद्राज्ञः स्तुतिप्रसंगे पठितत्वात् यस्येतिपदेन प्रकरणप्राप्तस्य यस्य नृपतेः करः पाणिः सततं दानसंकल्पपटनाय गृहीतस्य अम्बुनः सेकेन सुभगः शोभनोऽभूत् । कीदृशस्य तस्य राज्ञ इत्याह–भद्रात्मनः-भद्रः प्रशस्तआत्मास्वरूपं वा यस्य तथाविधस्य, विशाला वंशस्य कुलस्य उन्नतिरुत्कर्षो यस्य तथादुरधिरोहा परैरनभिभवनीया च तनुर्यस्य, कृतः शिलीमुखानां शराणां संग्रहः सञ्चयश्च येन तथाविधस्य। अनुपप्लुता सन्मार्गादपरिभ्रष्टा गतिराचरणं यस्य तथोक्तस्य । पुनः कीदृशस्य ? परान् शत्रून् वारयतीति तादृशस्येत्यन्वयः । एवं प्रकरणबलान्नृपसम्बन्धिनि मुख्यार्थे निर्धारितेऽपि गजपरको य इतरार्थः प्रतीयते सोऽभिधामूलव्यञ्जनाव्यापारगम्य एव । गजपरकोऽर्थः–भद्रात्मनः भद्रजातीयस्य । अत्युच्चतयादुरधिरोहा तनुर्यस्य तस्य, विशाला पृष्ठवंशस्योन्नतिर्यस्य, कपोलतलगलन्मद धारया कृतः शिलीमुखानां भ्रमराणां संग्रहश्चयेन, अनुपप्लुता समा गम्भीरा वा गतिश्च यस्य एतद्विधस्य यस्य परवारणस्य उत्कृष्टगजस्य करः शुण्डादण्डः सततं दानाम्बुनः मदजलस्य सेकेन सदासुभगोऽभवदिति । इह भद्रात्मनः, विशालवंशोन्नतेः, कृतशिलीमुखसंग्रहस्य, परवारणस्य, दानाम्बुसेकसुभगः – इत्याद्यनेकपदानामपरिवृत्तिसहत्वात् अन्वयव्यतिरेकाभ्यां शब्दस्य प्रधानता । अर्थाऽपरिवृत्तौ तेषां पदानां परिवर्तने श्लिष्टपदानि अपसार्य तस्यैवार्थस्य विभिन्नपदैः प्रतिपादने अभीष्टव्यङ्ग्यार्थहानात् । परस्तात् व्यंजनया प्रतीयमानस्य गजपरकस्याऽर्थस्याऽप्यन्यत्र वाच्यार्थतयाऽस्य अभिधामूलकता च । यथा वा––

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ प्रकाशाभ्युदयोनाम

डा० मङ्गलदेवशास्त्री

नवम उच्छ्वासः

राजकीय संस्कृतमहाविद्यालयस्य प्रथमोपाधिवितरणोत्सवः, सार्धशताब्दीमहोत्सवश्च २८।१।१९४७

१९४१ ई० वर्षे महाविद्यालयस्थापनादिवसात् सार्धशताब्दी व्यतीतासीत्, तदैव मया चिन्तितमासीत् यत्सोत्साहं संभारैः सह सोऽवसरः समर्हणीय इति। परन्तु तस्मिन् वर्षे यूरोपीयमहायुद्धवशात् स सुयोगो न लब्धः।

तदनन्तरं महाविद्यालये शास्त्र्याचार्यादिपरीक्षापदवीप्रदानार्थं मदीयप्रस्तावानुसारं प्रतिवर्षमुपाधिवितरणोत्सवकरणस्य शासनाज्ञया निश्चयो जातः। १९४७ ई० वर्षस्य जनवरीमास एव च प्रथमोपाधिवितरणोत्सवार्थमवधारितः।

तेनैवोत्सवेन सह **महाविद्यालयस्य** सार्धशताब्दीमहोत्सवोऽपि भवत्विति शासनाज्ञया निर्धारितमभवत्।

ततश्च १९४७ वर्षस्य जनवरीमासस्य २८तम दिनाङ्के उभावपि काशिकराजकीयसंस्कृतमहाविद्यालयस्य प्रथमोपाधिवितरणोत्सवो महाविद्यालयस्य सार्धशताब्दीपूर्त्तिस्मारको महोत्सवश्च महता समारम्भेणोत्साहेन च समवर्त्तताम्।

तदर्थं भारतीया विशिष्टा विद्वांसोऽधिकारिणश्च यूरोपीयतत्तद्देशवास्तव्या अमरीकादेशवास्तव्याश्च संस्कृतविद्वांसो विशेषरूपेण आमन्त्रिता अभवन्। तेषामनेकैः स्वोपस्थित्यास्माकमुत्सवोऽलंकृतः। अनेकैश्च हार्दिकाभिनन्दनप्रेषणेन वयं सभाजिताः।

उपाधिवितरणोत्सवेन संबद्धा **समावर्तनसत्रपद्धति**[१]र्द्वितीया विशेषतः प्रभावकरी चासीत्। अतः सात्यधिकमभिनन्दिताभूत् सर्वैरप्युपस्थितैः। पद्धतौ वैदिकमन्त्रपाठेन सह **सदसस्पति, कुलपति, प्रस्तोतृ, प्रवक्तृशब्दानां** प्रयोगोऽतीवचमत्कारकरोऽभूत्।

उत्तरप्रदेशशासनस्य मुख्यमन्त्री माननीय श्री गोविन्दवल्लभपन्तः सदसस्पतिः (=सभापतिः) आसीत्, महाविद्यालयस्य प्रधानाचार्यः (प्रकृतग्रन्थकर्ता) कुलपतिः, महामहोपाध्यायः श्रीविधुशेखरशास्त्रिभट्टाचार्यश्च प्रवक्तासीत्।

महाविद्यालये २४।१।१९४७ दिनाङ्कादारभ्य २६।१।१९४७ दिनाङ्कपर्यन्तमुत्सवाङ्गतया संपन्नेषु अनेकविद्वत्संमेलनेषु (=संस्कृतभाषणप्रतियोगिता-संमेलने, शास्त्रार्थप्रतियोगितासंमेलने, सतीर्थ्यसंमेलने, संस्कृतकविसंमेलने विद्वद्गोष्ठ्यां च) तत्तद्विषयक विचारघोषोऽश्राव्यत।

नूनं महाविद्यालयस्यातिदीर्घइतिहासे सर्वमेतदपूर्वं दृश्यमासीत्। तथाहि—

चिरनिद्राप्रसुप्तानां सहसोद्बोधने सति।
भाव्यभ्युदयसंज्ञाने यावस्थोत्पद्यते नृणाम् ॥१॥
सैवावस्था समुत्पन्ना नूतनस्फूर्तिदायिनी।
देववाणीविदां सार्धशताब्द्या उत्सवे नवे ॥२॥

---

१. सैषा समावर्तनसत्रपद्धतिर्ग्रन्थकर्तुः प्रबन्धप्रकाशस्य द्वितीयभागस्य द्वितीयसंस्करणे २९३–२९९ तमपृष्ठेषु मुद्रिता तत्रैव द्रष्टव्या।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतवर्षस्य स्वराज्यप्राप्तेर्महोत्सवः
संस्कृतविश्वविद्यालयस्थापनायाः
प्रस्तावश्च १५-१६।८।१९४७

१४।८।१९४७ई० दिनाङ्को हि भारतवासिनामपूर्वहर्षोल्लासयोर्दिवसत्वेनामन्यत सर्वत्रापि भारते। १५-१६।८।१९४७ दिनाङ्कयो राजकीयमहाविद्यालयेऽपि सोत्साहं स महोत्सवो निरवर्त्तत। १६।८।४७ दिनाङ्के प्रधानाचार्यस्य विशेषप्रेरणया निर्देशेन च म० म० पं० नारायणशास्त्रिखिस्तेमहोदयेन विरचिताया भारतमातुः कथायाः श्रवणेन सह पूजापि सर्वैः सश्रद्धमक्रियत।

अस्मिन्नेवावसरे वैदिकपद्धतिमाश्रित्य प्रधानाचार्येण स्वविरचितमधोनिर्दिष्टं मातृभूमेरभिनन्दनमपि सदस्यानां पुरतः श्रावितम्।

मातृभूमेरभिनन्दनम्

स्वतन्त्रतादिवसः

(अधिकश्रावण-कृष्ण १४, संवत् २००४ विक्रम०)
(१५।८।१९४७)

सा नो माता भारती भूविभासताम्।

येयं देवी मधुना तर्पयन्ती,
तिस्रो भूमीरुद्धृता द्योरुपस्थात्
कामान् दुग्धे विप्रकर्षत्यलक्ष्मीं।
मेधां श्रेष्ठां सा सदास्मासु दध्यात्॥१॥

सर्वे वेदा उपनिषदश्च सर्वा
धर्मग्रन्थाश्चापरे निधयो यस्याः।
मृत्योर्मर्त्यानमृतं ये दिशन्ति वै
सा नो माता भारती भूविभासताम्॥२॥

यां प्रच्युतामनु यज्ञाः प्रच्यवन्ते
उत्तिष्ठन्ते ते भूय उत्तिष्ठमानाम्।
यस्या व्रते प्रसवे धर्म एजते
सा नो माता भारती भूवि भासताम्॥३॥

यां रक्षन्त्यनिशं प्रतिबुध्यमाना
देवा ऋषयो मुनयो ह्यप्रमादम्।
राजर्षयोऽपि ह्यनघाः साधुवर्याः
सा नो माता भारती भूवि भासताम्॥४॥

महान्तोऽस्यां महिमानो निविष्टा
देवा गातुं यां क्षमन्ते न सद्यः।
सा नो वन्द्या ओजसा भ्राजमाना
माता भूमिः प्रणुदतां सपत्नान्॥५॥ इति।

तदनन्तरमेकः प्रस्तावः प्रधानाचार्येण प्रस्तुतः सर्वैः सहर्षोल्लासं स्वीकृतोऽभूत्। स च प्रस्ताव एवमासीत्——

"नूनमभूतपूर्वोऽयं समयो भारतवर्षस्य दीर्घकालिक इतिहासे। चिरकालिकपारवश्यमहातमिस्रातमोऽपगमे भारतीयगगनमण्डले दिव्यं प्राभातिकं ज्योतिर्नो मानसकलिकाः प्रबोधयदिवाद्लोवयते। चतुर्दिशं भारतीयप्रजागरः स्पष्टं दरीदृश्यते। तदस्मिन् शुभावसरे देववाण्या अपि भूयो विश्वव्यापी यशः प्रसारो भवेदित्येतदर्थं सर्वथा विश्वविद्यालयीययोग्यतां भजमान एष महाविद्यालयः शासनेन सद्य एव वैधानिकदृष्ट्या वस्तुतो विश्वविद्यालयरूपतामानेय इति"।

प्रस्तावस्यास्यात्यन्तं महत्त्वम्

अयं प्रस्तावः सुतरां सहर्षं सोल्लासं च समर्थितोऽनेकैर्विद्वद्भिः। प्रधानाचार्येण शिक्षामंत्रिणं श्रीसंपूर्णानन्दं प्रति शिक्षासंचालकद्वारा प्रेषितः शासनस्य विचारार्थम्। अत्र स्मरणीयमेतद् यदन्ततोऽस्यैव प्रस्तावस्याधारेण **वाराणसेयसंस्कृतविश्वविद्यालयस्य** स्थापना आगामिनि काले समजायत। प्रधानाचार्येण प्रेरिताः केचिदन्येऽपि संस्कृतमहाविद्यालयास्तमेव प्रस्तावं समर्थ्य शासनसमीपे प्रेषितवन्तः।

एतद्विषयकस्य प्रधानाचार्यपत्रस्य महत्त्वदृष्ट्या प्रतिलिपिरांग्लिशभाषायामित्थं विद्यते——

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Principal
Govt. Sanskrit College,
Benares
Dated August 29/30, 1947

D. O. No. 125
Dear Mr. Sahney,

The last Independence Day was duly celebrated, both in the Sanskrit College and the local Sanskrit Pathashalas. There was one special feature of these celebration among the Sanskrit people whichit is worth while to bring to your notice and through you to the notice of the Hon. Minister of Education.

On the 15th instant the local Pandits of the Pathshalas held a meeting at Jnanavapi in which among other things they also resolved that it was a universal desire among the Sanskritists that the unique and historical occasion of Independence of India should be marked by the establishment at an early date of a Sanskrit University at Benares and that earliest steps be taken in that direction by at least appointing a Government Committee to prepare a scheme of the University.

A similar resolution having the same ideas was also passed at the meeting of the College staff, students and other distinguished scholars held at the Sanskrit College.

I need not point out that the idea of developing the Benares Sanskrit College into a Sanskrit University was also strongly recommended by the Sanskrit College Re-corganisation Committee in 1939. Government have approved the scheme of developing the Saraswati Bhawan into a Research Institute. There are also proposals of having the Anglo Department of the College recognised for the B. A. (in English only) and M. A. examinations by the Agra or the Benares University. I have been also asked to submit a scheme for a Training College for the Sanskrit Pandits.

In view of the above schemes already before the Government; the proposal of having a Government Committee for preparing the shceme for the proposed Sanskrit University is naturally the next step. I would therefore recommend that the time is ripe enough for actively taking up the above proposal.

Yours Sincerely,
Sd. M. D. Shastri

C. L. Sahney, Esqr. M. Sc.,
Director of Education, U. P.
4 A, Park Road,
Lucknow.

Copy forwarded to Shri Amolakh Chand Jain for the information of the H. M. E.

Sd. M. D. Shastri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"देवी रामरखी"

(मुक्तं वृत्तम्)

डा० राजमणि पाण्डेयः, कुरुक्षेत्र विश्वविद्यालयः

दासताविवशीकृते आङ्ग्लैः पराजितभारते
लार्डहार्डिञ्जाख्यगौराङ्गप्रशासितभारते
चान्दनीचौकाख्यवीथ्यां हि दिल्लीपत्तने
लार्डहार्डिञ्जस्य नानाभूतिभूषितकुञ्जरे ।
स्फोटके क्षिप्ते च हार्डिञ्जे कथञ्चिज्जीविते
आहते वै रक्तरक्ते भृत्यलोके संस्थिते
मृत्युदण्डे घोषिते वै देशभक्तचतुष्टये
वीर-'बालमुकुन्द'-सहिते देशहितहुतजीविते ।

वीर –"बालमुकुन्द"– पत्नी रामरख्याख्या शुभा
सा हि दुःखार्ता नवोढा वर्तते कृच्छ्रं गता।
घोरकारागारक्षिप्तामरणबन्धितभर्तृका
सा सती देवी भगवती दुःखिता शोकं गता ।
सततसततैर्महायत्नैर्वर्तितं देव्या तथा
प्राणप्रियपत्युः कथञ्चिद् दर्शनं लब्धं तया
सा गता कारामपृच्छत्स्वं प्रियमश्नासि किम् ?
'मृत्तिकामिश्राः प्रिये! ननु 'रोटिकाः'इति सोऽब्रवीत् ।

सा ततः आगत्य गेहं मृत्तिकामिश्रां शुभा
रोटिकामशितुं समारेभे पतिप्राणा प्रिया ।
सा गता कारामपृच्छत्स्वं प्रियं "त्वं स्वपिषि क्व?"
"कम्बलद्वयशयनमय्यामन्धकक्षायां प्रिये !"
सा ततः आगत्य गेहं कम्बलद्वयशयनके
अन्धकक्षे स्वप्तुमारेभे पतिप्राणा प्रिया ।
वध्यभूमिं स मुकुन्दः प्राप्तवान् वीरो यदा
सापि देवी वेदिकायां क्वचिद्ह्युपविष्टा तदा
सा शुभा मनसा तथा प्राणैश्च बुद्ध्या चात्मना
स्वप्रियेण सङ्गता परमे समाधौ सुस्थिता ।

अयं महिमा देवताया रामरख्याः श्रूयते
यत्र काले स मुकुन्दो निजान्प्राणांस्त्यक्तवान्
तत्र काले सापि देवी स्वं प्रियं याताऽसुभिः
दुर्लभा लब्धा चिताशय्या तया पत्या सह
पावकीभूता च पत्या दीप्यते साद्यापि वै ।।

--)०(--

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपि विद्यते ध्वन्याख्योऽलङ्कारः कश्चित् ?

य० कृष्ण शर्मा

क्रिस्तीयनवमशतकस्य उत्तरार्धे रचितः कविराजमार्गाख्यः अलंकारशास्त्रग्रन्थः कश्चन विद्योतते कन्नडभाषायाम् । उपलब्धेषु कन्नडग्रन्थेषु अयमेव प्राचीनतमः इतिप्रथते । कन्नडसाहित्येतिहासे कविराजमार्गस्यास्य विशिष्टं स्थानं वर्तते । यद्यप्ययमलंकारशास्त्रग्रन्थः, तथापि कांश्चिदनन्यलभ्यान् चारित्रिकानंशानुपहरति अयमैतिहासिकेभ्यः विमर्शकेभ्यश्चाद्ययावत् । कविराजमार्गस्यास्य बहुषु अंशेषु दण्डिनः काव्यादर्श एवादर्शः । क्वचित्पुनः भामहस्य काव्यालंकारोऽपि । लक्ष्यपद्येषु केषुचित् भारवेः माघस्य च च्छाया विलोक्यते । बहूनि चान्यानि लक्ष्यपद्यानि ग्रन्थकर्तुः स्वकीयानि इति विमर्शकानां निर्णयः ।

राष्ट्रकूटवंशस्य नृपतुंगस्य नाम राज्ञः सभासदा श्रीविजयनाम्ना विद्वत्कविना कविराजमार्गोऽयं रचितः स्यादिति सम्भाव्यते । नृपतुङ्ग एव रचयिता ग्रन्थस्यास्य इत्यपि केचिदभिप्रयन्ति ।

भारतीयकाव्यमीमांसायां कविराजमार्गस्य निर्विवादमेव विशिष्टं स्थानं वर्तते । यद्ययं गैर्वाण्यां रचितः अभविष्यत्, तदा गुणसम्प्रदायस्यान्यतमकृतित्वेन समग्रेऽपि भारतेऽस्य प्रचारोऽभविष्यत् ।१ श्रीमतां भामहदण्डिप्रभृतीनामलंकारिकाणां अनन्तरं श्रीमदानन्दवर्धनस्य समकालिकोऽयं कविराजमार्गकारः इति ऐतिहासिकानां राद्धान्तः । सन्त्यत्र कविराजमार्गे—केचन मौलिकाः विचाराः काव्यमीमांसासम्बन्धिनः । काव्यतत्वार्थकं ध्वनिरिति पदं भारतीयकाव्यमीमांसायां कविराजमार्गग्रन्थे एव इदं प्रथमतया प्रयुक्तं दृश्यते इति विपश्चितां विश्वासः । यतः क्रिस्तीयात् सप्तत्युत्तराष्टशततमात् वर्षादूर्ध्वं सप्तसप्तत्युत्तराष्टशततमाच्च वर्षात्पूर्वं (क्रि० ८७०–८७७) कविराजमार्गोऽयं रचितः स्यादित्यभ्यूहन्ते विद्वांसः । ध्वन्यालोकस्यापि प्रायः स एव रचनाकालः स्यात् । अथापि यदायं कविराजमार्गग्रन्थः पूर्णतामैत् तदानीमेव ध्वन्यालोकोऽपि पूर्णतामगमन्न वेति निश्चेतुं न किमपि ऐतिहासिकं प्रमाणमुपलभ्यतेऽद्ययावत् । पूर्णतां गतेऽपि वा ध्वन्यालोके, काश्मीरेभ्यः क्रोशानां सहस्रैः दूरे कर्णाटकेषु स्थितः कविराजमार्गकारः कथं वा ध्वन्यालोकं द्रष्टुं शक्नुयात् ? ध्वन्यालोकमदृष्ट्वैव वा कथंतरां ध्वनेः स्वरूपं साकल्येन जानीयात् ? कविराजमार्गस्य रचना ध्वन्यालोकस्य रचनातः किंचिदिव पूर्वमेव वा स्यात् । अतः कविराजमार्गस्थं ध्वनिपदमेव भारतीयकाव्यमीमांसायां ध्वनिपदप्रयोगस्य प्रथमोदाहरणमिति मन्यन्ते संशोधकाः ।

तदस्तु नाम । ध्वनेः स्वरूपं किमभिप्रैति कविराजमार्गकारः ? इति पश्यामस्तावत् । इदमस्ति कविराजमार्गे ध्वनिपदघटितं कंदपद्यमेकम् । यथा—

ध्वनियॆंबुदप्लंकारं
ध्वनियिसुगुं शब्ददिंदमर्थदे दूष्यम् ।
नेनेवुदिदर्नितु कमलदो—
ध्वनिमिषयुगमोप्पितोर्पुदितिदु चोद्यम् ॥

—कविराजमार्गः ३ –२०८

ध्वनिरित्यलंकारः
ध्वन्यते शब्देन अर्थेन दूढ्यम् ।
स्मर्तव्योऽयमित्थं

---

१. कविराजमार्गग्रन्थमिमं गैर्वाण्यामनुवदितुमर्हन्ति विद्वांसः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कमलेऽनिमिषयुगं काशतेतरामितीदं चोद्यम् ॥
—इति च्छाया ।

ध्वनिस्तावदलंकारः; सोऽपि शब्दैरेव ध्वन्यते, न पुनरर्थेनापि । "कमलेऽनिमिषयुगं काशतेतरां" इत्यादिलक्ष्यानुरोधेन यथायोग्यं पूर्वोक्तालंकाराणामन्यतमः स्मर्तव्यः इति पद्यार्थसंग्रहः । सूत्रप्रायत्वात्कारिकायाः अर्थवैशद्याय अपेक्षिताः शब्दाः निवेशयितुं नैव पारिताः ग्रन्थकारेण । "ध्वनिरित्यलंकारः" इत्यनेन वचनेन सर्वे मुह्यन्ति ।" "अर्थेन दूढ्यं" इत्यत्रापि अर्थक्लेशो बाधते सर्वान् इतीयमत्र पद्ये वस्तुस्थितिः ।

ध्वनिः, ध्वन्यते इति पदद्वयं प्रयुक्तमत्र कविराजमार्गकारेण । पद्यमिदं विद्वद्व्याख्यातृविमर्शकान् आह्वयति स्व वास्तविकार्थप्रकाशनाय । ख्यातनामानः नैके कन्नडविद्वांसः पद्यमिदं व्याख्यन् अद्ययावत् । जाग्रत्यप्यंशतोऽभिप्रायभेदे, सर्वेऽपि विद्वांसः अत्रेदं स्वीकुर्वन्ति यत्—"अत्र च कारिकायां कविराजमार्गकारेण ध्वनिरिति कश्चिदपूर्वः अलंकारः लक्ष्यलक्षणोपन्यासपूर्वकं निरूप्यते" इति । "काश्मीरेषु अभिनवोत्थितस्य ध्वनेर्ध्वनिः (अस्पष्टस्वरूपमित्यर्थः) कर्णपरम्परया कविराजमार्गकारेण श्रुतः स्यात् । तस्यापि अभिनवस्य काव्यतत्त्वस्य स्वकीयेऽलंकारशास्त्रग्रन्थे स्थानं देयमिति मनीषया सः ध्वनिसंज्ञकं कंचनालंकारविशेषं न्यरूपयत्" इति निरणयन् कन्नडविद्वांसः ।

"अर्थेन दूढ्यं" इति भागस्य "अर्थतो दूढ्यः" इत्याकारकत्वं स्वीकृत्य "वाच्यार्थोऽसङ्गतः, अत एव दूढ्यः अथापि ध्वन्याख्येन व्यापारान्तरेण प्रतीयमानः चमत्कारः एव ध्वन्यलंकारस्यास्य विशेषता ।' कमलेऽनिमिषयुगं काशतेतरामित्यत्र वाच्यार्थोऽसङ्गतः । कमले मीनद्वयावस्थितेरर्थस्य बाधितत्वात् । अथ च ध्वन्याख्यव्यापारेण योऽर्थः प्रतीयते स पुनः सुन्दरः" इत्येवंरूपेण स्वोत्प्रेक्षितं ध्वन्यलंकारं समर्थयन्ति कन्नडविमर्शकाः ।

अहं तु पश्यामि यत् — नात्र कविराजमार्गकारः ध्वन्याख्यमपूर्वमलंकारविशेषमङ्गीकरोति । अपि तु प्रसिद्धालंकारेभ्यः अतिरिक्तसत्तां केवलं ध्वनेः निराकरोति इति । "काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्वः" इत्यनेन आनन्दवर्धनस्य वचनेन काव्यतत्त्वस्य ध्वनेः व्यवहारः आलंकारिकजगति आनन्दवर्धनात्पूर्वमेव प्रचलितः आसीदिति प्रतीयते । एवं च आनन्दवर्धनात् पूर्वं तत्समकालमेव वा ध्वनेः खण्डनमपि आलंकारिकजगति आरब्धमासीदित्यभ्यूहनं नातीव असङ्गतं स्यात् । तथा च कविराजमार्गकारः अलंकारान्तर्भाववादी तृतीयाभाववादरूपस्य पूर्वपक्षस्य समर्थकः इति मदीयोऽभिप्रायः ।

अत्रैवं प्रत्यवतिष्ठन्ते ध्वन्यलंकारवादिनः यत् — "आनन्दवर्धनात्पूर्वं तत्समकालमेव वा आलंकारिकजगति ध्वनेः मण्डनं खण्डनं च प्रचलतः स्मेत्यत्र न किमपि ऐतिहासिकं प्रमाणमुपलभ्यतेऽद्ययावत् । ध्वन्यालोके दर्शिताः सर्वेऽपि पूर्वपक्षाः स्वयमानन्दवर्धनेनैव सम्भावनया उद्भाव्य दूषिताः इति अभिनवगुप्तेनैवोक्तम् । कविराजमार्गकारस्तु आनन्दवर्धनस्य समकालिकः, किंचिदिव प्राचीनो वा भवति । अर्थात् ध्वन्यालोकादपि पूर्वमेव कविराजमार्गः रचितः स्यादिति । तत्कथं वा सः आनन्दवर्धनस्य ध्वनिं जानीयात्साकल्येन ? कथंतरां वा ध्वनिमलंकारेष्वन्तर्भावयेत् ? कथंतमां च व्यञ्जनावृत्तिं दूषयेत् ? अतः कविराजमार्गकारोऽत्र कारिकायां ध्वन्याख्यमपूर्वं कंचनालंकारविशेषमंगीकरोतीत्येव वक्तुं साम्प्रतमिति ।"

मम त्वत्रैवं भाति यत्—विनापि विशिष्टपुस्तकेषु विनिवेशात् ध्वनिमुपदिशन्तिस्म बुधाः आनन्दवर्धनात्पूर्वमित्यभिनवगुप्तोक्त्या आनन्दवर्धनात्पूर्वमेव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आलंकारिकजगति ध्वनिव्यवहारः प्रचलति स्मेति स्पष्टं प्रतीयते। ध्वन्यालोकस्य रचनया ध्वनिप्रस्थान प्रतिष्ठापनश्रेयः परमानन्दवर्धनो भजते । ध्वनेराविष्कारमनु तत्खण्डनमपि (पूर्वपक्षः) उदितं स्यादालंकारिकजगति। अतो युज्यते एव आनन्दवर्धनस्य समकालिकेन कविराजमार्गकारेण व्यञ्जनायाः खण्डनं, ध्वनेश्च अलंकारेषु अन्तर्भावकथनं चेति ।

उपर्युक्तकारिकायां "अर्थेन दूढ्यं" इत्ययं भागः प्रायः सर्वेषामपि विमर्शकानां शिरोवेदनां जनयति । अर्थक्लेशो ह्यत्र बाधते सर्वान् । "ध्वन्यते शब्देन" इत्यत्र उच्चरितं "ध्वन्यते" इतिपदं "शब्देन" इत्यनेनैव केवलमन्वेति – अर्थात् "शब्देन ध्वन्यते" इत्येव केवलमन्वयः । न तु अर्थेन इत्यत्राप्यन्वेति "ध्वन्यते" इति पदमिति केचित् । अत एवैते "अर्थेन" इत्यस्य "अर्थतः" इति रूपं कल्पयित्वा "कमलेऽनिमिषयुगमिति लक्ष्यानुरोधेन च "वाच्यार्थोऽसङ्गतः अत एव दूढ्यः" इति व्याख्यान्ति ।

अत्राप्यहमिदमुचितं पश्यामि यत्–"ध्वन्यते" इति पूर्वोच्चरितं पदं उत्तरत्र "अर्थेन" इत्यत्राप्यन्वेत्येवेति । तथा च अर्थेनापि ध्वन्यते इति मतं दूढयमित्यर्थः । तन्त्रेणोच्चरितमत्र "ध्वन्यते" इति पदं "शब्देन" इत्यत्र यथा, तथैव "अर्थेन" इत्यत्राप्यन्वेतीत्येव स्वारसिकी प्रतीतिः । इत्थं च "ध्वनिरित्यलंकारः" इति कविराजमार्गस्य पद्यस्यार्थमहमित्थमुत्प्रेक्षे––

(१) "ध्वनिरित्यलंकारः"

ध्वनिरिति यच्छ्रूयते काव्यतत्वमभिनवं तदपि उक्तेभ्योऽलंकारेभ्यो नातिरिच्यते ।

(२) "ध्वन्यते शब्देन"––

तदपि काव्यतत्वं – उक्तालंकारानतिरिक्तमित्यर्थः–शब्दैरेव – अभिधालक्षणान्यतरवृत्तिद्वारेत्यर्थः–प्रतीयते । न पुनरर्थेनापीति ।

(३) "अर्थेन (ध्वन्यते इति मतं) दूढ्यम्"

अर्थेनाप्यर्थान्तरं ध्वन्यते इति मतं दूढयमित्यर्थः। (अर्थेनार्थान्तरस्य ध्वनने हि उपस्थितेनैकेन केनचिदर्थेनान्योऽपि अर्थः कुतो न प्रतीयते ? इति पर्यनुयोगापत्तेः) ध्वनिवादिनो हि व्यञ्जनावृत्त्याश्रयणेन शब्दसहकृतोऽर्थोऽपि अर्थान्तरं ध्वनयतीत्यङ्गीकुर्वन्ति । तदेतन्मतं दूढ्यमिति कविराजमार्गकाराशयः । अर्थाश्रितापीयं व्यञ्जनावृत्तिरिति तु हास्यास्पदमेवेति । अभिधा-लक्षणातिरिक्तायाः शब्दार्थोभयवृत्तेर्व्यञ्जनाख्यायाः प्राचीनैराचार्यैः अनुल्लिखितत्वेन अविश्वसनीयत्वादित्यर्थः ।

(४) "स्मर्तव्योऽयमित्थं"

कमलेऽनिमिषयुगं काशतेतरामित्यादिलक्ष्येषु यथायोग्यं अतिशयोक्त्याद्यन्यतमोऽलंकारः स्मर्तव्यः । अर्थात् यत्र यत्र लक्ष्यविशेषेषु ध्वनिर्ध्वनिरित्याग्रहो ध्वनिवादिनां, तत्र सर्वत्रापि अतिशयोक्ति-समासोक्त्याद्यन्यतमोऽलंकारः समन्वेति इत्यर्थः। कमलेऽनिमिषयुगं काशतेतरामित्यत्रातिशयोक्तिरलंकारः। तथा च 'अर्थेन दूढ्यं' इति वचनेन कविराजमार्गकारः व्यञ्जनावृत्तिं दूषयति। स्मर्तव्योऽयमित्थमित्यनेन च "अनुवादोऽयं, न तु ध्वन्याख्यालंकारस्य अपूर्वविधिः" इति ज्ञापयति । अतो नात्र ध्वन्याख्यालंकारान्तराङ्गीकारावकाशः ।

"स्मर्तव्योऽयमित्थमित्यत्र न स्मृतिरूपोऽर्थो ग्राह्यः, अपि तु "कमलेऽनिमिषयुगं काशतेतरां" इति लक्ष्यं ध्वन्यलंकारस्य उदाहरणमिति ज्ञेयमित्येव ग्रन्थकर्तुराशयः" इत्यपि वदन्ति ध्वन्यलंकारवादिनः । परं तु धातोः मुख्यार्थहानापत्तेः तेषामियमुक्तिः कथं संगच्छते ? इति न जानामि । इत्थं च कन्नडविमर्शकैः उत्प्रेक्षितो ध्वन्यलंकारः शशशृङ्गात् नातिरिच्यते इति मदीयोत्प्रेक्षा ।

अपि नाम संस्कृतालंकारिकेषु केनचित्, संस्कृतेतरासां भारतीय भाषाणामालंकारिकेषु वा केनचित् ध्वनिरिति कश्चिदलंकारविशेषो निरूपितो विद्यते क्वचिद्ग्रन्थे ? यदि तथा, तदा तमलंकारं लक्ष्यलक्षणोपन्यासपूर्वकं कविकृतिनामग्राहं च आविष्कुर्वन्तु कृपया जिज्ञासूनामुपकारायेति सर्वानपि भारतीयान् विदुषः साञ्जलिबन्धमभ्यर्थये ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रमागतम्—

चारुचरितामृतबिन्दुः

(हुतात्मनां द्वादशार्यवीराणां संस्कृतपद्यनिबद्धं जीवनचरित्रम्)

श्री हजारीलाल शर्मा (विद्यालंकारः

(१)

आर्ये समाजे बहुलब्धमानः
प्रचारकार्ये प्रथमः प्रधानः
प्रदाय-प्राणान् बलिदानवेद्यां
दिवं गतः श्रीयुतलेखरामः ।।

(२)

श्रीमानसौ पञ्चनदीय जेहलुम्-
सुमण्डले सैदपुरेऽजनिष्ट ।
एकोनविंशे शतके तु पञ्च-
दशोत्तरे विक्रमवत्सरे च ।।

(३)

चैत्राष्टमीके सुदिने सुजन्म
लब्ध्वार्यवीरः सुमनो विभूतिः ।
सारस्वते ब्राह्मणपूतवंशे
परां प्रसिद्धिं समुपेत आर्यः ।।

(४)

उर्दू सुभाषां प्रपठन् स्वबाल्ये
जातः प्रवीणः प्रियलेखरामः ।
तारुण्यमाप्ते नगरस्य रक्षा–
पदाधिकारीति पदे नियुक्तः ।।

(५)

षट्त्रिंश वर्षे समभूद् विवाहो
लक्ष्मीति देव्या सह पण्डितस्य
स्वधर्मपत्न्या सह वीर आर्य-
सामाजिके कार्यविधौ प्रवृत्तः ।।

(६)

समस्तदेशे खलु भारतेऽसौ
धर्मप्रचारार्यवरो भ्रमंश्च ।
ईशामशीयै र्यवनैश्च सार्धं
शास्त्रार्थवादं कुरुते स्म धीरः ।।

(७)

शास्त्रार्थवादे प्रियपण्डितोऽसा
वीशामशीयानथ पारसीयान् ।
ग्रन्थान् चखण्डे निजतीव्रबुद्ध्या
निर्भीक आर्यः प्रियलेखरामः ।।

(८)

अस्थापयत् श्रीयुतलेखरामः
'पेशावरेऽप्यार्यसमाजसंस्थाम् ।
शुद्धिप्रचारेण चकार हिन्दू-
नीशामशीयान् यवनांस्त्वनेकान् ।

(९)

हा ! हन्त ! चान्ये यवना ह्यनार्या
आर्यं सुवीरं परिहन्तुकामाः ।
चेष्टाः प्रचक्रुर्विविधा मलीनाः
पिपीलिका पश्यति छिद्रमेव ।।

(१०)

हा ! हन्त ! चैकः कपटाभ्युपेत
आर्यं निहन्तुं यवनो निकृष्टः ।
उपासदत् शुद्धिमिषेण धूर्तः
श्रीलेखरामं करुणानिधानम् ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(११)

संकेतितो मित्रवरैरनेकैः
श्रीलेखरामश्छलिनि ह्यमुष्मिन् ।
विश्वस्य चासावुपदेशवाणीं
विश्वस्य चासावुपदेशवाणीं
दातुं प्रवृत्तः खलु वामनाय ॥

(१२)

हा चैकदासौ धृतकौक्षिकेय
आर्यं निहन्तुं समुपस्थितोऽभूत् ।
नराधमो हा ! छुरिकां विषाक्तां
श्रीलेखरामोदरमध्यमधात् ॥

(१३)

हा ! लेखरामोदरमध्यभागा-
च्छस्त्रेण छिन्नाद् रुधिरस्य धारा ।
हा ! हाऽऽलपन्तीं जनतां रुदन्तीं ॥
विस्मामयन्ती वहते स्म वेगात् ॥

(१४)

हा ! हाऽऽततायी प्रियधर्मपत्नी-
मार्यां तदीयामपि संप्रहृत्य
विमोच्य चात्मानमहो द्रुतं हा !
दुद्राव नीचः क्षुरिकां दधानः ॥

(१५)

कृतोपचारेऽपि न रक्तधारा
रुद्धाऽभवद् हन्त ! समाजसेवी ।
हा ! हा ! रुदन्तीं जनतां समस्तां
विहाय यातो दिवमार्यवीरः ॥

(१६)

आर्यैः समस्तैरवरोधनीयं
न लेखकार्यं सततं स्वकीयम् ।
इत्यार्य जातिं प्रति धर्मवीर-
स्यार्यस्य संदेश इयाननन्यः ॥

गुरुकुल-पत्रिकाविवरणम्

१. प्रकाशनस्थानम्——	कांगड़ीगुरुकुलम्
२. प्रकाशनं कदा भवति——	मासिकी पत्रिका
३. स्वामिनी समितिः——	गुरुकुलकांगड़ीविश्वविद्यालयस्य विद्यासभा
४. सम्पादकस्य नामधेयम्——	श्री भगवद्दत्तो वेदालंकारः
राष्ट्रियता——	भारतीयः
संकेतः——	कांगड़ीगुरुकुलम्
५. प्रकाशकस्य नामधेयम्——	श्री गंगारामः कुलसचिवः
राष्ट्रियता——	भारतीयः
६. मुद्रकस्य नामधेयम्——	श्री सुरेशचन्द्रो वैष्णवः
राष्ट्रियता——	भारतीयः

अहं गंगारामो घोषयामि यदुपरिलिखतं विवरणं मदीयज्ञानविश्वासानुसारं यथार्थं वर्तते ।

ह० गंगारामः कुलसचिवः
गुरुकुल-पत्रिकाप्रकाशकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीय टिप्पण्यः

उदारचरितानां तु वसुधैव कुटुम्बकम्

अस्मिन् संसारे ये उदारचरिताः पुरुषा विद्यन्ते-तेऽहंकारजन्यानां क्षुद्रवृत्तीनां पाशबद्धा न भवन्ति । अहं ममेत्यादि ममत्वप्रायाणां शब्दानाँ कोलाहलस्तेषां मुखान्न कदापि श्रूयते । अयं मम परिवारः, इमे मे ज्ञातयः, इमे च मे बन्धु-बान्धवाः, इमे पौरस्त्याः, उत्तरास्थाः, इमे च दाक्षिणात्याः, अयं हिन्दुः, अयं मुसलमानः, क्रिश्चियनो वा सिक्खोवा । अयं पञ्जाबी, अयं च बङ्गाली, मद्रासी, महाराष्ट्रीयः, एवमेव संकीर्णताद्योतकान् शब्दान् देशादिपरिधीन् वा उररीकृत्य न ते कदापि भाषन्ते। सर्वे एते भारतीया भारतमातुः पुत्रा इति तेषां विचारसरणिः भवति । तेषामादर्शस्तोत्वं भवति–"माता भूमिः पुत्रोऽहं पृथिव्याः" इति ऋचाभ्युक्तं तथ्यं सदा ते मन्वते । मनसा वाचा कर्मणा तथाऽऽचरन्ति । अण्वपि मनस्तेषां व्यापनशीलं भवति। पुरा भारतवर्षे बहव उदारचरिता लोकोत्तरपुरुषाः संजाताः । परमधुना त्वंहकारजन्यैर्बहुभिः परिधिभिर्निगडितोऽयं देशः स्वतन्त्रतावाप्त्यनन्तरमपि महतीं दुःखसन्ततिमावहति । प्रदेशीयनिर्वाचनप्रसङ्गे जातिदोषः सम्मुखमभ्युपेत्य भाति यदहं त्वज्जातीयोऽतस्तव वोटस्तु मदर्थमेव भविष्यति नाम नूनम् । सर्वकारादि नियुक्तिप्रसङ्गेऽप्यसावेव दोषो यथा तथा परोक्षद्वारेण तत्र प्रवेशं लभते योग्यताया न तत्र स्थानम् साचार्द्धचन्द्रं दत्वा बहिर्निस्सारितेति मन्तव्यम् । परोपकाराय सतां विभूतय इत्युक्तिरुदारचरिते पुरुषे गतार्था जायते । महर्षिदयानन्द-प्रयत्नेन यो जातिदोषः उच्छिन्नतां गत आसीत् स राजनीतिमलावलिप्तानां स्वार्थपरायणानां प्रयत्नेन पुनः जनि लेभे । अन्यच्च, अधुना भारते धनेन भागवतस्थानं लब्धम् । तस्य सञ्चये व्यये च अहं ममेति वृत्तिकर्षिताऽभूतपूर्वानुदारता सर्वत्र प्रसृताऽऽस्ते । अन्ये च बहवोऽतिकृपणाः स्वभावलुब्धा उचितानुचितमविगणय्य येन केनाप्युपायेनार्थसञ्चयपरा धनराक्षसा अस्मिन्देशे समुत्पन्ना ये धर्माय, याचकाय तथाऽन्यस्मै परोपकारकार्याय न कदाप्यर्पयन्ति स्वीयानि धनानि । दृढतरनिबद्धमुष्टयोऽतितीव्राहंकारनिगडिता दानं त्यागं वा न गणयन्ति । केनापि कविना साधूक्तम्--

> दानेन भूतानि वशीभवन्ति,
> दानेन वैराण्यपि यान्ति नाशम् ।
> परोऽपि बन्धुत्वमुपैति दानै,
> र्दानं हि सर्वव्यसनानि हन्ति ॥

न केवलं स्वकीयकुटुम्बेभ्यः स्वबन्धुबान्धवेभ्य एव वित्तस्य व्ययो विधातव्यः । परमेतन्मनसि निधाय यत् पृथिव्यां सर्वप्राणिनो मम बान्धवाः सन्ति । अस्मिन् जन्मनि त्वेते वर्तमाना बान्धवाः सन्ति, गतजन्मनि अन्ये आसन् भाविजन्मनि चान्ये एव भविष्यन्तीत्येवं सर्वप्राणिबन्धुभावनाभावितान्तःकरणाः सन्तो मनुष्या अस्माकं वसुधैव कुटुम्बकमिति मंस्यन्ते । उदारं च तेषां चरित्रं भविष्यति । वेदेऽपि निगदितम्--

> जनं बिभ्रती बहुधा विवाचसं नानाधर्माणं पृथिवी यथौकसम् ।

विविधभाषाभाषिणं नानाधर्मधारिणं जनसमुदायं विभर्त्येषा पृथिवी परिवारभावनयेति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुले स्वामिवर्ययोरपूर्वाभिनन्दनम्

१९७३ तमे दिसम्बरमासस्य २३तमतारिकायां बहुवर्षानन्तरं चण्डीगढ़न्यायालयस्यादेशेन तस्यैव छत्रच्छायायां पञ्जावार्यप्रतिनिधिसभाया निर्वाचनमभूत् । आर्या अपि न्यायालये गच्छन्तीति महत्लज्जास्पदम् । अस्तु ! निर्वाचनं जातम् । तत्र बहुमतेन युवा संन्यासी तत्रभवान् इन्द्रवेशः प्रधानपदमलञ्चकार । वयमस्य संन्यासिवर्यस्याभिनन्दनं कुर्मः । अयं संन्यासी युवा तस्य सहयोगी अपरः कर्मठो दृढ़प्रतिज्ञः प्राज्ञः अग्निवेशोऽपि युवा संन्यासी विद्यते । अत्र वयं निःसंशयं ब्रूमो यत् निर्वाचनप्रसङ्गे सम्प्राप्तो विजयस्त्वतीव गौणः । सर्वातिशायी सर्वाधिकं महत्त्वशाली विजयस्त्वस्मिन् कामक्रोधादिवासनापरिप्लुते संसारे सर्वविधवासनानामेव भवति ।

आभ्यां यौवन एव कण्टकाकीर्णः दयानन्दीयः पन्थाअवलम्बितः । अतो नतमस्तका वयं तौ प्रणोनुमः । निर्वाचनानन्तरं द्वावेतौ संन्यासिनौ तथा गुरुकुलीयोपप्रधानः श्री पृथ्वी सिंह आजादः, श्रीसत्यदेवो विद्यालंकारश्च गुरुकुले समायाताः । अत्रैषामभूतपूर्वाभिनन्दनं गुरुकुलीयाधिकारिभिस्तथान्यैः कर्मचारिभिर्विहितम् । गुरुकुलस्योन्नतिविषये तैः स्वभाषणेषु हृद्गतोद्गारः प्रकटीकृतः । गुरुकुले किं किं परिवर्तनं तैश्चिन्तितमिति भविष्यगर्भे निहितम् । वयमेतद् ब्रूमो यत् त्यक्तपुत्रवित्तैषणमपि विद्वांसं लोकैषणा गर्ते पातयति । "सत्यं वै देवा अनृतं मनुष्याः" इति अनृतप्रायैर्मनुष्यैः प्रदत्तां कीर्तिं न कामयन्ते त्यक्तसर्वपरिग्रहा विवेकिनोऽग्निपुरुषाः। गगनविहारिभिः सिद्धैर्देवैर्ऋषिभिर्यत् सत्यमवितथं प्रकटीकृतं तदेवानुसरन्ति । वयं पुनस्तेषामभिनन्दनं कुर्मः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साहित्य समीक्षा

संस्कृत व्याकरण शास्त्र का इतिहास

(१म, २य तथा ३य भाग)

लेखकः—श्री पं. युधिष्ठिरो मीमांसकः
प्रकाशकः—रामलाल कपूर ट्रस्ट, बहालगढ़, जिला सोनीपत (हरयाणा)
मूल्यम् ६०) भागत्रयस्य

पदवाक्यप्रमाणज्ञानां पण्डितप्रवराणां महाविदुषां श्री पं. युधिष्ठिरमीमांसकमहोदयानां त्रिषु भागेषु विभक्तं हिन्दीभाषायामुपनिबद्धं "संस्कृतव्याकरण शास्त्र का इतिहासेति" नामकं पुस्तकत्रयमस्य महाभागस्यैतिह्यक्षेत्रेऽपि महावैदुष्यं व्यनक्ति। प्रथमभागस्येदं संशोधितं परिवर्तितं परिवर्द्धितं च तृतीयं संस्करणं विद्यते। एवमेव द्वितीयभागस्यापि संशोधितं परिवर्तितं परिवर्धितं च द्वितीयं संस्करणं तथा तृतीयभागस्य प्रथममेव संस्करणमधुना प्रकाशितम्। एषां त्रयाणां भागानां मूल्यं षष्टिरूप्यकम्। काऽपि भाषा-कूटस्था स्थिरा वा न भवति प्रत्युत सततप्रवाहमयी जायते। अतः परिवर्तनं तत्र स्वाभाविकं जायते। केचन शब्दा विलुप्यन्तेऽन्ये आविर्भवन्ति, शब्देषु विकारोऽर्थपरिवर्तनं वा जायते। परं संस्कृतभाषायां तु मुख्यतः ह्रास एव विलोक्यते तत्र हेतुर्बुद्धिमालिन्यं मनुष्याणां स्मृतिसंकोचो ह्रासापत्तिर्वा। ये पूर्वं जनतासु प्रसृता आसन् ह्रासवशात् तेऽधुना न श्रूयन्ते। तेषां कथञ्चित् स्थायित्वे व्याकरणमेवैकं साधनम्। संस्कृतभाषाया व्याकरणस्य तु नैकविधानि प्रयोजनानि महाभाष्ये पतञ्जलिमुनिना प्रदर्शितानि सन्ति। ये केचन विद्वांस एवं प्रत्यवतिष्ठन्ते यत् अपाणिनीयप्रयोगा असाधवस्तेऽस्य विदुषो मते न समीचीनदर्शिनः, यथोत्तरं मुनीनां प्रामाण्यमित्यस्यापि तथाऽन्येषां नैकविधप्रश्नानां यत् समाधानमनेन वैयाकरणदिग्गजेन विहितं अन्यच्च "संस्कृतभाषा की प्रवृत्ति विकास और ह्रास" नामके अध्याये अपाणिनीयप्रयोगाणां साधुत्वविचारे नैकशब्दानां मूलप्रकृतिनिर्णये स्वोपज्ञपूर्विका मौलिकी या तर्कशैली प्रयुक्ता तत् पाठं पाठं महान् आनन्दो हार्दपरितोषो वा जायते। अस्मन्मते त्रिषु भागेषु विभक्तं पुस्तकमिदं भारतवर्षस्य सर्वेषु विश्वविद्यालयेषु पाठ्यपुस्तकरूपेणाङ्गीकरणीयम्। वयं पण्डितवर्याणां दीर्घायुष्यं कामयामहे, येन दीर्घकालपर्यन्तं देववाण्याः सेवां कर्तुं समर्थाः भवेयुः।

पारिजात मञ्जरी

लेखकः—श्री जगन्नाथ रिवु, शास्त्री
प्रकाशकः—श्री अवतारकृष्ण रिवु, भट्टयार आलीकदल, श्रीनगर, काश्मीर
मूल्यम् ५)

श्रीमद्भिः पं. जगन्नाथ रिवु शास्त्रिभिः काश्मीरभाषान्तर्गतवाङ्मयस्य कासाञ्चित् सर्वजनसुलभरचनानामनुवादं विधाय स्वतन्त्ररूपेणापि विलिख्य देववाण्या महती सेवा कृता। पुस्तकस्था बह्व्यः रचनाः पूर्वं गुरुकुलपत्रिकायामपि प्रकाशिता आसन्। अस्मिन् पुस्तके 'अमरनाथ जी की अमर कथा' तथा 'शिव की महानता' इति रचनाद्वयमतिगौरवपूर्णं विद्यते। अत्र भक्तिज्ञानकर्मयोगादीनधिकृत्य रचनाः कृताः सन्ति। पुस्तकमिदं ग्राह्यं सर्वैः पठनीयं च विद्यते।

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिसम्बर १९७३ अंक से आगे:—

वैदिक संहिताओं में प्रश्नोत्तर-शैली

डा० रामनाथ वेदालंकार

सामवेद के प्रश्नोत्तर

सामवेद में विशेष प्रश्नोत्तर नहीं पाये जाते। तो भी ऐन्द्र पर्व के एक सुन्दर प्रश्नोत्तर का उल्लेख यहां किया जाता है।

क्वा ३ स्य वृषभो युवा तुविग्रीवो अनानतः।
ब्रह्मा कस्तं सपर्यति ॥

साम पू० २.३.७।

"वह वृषभ, युवा, बहुत सी ग्रीवाओं वाला, किसी के आगे न झुकने वाला इन्द्र कहां है? और कौन ज्ञानी उसकी सपर्या करता है?

यहां दो प्रश्न किये हैं। इन्द्र चर्मचक्षुओं से दिखाई नहीं देता, अतएव कई यह कहते हैं कि इन्द्र है ही नहीं,५२ परन्तु आस्तिक लोग निश्चित रूप से उसकी सत्ता बताते हैं तथा कहते हैं कि वह सुखादि की वर्षा करने वाला (वृषभ) है, नित्य तरुण है, बहुत सी ग्रीवाओं वाला अर्थात् बहूपदेष्टा है, किसी से पराजित नहीं होता। उसके विषय में प्रश्न उठाया है कि यदि वह है तो बताओ कहां है? दूसरा प्रश्न यह किया है कि यदि वह है भी तो जो निराकार है, नेत्रों से दीखता नहीं, जिसका त्वचा से स्पर्श नहीं होता, जो श्रोत्र से सुनाई नहीं देता, रसना से जिसका स्वाद नहीं लिया जा सकता, नासिका से जिसे सूंघा नहीं जा सकता, ऐसे देव की सपर्या भला कौन कर सकता है। दोनों प्रश्नों का एक साथ ही श्लिष्ट वाणी में उत्तर दिया गया है--

उपह्वरे गिरीणां संगमे च नदीनाम्।
धिया विप्रो अजायत ॥

साम पू० २.३.८

"पर्वतों के एकान्त प्रदेश में तथा नदियों के संगम पर वह रहता है, अर्थात् उसकी अनुभूति करने के लिए ऐसे शान्त, पवित्र वातावरण की आवश्यकता है। द्वितीय प्रश्न का उत्तर मन्त्र के उत्तरार्ध में दिया गया है कि ध्यान द्वारा जो ज्ञानी हो गया है वही उसकी सपर्या करने योग्य होता है।"

अथर्ववेद के प्रश्नोत्तर

अब हम अथर्ववेद के प्रश्नोत्तर पर दृष्टि-निक्षेप करते हैं।

को नु गौः क एकऋषिः किमु धाम का आशिषः।
यक्षं पृथिव्यामेकवृदेकर्तुः कतमो नु सः ॥
एको गौरेक एकऋषिरेकं धामैकधाशिषः।
यक्षं पृथिव्यामेकवृदेकर्तुर्नातिरिच्यते ॥

अथर्व ८.९.२५,२६

प्रश्न: गौ कौन है? एकऋषि कौन है? धाम क्या है? आशीर्वाद कौन से हैं? पृथिवी पर जो एक ही यक्ष है, वह कौन सा है? एक ऋतु कौन सी है?

उत्तर: एक ही गौ है, एक ही एकऋषि है, एक ही धाम है, एक ही प्रकार के आशीर्वाद होते हैं। यक्ष पृथिवी पर एक ही है। एक ही ऋतु है, अधिक नहीं।

---

५२. नेन्द्रो अस्तीति नेम उ त्व आह क ईं ददर्श कमभिष्टवाम। ऋग् ८.१००.३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रश्न यह था कि गौ कौन है, एकऋषि कौन है आदि। तदनुसार उत्तर में नामोल्लेख होना चाहिये था कि अमुक गौ है, अमुक एकऋषि है। परन्तु स्पष्ट निर्देश न कर वेद उत्तर में केवल इतना संकेत करता है कि गौ, एकऋषि आदि एक-एक ही हैं। शेष उत्तर की पूर्ति प्रश्नकर्ता जिज्ञासु पर ही छोड़ देता है कि वह अपनी बुद्धि को प्रेरित करे और निश्चित उत्तर तक पहुंचे। एक सूत्र यहां पकड़ा दिया गया, अन्य सूत्र वेद में ही इतस्ततः मिल जाते हैं। उन्हें गृहीत कर निश्चित परिणाम पर पहुंच जाना कठिन नहीं है। वेद की यह शिक्षण-शैली कई स्थानों पर मिलती है तथा शिक्षामनोविज्ञान की दृष्टि से विशेष ध्यान देने योग्य है। यहां गो शब्द पुल्लिङ्ग व्यवहृत हुआ है। यह एक गौ अर्थात् वृषभ सूर्य है।५३ यद्यपि इस सौर जगत् में अन्य भी गो या वृषभ हैं, यथा पर्जन्य, अग्नि, बैल पशु आदि, तथापि सर्वप्रमुख वृषभ सूर्य ही है। अध्यात्म में यह वृषभ प्राण होगा, जो शरीररूपी शकट को खींचता है५४। एकऋषि शरीर में आत्मा एवं ब्रह्माण्ड में परमात्मा है। ऋषि का अर्थ द्रष्टा होता है।५५ शरीर में मन, चक्षु, श्रोत्र आदि, राष्ट्र में राजा, अमात्य आदि, ब्रह्माण्ड में सूर्य, चन्द्र, नक्षत्रादि भी यद्यपि ऋषि हैं, किन्तु परम ऋषि आत्मा या परमात्मा ही है। एक धाम मोक्षधाम है, जो अन्य अनेकों लौकिक धामों से श्रेष्ठ है। आशीर्वाद भी एक ही होता है, वह है स्वस्ति का आशीर्वाद।५६ यद्यपि दीर्घायु होने, सौभाग्यवान् होने, तेजस्वी होने, ऐश्वर्यशाली होने आदि के अनन्त आशीर्वाद हो सकते हैं, परन्तु उन सबमें स्वस्ति अन्तर्निहित होता है। यक्ष (पूजनीय) भी पृथिवी पर एक ही है, वह है परमेश्वर। यद्यपि माता, पिता, अतिथि, गुरुजन आदि अनेक पूजनीय हैं, तो भी वह पूजनीयों का भी पूजनीय एवं परम यक्ष है।५७ फिर, एक ही ऋतु है, अधिक नहीं। यह ऋतु संवत्सर है। यद्यपि वेद के अनुसार ऋतुओं की संख्या वर्गीकरणों के भेद से बारह, सात, छः, पांच, चार, तीन, दो, एक और अहोरात्रों की दृष्टि से ३६० या ७२० होती है, तो भी संवत्सररूप एक ऋतु ही प्रधान है।५८ ऐसी सौ ऋतुओं से मनुष्यों का शतसंवत्सर जीवन-यज्ञ बनता है।५९

अथर्ववेद के केनसूक्त (१०.२) में भी कुछ प्रश्नोत्तर मिलते हैं।

---

५३. गौः आदित्यो भवति, निरु. २. १४।

५४. प्राणो हि गौः। शत. ४.३.४.२५।
अनड्वान् प्राण उच्यते। अथर्व ११.४.१३।

५५. ऋषिर्दर्शनात्। निरु. २.११।

५६. स्वस्ति गोभ्यो जगते पुरुषेभ्यः अथर्व १.३१.४। स्वयन्तु यजमानाः स्वस्ति, वही ४.१४.५। स्वस्ति न इन्द्रो मघवान् कृणोतु, वही ७.९१.१। कृणोमि ते प्राणापानौ जरां मत्युं दीर्घमायुः स्वस्ति, वही ८.२.११।

५७. महद् यक्षं भुवनस्य मध्ये तपसि क्रान्तं सलिलस्य पृष्ठे। अथर्व १०.७.३८।

५८. द्रष्टव्यः निरु. ४.२७। ऋषभो वा एष ऋतूनां यत् संवत्सरः तै. ब्रा. ३.८.३.३।

५९. द्रष्टव्यः सातवलेकरकृत अथर्ववेदभाष्य में इस प्रश्नोत्तर की व्याख्या।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

केन श्रोत्रियमाप्नोति केनेमं परमेष्ठिनम् ।
केनेममग्निं पूरुषः केन संवत्सरं ममे ॥
ब्रह्म श्रोत्रियमाप्नोति ब्रह्मेमं परमेष्ठिनम् ।
ब्रह्मेममग्निं पूरुषो ब्रह्म संवत्सरं ममे ॥
अथर्व १०.२.२०,२१

प्रश्न : किसकी कृपा से पुरुष श्रोत्रिय गुरु को प्राप्त करता है, किसकी कृपा से परमेष्ठी को प्राप्त करता है, किसकी कृपा से अग्नि को प्राप्त करता है, किसकी कृपा से संवत्सर को मापने में समर्थ होता है ?

उत्तर : ब्रह्म की कृपा से ६० पुरुष श्रोत्रिय गुरु को प्राप्त करता है, ब्रह्म की कृपा से परमेष्ठी को प्राप्त करता है, ब्रह्म की कृपा से अग्नि को प्राप्त करता है और ब्रह्म की ही कृपा से संवत्सर को मापने में समर्थ होता है।

अज्ञान तथा मोह के अन्धकार से पार कर दिव्य ज्ञान एवं विवेक के प्रकाश में पहुंचा देने वाले, मुक्तिमार्ग के प्रदर्शक श्रोत्रिय गुरु विरलों को ही मिल पाते हैं। जिन पर परब्रह्म की कृपा होती है वे ही ऐसे परम निष्णात गुरु को प्राप्त करते हैं। जगत्प्रपंच से मन को विमुख कर अन्तर्मुख हो परमेष्ठी आत्मा का दर्शन करने वाले भी संसार में वे ही होते हैं जिन पर परब्रह्म कृपा करते हैं। कठोपनिषद् के नचिकेता के समान अग्निविद्या या यज्ञ के रहस्य को हृदयंगम भी वे ही करते हैं जिन पर परब्रह्म की कृपादृष्टि होती है। इसी प्रकार एक-एक संवत्सर को मापते हुए जीवन के शत-संवत्सर-यज्ञ को सकुशल पार करने वाले भी ब्रह्मकृपा प्राप्त पुरुष ही होते हैं।६१

केन देवां अनुक्षियति केन दैवजनीर्विशः ।
केनेदमन्यन्नक्षत्रं केन सत् क्षत्रमुच्यते ॥
ब्रह्म देवां अनुक्षियति ब्रह्म दैवजनीर्विशः ।
ब्रह्मेदमन्यन्नक्षत्रं ब्रह्म सत् क्षत्रमुच्यते ॥
अथर्व १०.२.२२, २३

प्रश्न : किससे मनुष्य देवों में वास करने योग्य होता है, किससे दैवजनी प्रजाओं में वास करने योग्य होता है ? किससे ये अन्य (क्षत्रियभिन्न) मनुष्य 'नक्षत्र' कहाते हैं ? कुछ मनुष्य किससे श्रेष्ठ क्षत्र कहाते हैं ?

उत्तर : ब्रह्म ही है जिसकी कृपा से मनुष्य देवों में वास करने योग्य होता है। ब्रह्म ही है जिसकी कृपा से दैवजनी प्रजाओं६२ में वास करने योग्य होता है। ब्रह्म ही है जिसकी व्यवस्था से क्षत्रियेतर ब्राह्मणादि वर्ण न-क्षत्र कहाते हैं, ब्रह्म ही है जिसकी व्यवस्था से कुछ लोग श्रेष्ठ क्षत्रिय कहाते हैं।६३

केनेयं भूमिर्विहिता केन द्यौरुत्तरा हिता ।
केनेदमूर्ध्वं तिर्यक् चान्तरिक्षं व्यचो हितम् ॥
ब्रह्मणा भूमिर्विहिता ब्रह्म द्यौरुत्तरा हिता ।
ब्रह्मेदमूर्ध्वं तिर्यक् चान्तरिक्षं व्यचो हितम् ॥
अथर्व १०.२.२४,२५

---

६०. ब्रह्म=ब्रह्मणा। सुपां सुलुग् पा० ७.१.३९ से तृतीया विभक्ति का लुक् होकर यह रूप बना है।

६१. तुलनीय : मु० २.४।

६२. दैवजनीः विशः=यज्ञ, परोपकार आदि द्वारा देवजनों का हित करने वाली प्रजाएं। देवजनेभ्यो हिता दैवज०यस्ताः।

६३. क्षतात् किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः। रघुवंश २.५३। जो आपत्तियों से रक्षा करे वह क्षत्र, तथा तदितर वर्ण न-क्षत्र हुए।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रश्न : किसने यह भूमि रची है ? किसने ऊपर द्युलोक को निहित किया है। किसने इस विस्तीर्ण अन्तरिक्ष को ऊर्ध्व तथा तिरछे स्थापित किया है ?

उत्तर : ब्रह्म ने भूमि रची है। ब्रह्म ने ऊपर द्युलोक को निहित किया है। ब्रह्म ने ही ऊर्ध्व तथा तिरछे इस विस्तीर्ण अन्तरिक्ष को स्थापित किया है।

अथर्व. ११.८ में सृष्ट्युत्पत्ति का अलंकारमय वर्णन करते हुए निम्न प्रश्नोत्तर हुए हैं--

यन्मन्युर्जायामावहत् संकल्पस्य गृहादधि ।
क आसं जन्याः के वराः क उ ज्येष्ठवरोऽभवत् ।।
तपश्चैवास्तां कर्म च-अन्तर्महत्यर्णवे ।
त आसं जन्यास्ते वरा ब्रह्म ज्येष्ठवरो ऽभवत् ।।
अथर्व. ११.८.१,२

प्रश्न : जब मन्यु संकल्प के घर में से जाया को लाया उस समय घराती कौन थे, बराती कौन थे और ज्येष्ठ वर कौन था ?

उत्तर : महान् अर्णव के अन्दर तप तथा कर्म विद्यमान थे। वे ही घराती एवं बराती थे। ब्रह्म ज्येष्ठ वर था।

यहां परमात्मा तथा प्रकृति के विवाह का आलंकारिक वर्णन है। परमात्मा के अन्दर सृष्ट्युत्पत्ति के लिए जाया की इच्छा हुई। उसने संकल्प किया और जाया मिल गयी, मानों संकल्प के घर से जाया को ले आया। ब्रह्म इस विवाह में ज्येष्ठ वर था, तप घराती थे, कर्म बराती थे। तप का अर्थ है स्रष्टव्यपर्यालोचनात्मक ज्ञान[६४]। ब्राह्मणग्रन्थों में इस ईश्वरीय तप का आलंकारिक चित्रण करते हुए कहा गया है कि उसने इतना घोर तप किया कि उसके ललाट से स्वेदधारायें प्रवाहित होने लगीं।[६५] यह ईश्वरीय तप ही ब्रह्म के विवाह में घराती थे। साथ ही जीवात्माओं के पूर्व जन्मोपार्जित शुभाशुभ कर्मसंस्कार भी उनके साथ विद्यमान थे, जिनका फल देने के लिए सष्टि की आवश्यकता थी, ये ही बराती थे।

पुनः शरीर के विषय में प्रश्न उठाया है कि इसके अंग-प्रत्यंग को किसने जोड़ा--

ऊरू पादावष्ठीवन्तौ शिरो हस्तावथो मुखम् ।
पृष्टीर्बर्जह्ये पार्श्वे कस्तत् समदधाद् ऋषिः ॥
शिरो हस्तावथो मुखं जिह्वां ग्रीवाश्च कीकसाः।
त्वचा प्रावृत्य सर्वं तत् संधा समदधान्मही ॥
अथर्व. ११.८.१४,१५।

प्रश्न : जांघ, पैर, घुटने, सिर, हाथ, मुख, पसलियां, हंसली, पार्श्व शरीर के इन सब अंगों को किस ऋषि ने जोड़ा है ?

उत्तर : सिर, हाथ, मुख, जिह्वा, गर्दन के मोहरे, पीठ के मोहरे आदि शरीर के सब अंगों को त्वचा से ढक कर महती संधा देवी (जोड़ने वाली ईश्वरीय शक्ति) ने जोड़ा है।

पुनः इस शरीर में रंग किसने भरा, यह प्रश्न करते हैं--

यत् तच्छरीरमशयत् संधया संहितं महत् ।
येनेदमद्य रोचते को अस्मिन् वर्णमाभरत् ॥
सर्वे देवा उपाशिक्षन् तदजानाद् वधूः सती ।
ईशा वशस्य या जाया सास्मिन् वर्णमाभरत् ॥
अथर्व. ११.८.१६.१७

६४. यस्य ज्ञानमयं तपः, मु० १.९।

६५. गो० पू० १.१,२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रश्न : संधा देवी से जोड़ा हुआ जो महान् शरीर शयन कर रहा था, उसमें वह रंग किसने भरा, जिसके कारण यह आज रोचमान हो हो रहा है।

